In his next life such a monk is born in a good family, is endowed with a handsome form, etc., and all enjoyments are at his service; and at the end of that very life he shakes off all *karmans* and puts an end to all miseries and attains liberation.

—Observance of Asceticism

5. The *mumukṣu* strictly observing the rules of conduct for an ascetic, attains perfection, realises his true self. He is neither sound, nor colour, nor odour, nor taste, nor touch (because of his *siddha* state he is absolutely free from these qualities of *pudgala*-matter). He exists eternally without a form—in a formless state. He is all bliss. This bliss of a *siddha* (a liberated soul) is absolute and independent of anything and everything else. He has absolutely no touch or contact even with space. It is the very nature of soul to rise upwards when completely freed from *karmans* and enjoy its innate and infinite (faith, knowledge, power and) bliss. This bliss cannot be compared with anything else. An idea of it, however, could be given by an illustration. The bliss or perfect happiness of a *siddha*, attained after conquering the internal enemies like attachment, hatred, etc. is infinitely greater than the happiness one gets when all of one's enemies are destroyed, diseases cured, the riches attained and the desires fulfilled. The perfect happiness of a *siddha* cannot be known to others just as the happiness of an ascetic cannot be known to a non-ascetic or as that of good health to a sick man. The soul, even if bound by *karmans* from the beginningless time, can be separated from them as gold from ore (in accordance with the illustration of *kāñcana* and *upala*). The concepts of bondage and liberation are best —satisfactorily and logically—explained if they are related to the different states of the soul without bringing in the (Sāṅkhya) concept of *didṛkṣā* (desire to see). Again, *karman* is neither identical with the soul, nor is it imaginary; and liberation is not just the absence of worldly existence. It is not of the nature of the destruction of *santāna*—like the blown out/extinguished flame of a lamp (as held by some followers of Buddha).

In brief, the perfect happiness enjoyed by a liberated soul is infinite. The liberated souls—*siddhas* dwell at the top of the universe *(lokākāśa)*. Infinite liberated souls dwell in as much place as occupied by one *siddha* (liberated soul). The liberated soul, as soon as freed from the eight-fold *karmans* rises upwards to the top of the universe just as a gourd-fruit, with its eight layers of clay completely loosened rises to the surface from the river-bed.

This doctrine of the Jinas is free of all defects and is appreciated by persons who do not attract *karmans* afresh and who follow the path of right conduct. Never should it be imparted to underserving or unqualified persons. This instruction is issued with a view to favouring the underserving or the unqualified in accordance with the illustration of *Āmakumbhodakanyāsa* (pouring water in an unbaked earthen jar). Just as water when poured in an unbaked jar destroys that jar even so the imparting of secret doctrine ruins the underserving or unqualified. Not imparting it to them is, indeed, *karuṇā* (compassion) shown to them.

—The Fruit of Asceticism



Jain Education International For Private & Personal Use Only www.jainelibrary.org

### (iii) The meaning of the word *sūtra*

A *sūtra* is defined as—

स्वल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।।

"A statement in few words, free from doubt, conveying an important sense, having a universal application, free from padding and free from any error (grammatical or logical)". It is a short, concise aphorism used as an aid to memory. It contains only the most essential words—words which are absolutely necessary for conveying the intended sense. In course of time the word *sūtra* was applied to a work containing such short, pithy aphorisms—a work treating of a particular subject in its entirety by means of such aphoristic mnemonic rules. In this sense the word is applied to scientific works as the *Aṣṭādhyāyī* of Pāṇini and the works dealing with the various philosophical systems. But the word *sūtra*-- is also used in a rather loose and inexact sense, viz., that of "a short sentence" without any concern for word economy. It is in this sense that the word *sūtra* is used in connection with the *Prātiśākhyas, Śrauta-sūtras* (*sūtra* works based on the *śruti* or the Vedas), *Gṛhya-sūtras* (*sūtra* works containing directions for domestic rites and ceremonies) and *Dharma-sūtras* (*sūtra* works dealing with sacred and secular law).

In connection with the sacred texts of the Jains and the Bauddhas, however, the word *sūtra* is used in the sense of simply a *canonical work*. "These works are sometimes found to be written in ordinary prose and sometimes in verse and nowhere does one suspect the slightest attempt made to secure brevity and conciseness of expression. They are usually written, especially in their prose parts, in a characteristically *prolix* and *verbose* style, full of tiresome repetition and aggregation of synonymous words in one and the same place and to express the self-same idea." In view of their style they cannot lay claim to the title *sūtra*. J. Charpentier in his introduction to his edition of the *Uttarādhyayana-sūtra* (p 32) observes: "They (the Jains) doubtless adopted this name for their sacred writings more as a sort of formal counterpoise or set-off against Brahmanism, than with a view to imitating the style and modes of expression of the Brahamanical *sūtra* literature."

The learned editors of *Nandisuttaṁ* and *Aṇuogaddārāiṁ* (Jaina-Āgama-Series No. 1) however, defend the use of the title *sūtra* in connection with their sacred texts thus: ..."However, the Jainas have used the term *sūtra* for their *Āgamas* not because they are composed in the *sūtra* style but because their aim has been the same as that of the Vedic *sūtras*. The aim of the Vedic *sūtra* literature has been to comprehend, in a nutshell, all the teachings pertaining to Vedic conduct. Similarly, the main object of the *Āgamas* has been to comprehend, in a summary fashion, all the teachings of Lord Mahāvīra. ...When the varied gems or flowers are strung together they remain preserved, do not get scattered and are not lost. Similarly when the teachings regarding conduct are written down and given the form of a book they remain preserved for a long time. So, all these works deserve the term *sūtra*. In this context the meaning of the term *sūtra* is: '*sūtraṇāt sūtram*' (i.e., those works that put the various ideas together are called *sūtras*). ...Again, the Jainas maintain that the meanings of one single sentence, grasped by different hearers, are innumerable in accordance with their innumerable capacities. As a sentence of the *Āgama* has the power to suggest in various ways innumerable meanings, that sentence or a colletcion of those



Jain Education International For Private & Personal Use Only www.jainelibrary.org

sentences could legitimately be termed *sūtra*. In other words, the Jaina *Āgama* is called *sūtra* because it has the power to convey—to suggest various meanings. In this context the meaning of the term *sūtra* is: '*sūcanāt-sūtram*' (i.e., that which suggests various meanings is a *sūtra*)."

### (iv) The Title of the Text *Pañcasūtraka*

The text in question is popularly known as *Pañcasūtra*[1] (the Sanskrit equivalent of *Paṁcasuttaṁ*. As pointed out by the Editor, two of the palm-leaf MSS (K and K1) refer to the title of this text as *Pañcasūtra*. The list of names of works, prepared in the 14th or 15th century (VS), and known by the name *Bṛhaṭṭippanikā*, also knows this work by the name *Pañcasūtra*[2].

The two paper MSS (C and D) however, read the title as *Pañcasūtraka*. Ācārya Haribhadṛa too refers to the work as *Pañcasūtraka*[3]. The *Vṛtti* (commentary) on Ācārya Haribhadra's *Yogabindu*, although not *svopajña* is quite ancient. It also refers to this work as *Pañcasūtraka*[4].

Upādhyāya Śrī Yajovijayajī (17th century A.D.) in his *Svopajña-Vṛtti* (commentary) on *Dharma-parīkṣā* quotes a passage from this work with the introductory remark '*Pañcasūtryām apuktam*'[5]. It is obvious that he knew this work by the name *Pañcasūtrī*.

It would thus seem that the present work had been known by three different names: *(1) Pañcasūtra, (2) Pañcasūtraka*[6], and *(3) Pañcasūtrī*[7].

Ācārya Haribhadra would like us to explain the title as follows:
**पापप्रतिघात-गुणबीजाधानसूत्रादीनि पञ्चसूत्राणि यस्मिन् प्रकरणे तत् पञ्चसूत्रम् । पञ्चसूत्रमेव पञ्चसूत्रकं प्रकरणम् ।**[8]

---

*Shri Mahāvīra Jaina Vidyālaya edn., Bombay, 1968, pp. 12-13.

1. The printed edition, published by Sri Jain Atmanand Sabha Bhavnagar, 1914 bears the title:
   चिरन्तनाचार्यकृतं पञ्चसूत्रम्
   The two editions of this text, prescribed for the B.A. Examinations of the University of Bombay for 1933 and 1934, are entitled *Pañcasuttaṁ:* (1) Ed. with Introduction and Notes by Prof. A. N. Upadhye and pub. by Dr. P. L. Vaidya, 12 Connaught Road, Poona No. 1, 1932 (2) Ed. with Sanskrit rendering, introduction, Notes and Translation in English by Prof. V. M. Shah and pub. by Gurjar Granthratna Karyalaya, Gandhi Road, Ahmedabad, 1934. The edn. by Muniraj Rājāśekharavijayajī, with translation in Gujarati and pub. by Bhāratīya Prācya-tattva Prakāśana Samiti, Pindawada (Rajasthan) bears the title Srī *Pañcasūtra*.
2. Vide,—(entry No. 75)
3. Vide the present edn., p. 1 l.3, p. 24, l.19, p. 33, l.17, p. 44, l.16, p. 65, l.16, p. 80, l.18, p. 81, l.3.
4. Vide the extract from the commentary on *Yogabindu* v. 179, cited in *Pañcamaṃ Pariśiṣṭam*, p. 112 of the present edn.
5. Vide the extract cited in f.n. 3 on p. 18 of the present edn.
6. Cf. the titles *Pañcatantra* and *Pañcatantraka*.
7. Cf. the titles *Aṣṭādhyāyī*, Catuḥsūtrī, Dvādaśādhyāyī, etc.
8. Ācārya Haribhadra, at the beginning of his commentary says:
   किमिदं **पञ्चसूत्रकं** नाम? उच्यते—पापप्रतिघातगुणबीजाधानसूत्रादीनि, पञ्च सूत्राण्येव ।
   प्रव्रज्याविधानादीनि पञ्च वस्तूनि यस्मिन् प्रकरणे तत् पञ्चवस्तु, पञ्चवस्त्वेव पञ्चवस्तुकं ग्रंथे यथाक्रमम् . . . कीर्तयिष्यामि ।
   —पञ्चवस्तुकप्रथमगाथास्वोपज्ञवृत्तौ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (v) The Structure of *Pañcasūtraka*

The *Pañcasūtraka* is a short treatise for the spiritual guidance of Jain *mumukṣus*. It is one whole work containing five sections closely knit together. Each and every section bears an apt title and each preceding section logically leads to the succeeding section[1]. These five sections form as it were a ladder leading to *siddhi* or *mokṣa* (liberation). The first section treats of the nature of *Saṁsāra* which abounds in misery and in which the soul, chained by *karmans* has been wandering since times immemorial. The soul can put an end to this *saṁsāra* by practising the true *dharma* consisting of right faith, knowledge and conduct. One can attain this *dharma* by destroying one's sinful *karmans;* and these sinful *karmans* can be destroyed by cultivating *tathā-bhavyatva* (one's capacity for attaining liberation). This capacity can be achieved by three means: (i) *Catuḥ śaraṇagamana* (seeking shelter in (1) the *arhats,* (2) the *siddhas,* (3) the *sādhus* and (4) the *dharma* preached by *arhats*). (ii) *Duṣkṛtagarhā* (censuring one's misdeeds). (iii) *Sukṛtāsevana* (praising or approving of good deeds of others). The section is therefore called: *Pāpapratighāta-dharmaguṇabījādhāna-sūtra:* "The section dealing with the destruction of sinful deeds and the sowing of the seeds of religious vows (like Abstention from injury to living beings)." The second section then describes the five *sthūla* (or *aṇu*)-*vratas* and recommends the *mumukṣu* to adopt them, reflect on them, and put them into practice. In due course he cultivates an attitude of mind that is favourable to adopt *dīkṣā* (initiation). This section is called, *Sādhudharma-paribhāvanā-sūtra*: "The section dealing with Reflection on the duties of a monk". After reflecting on the duties of a monk the novice becomes totally disgusted with *saṁsāra*. He should then obtain consent of his parents to enter the ascetic order; if he fails in his efforts to obtain their consent, he should make arrangements for their livelihood and leave them with the express aim of securing the antidote of *dharma* for disabusing the minds of his parents of *moha* (delusion) and cheerfully adopt the ascetic order at the hands of a worthy *guru*. The section is aptly called: *Pravrajyā-grahaṇa-vidhi:* "The mode of adopting the ascetic order." The next section deals with the strict observance of the duties of a monk including reverential attitude towards his spiritual guide and preceptor while receiving instruction and advice from him and his actual study of the scriptures. The section is appropriately called *Pravrajyā-paripālanā-sūtra:* "The section dealing with the observance of monastic life." The concluding section treats of

1. The commentator very well demonstrates how the five sections are closely interlinked when he observes at the commencement of his *Vyākhyā:*

. . . न हि प्रायः पापप्रतिघातेन गुणबीजाधानं विना तत्त्वतस्तच्छ्रद्धाभावप्ररोहः, न चासत्यस्मिन् साधुधर्मपरिभावना, न चापरिभावितसाधुधर्मस्य प्रव्रज्याग्रहणविधावधिकारः, न चाप्रतिपन्नस्तां तत्परिपालनाय यतते, न चापालने एतत्फलमाप्नोतीति प्रवचनसार एष सज्ज्ञानक्रियायोगात् ।

—p., 2. ll 2-5.

Professor K. V. Abhyankar, in his *Foreword* to the edition of *Pañcasuttaṁ* by Prof V. M. Shah, pub. by Gurjar Granthratna Karyalaya, Gandhi Road, Ahmedabad, 1934, observes thus:

. . . "is a small elegant treatise . . . The book has occupied a position of high esteem among the post-Āgama works on Jaina Religion. *In the small treatise the author has given a cogent and logical presentation of the spiritual uplift of the pious individual in five chapters which mark the five successive steps of his spiritual progress. The presentation is fully logical although a little bit ummethodical and the expression is chaste and adequate although a little bit archaic at places.* It is the semireligious character and antiquity of the book that attracted a great scholar like Haribhadrasūri to the book and inspired him to write a gloss on it." (Italics ours).



Jain Education International For Private & Personal Use Only www.jainelibrary.org

the fruit of asceticism, viz., *siddhi* or *mokṣa* (liberation by his rigorous monastic life and strict observance of *tapas* (austerities) and *saṁyama* (self-restraint) he completely annihilates his former *karmans* and his soul flies upward to the top of the universe and permanently dwells there in peace enjoying eternal happiness or bliss. In accordance with the contents the section is rightly called: *Pravrajyā-phalasūtra:* "The section dealing with the fruit of asceticism".

This brief analysis of the contents would show how the author has carefully planned and arranged the different sections to constitute one well-organised whole—one single work·

### (vi) The Style of *Pañcasūtrakam*

The work is religio-philosophical in its nature. It would be therefore unfair to judge it as a literary work. Even then when we go through the text we are struck by some of the noteworthy features of its style. The whole work is written in Ardhamāgadhī prose. Here and there the style is reminiscent of the style of the Jain canonical prose. But on the whole it is refreshingly free from the glaring peculiarities that characterise the canonical prose. It is written in a didactic tone, no doubt, but not 'in a dry-as-dust, matter of fact, didactic tone'[1]. The prose passages are not 'extremely prosaic'. They are not 'positively dry and uninteresting, and their style is not 'verbose, laboured and artificial'[2]. A.N. Upadhye observes: "The whole work is written in Ardhamāgadhī prose... Generally the text is easy but it becomes difficult in the last two chapters where narration is intermixed with logical discussions[3]". And about the treatment of the subject matter he says: "The treatment of subject matter in this work is a queer admixture of personal exclamations, appeals to the authority, moral injunctions, aphoristic maxims, homely illustrations and their application, cryptic statements and arguments, and of short descriptions[4]".

As we read through this text we are struck by some literary excellences that lend a sort of beauty to this semi-religious and semi-philosophical treatise. In order to elucidate the various points pertaining to religion and philosophy the author makes effective use of some figures of speech and examples or illustrations. He is capable of epigrammatic brevity and writes brief, pointed, simple yet effective prose. We cite here below a few passages to illustrate these general observations regarding his style:

एवं सुहुममेयं, न तत्तओ इयरेण गम्मइ, जइसुहमिवाजइणा, आरुग्गसुहं व रोगिण त्ति विभासा।

Here we have two apt similes to illustrate the point that none else than a liberated soul can truly realise the nature of the bliss of *mokṣa* just as one who is not a monk

1. *A History of Indian Literature*, Vol II, University of Calcutta edition, 1933, p. 426.
2. *The Daśavaikālikasūtra: A Study* by Prof M. V. Patwardhan, Willingdon College, Sangli, 1933.
5. *The Pañcasuttraṁ* of an unknown ancient writer, edited with Introduction and Notes by A. N. Upadhye and pub. by Dr. P. L. Vaidya, 72 Connaught Road, Poona No. 1, Introduction, p. 10.
4. *Ibid*, Introduction, p.4.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

cannot realise the happiness of a monk or a person afflicted with disease cannot realise the happiness of good health. In the following passage we have an apt *mālopamā*:

सेवेज्ज धम्ममित्ते विहाणेणं, अंधो विय अणुकड्ढगे, वाहिओ विव वेज्जे, दरिद्दो विय ईसरे, भीओ विय महानायगे।

A *śrāvaka* should follow his *dharma-mitras* (senior colleagues) just as a blind man follows his 'leader', a sick person his physician, a poor man his master and a person placed in danger a great general. Here is an appropriate simile:

...किरिया अकिरिया कुलडानारीकिरियासमा...।

The religious duties, performed by a monk, who does not respect his *guru* (spiritual teacher), are as good as not performed like the austerities etc. of an unchaste woman —which prove totally barren.

Here we have a *mālā-rūpaka*:

आणा हि मोहविस-परममंतो, जलं दोसाइजलणस्स, कम्मवाहिचिगिच्छासत्थं, कप्पपायवो सिवफलस्स।

The Jain *āgama* is the supreme spell or incantation to quell the poison of delusion, the veritable water to put out the fire of hatred and the like, the science of medical treatment to cure the disease of *karman*, the wish-yielding tree that bears the fruit of *mokṣa*. Here we have another *mālā-rūpaka*:

...मोहतिमिरदीवे, रागामयवेज्जे, दोसाणल-जलनिही संवेगसिद्धिकरे हवइ अचिंतचिंतामणिकप्पे।

The monk who practises asceticism sincerely is a veritable lamp that dispels the darkness of delusion, a physician who cures the disease of attachment, an ocean to extinguish the fire of hatred,...

Here we have a *virodha* (paradox):

एस चाए अचाए। अचाए चेव चाए।

This desertion is indeed no desertion (as he deserts them—his parents—with a view to securing their welfare). Not deserting them (the parents) would amount to desertion (as it would jeopardize their well-being).

Here we have some striking *subhāṣitas*:

सव्वे जीवा पुढो पुढो ममत्तं बंधकारणं।

All beings have their own individuality—Each being is different from all others. Self-interest (sense of mine) is the cause of bondage (to the cycle of birth and death).

करुणा य धम्मप्पहाणजणणी जणम्मि।

*Karuṇā* (Compassion) is the cause of the rise or prosperity of *dharma*.

धम्माराहणं खु हियं सव्वसत्ताणं।

Practising of the *dharma* contributes to the good of all beings.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

The author has introduced about a dozen *jñātas* or *nyāyas* (nāyas)—examples or illustrations to elucidate the various points under discussion. A few of them may be noted here:

एगरुक्खनिवासिसउणतुल्लं

The perching of birds on one tree for the night and flying away the next morning—this illustration is introduced to explain the fact that union of beings ends in separation.

अट्टाणगिलाणोसहत्थचागनाय

The example of deserting (one's parents) who have taken ill in an out-of-the way place in a forest with the intention of bringing medicine for them. The son who has intense desire to receive the *dīkṣā* but whose parents try to dissuade him, deserts them for bringing the medicine of *dharma* for their benefit.

आमकुंभोदगनासनाय

The example of water, poured in a raw pot, destroying the pot itself. This illustration is cited to explain that the knowledge of Jain *āgama* is not to be imparted to the unfit—unqualified as it would lead to their ruin.

The author when he means can write brief, effective, forceful prose. We may cite here a passage or two by way of illustration:

> ...न चिंतेज्ज परपीडं। न भावेज्ज दीणयं। न गच्छेज्ज हरिसं। ...एवं न भासेज्ज अलियं, न फरुसं, न पेसुन्नं, नाणिबद्धं। हियमियभासगे सिया। एवं न हिंसेज्ज भूयाणि। न गिण्हेज्ज अदत्तं न निरिक्खेज्ज परदारं।...

'He should not think of causing pain to others. He should not feel dejected. He should not feel elated...Similarly, he should not speak a lie, nor harsh words, nor indulge in slander or backbiting nor speak incoherently. He should speak friendly or salutary words and measured words. Similarly he should not cause injury to living beings. He should not take what is not given. He should not look at another's wife'.

तहा जागरिज्ज धम्मजागरियाए—को मम कालो किमेयस्स उचियं, असारा विसया नियमगामिणो विरसावसाणा। भीसणो मच्चू सव्वाभावकारी, अविन्नायागमणो, अणिवारणिज्जो,... धम्मो एयस्स ओसहं... परमाणंदहेऊ।

"He should keep vigilant in the matters of *dharma;* What is now my age? Is it proper at this age to adopt *dharma?* Objects of senses are worthless; they are evanescent; they end in misery. Terrible is Death. He destroys everything. He comes near you–approaches you–stealthily. He is irresistible...*Dharma* is its antidote... is the source of supreme bliss'.

In conclusion, the author presents the dignified subject-matter of *Pañcosūtraka* in equally dignified style.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (vii) The place of *Pañcasūtraka* in the post-canonical religious works of the Jains and the Jain community:

This ancient treatise "has occupied a position of high esteem among the post-*āgama* works on Jain religion".[1] It has been regarded by tradition as a priceless jewel among the religious works of the Jains. The work is no doubt, small in extent, yet it succeeds in describing effectively the preliminary stage of *śrāvaka-dharma* that prepares for the intensified stage of *sādhu-dharma* which in its own way leads to the *Mumukṣu's* cherished goal of *mokṣa*.

The *śrāvakas, śrāvikās,* the *sādhus* and the *sādhvīs,* especially belonging to the Śvetāmbara sect, daily recite, if not all the five *sūtras,* at least the first *sūtra.* This *sūtra* declares that "When it is properly recited, heard, and meditated upon, the inauspicious *karmans* are... destroyed and... auspicious *karmans* are attracted... begin to yield results and in due course lead to *mokṣa*". With this promise and hope held out, the Jains recite, hear and meditate upon this *sūtra*.

As pointed out by Muni Śrī Jambuvijayajī the later works and commentaries of reputed Jain authors and commentators show an unmistakable influence of *Pañcasūtraka*. Thus Haribhadrasūri's *Dharmabindu* and Muni Candrasūri's *Vṛtti* on it adopt some portions from *Pañcasūtraka* and its commentary. Ācārya Hemacandra cites a passage[2] from this work in his *svopajña* commentary on *Yogaśāstra*. Further, in his famous *Vītarāgastotra*[3] he beautifully summarises the first *sūtra*. The noted commentator Malayagiri makes use of the introductory portion of the *Pañcasūtraka-Vyākhyā* in his own commentary on *Dharma-Saṁgrahaṇī*[4]. These references lead us to conclude that our text was current and popular in the eleventh and the twelfth centuries of the Vikrama era. Much later in the seventeenth century we find Upādhyāya Yaśovijaya making liberal use of our text in his *Dharma-parīkṣā-svopajña-vṛtti*[5].

The daily recitation of this *Pañcasūtraka* and its influence on later celebrated Jain authors and commentators speak volumes of its exalted place in post-canonical Jain works on religion and the Jain community.

## (viii) Acārya Haribhadra[6], the commentator of *Pañcasūtraka:*

In the 8th century (700-770 A.D.) there lived one of the most distinguished and prolific writers of the Jains, Ācārya Haribhadra. He was born as the son of a *Brāhmaṇa* in Rajastan and was well-versed in different branches of Vedic learning. After receiving the Jain-*Dīkṣā* he mastered Prakrit languages and literature including Jain *āgama* works. He thus com-

---

1. Professor K. V. Abhyankar in his Foreword to Prof. V. M. Shah's edition.
2. लाभोचियदाणे ... लाभोचियनिहिकरे सिया । p.29, ll, 16-17
3. स्वकृतं दुष्कृतं गर्हन् सुकृतं चानुमोदयन् ।
   नाथ त्वच्चरणौ यामि शरणं शरणोज्झितः ।। —Prakāśa 17.1
   and other verses. Vide Appendix V. p, 111 (this edn.)
4. Vide this edn. f.n. Appendix V. p. 109.
5. Vide this edn. p. 13, f.n. 4, p. 18 f.n. 3.
6. (i) M. Winternitz: *A History Of Indian Literature,* Vol. II, University of Calcutta edn. 1933, pp. 479, f. 485, 488, 507, 511, 519f, 522f, 526f, 561 and 583f.
   (ii) Introduction to *Samarāiccakahā* ed by Dr. H. Jacobi and pub. by Asiatic Society of Bengal, Calcutta.
   (iii) *Sumadarśi Ācārya Haribhadra* (in Gujarati) by Pandit Sukhlal Sanghavi, pub. by Bombay University 1961.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

bined in himself the Vedic and the Jain traditions and attained mastery over both Sanskrit and Prakrit. He wrote commentaries on *āgama-sūtras* as well as *āgama-bāhya sūtras* (including the present treatise), *Prakaraṇa*-works and comprehensive philosophical texts, works dealing with *yoga, kathās* and *stuti.* He is said to have composed 1400 *Prakaraṇas* (systematic, *śāstriya* treatises)! This number is staggering, no doubt, but his extant works bear ample testimony to his versatile genius and encyclopaedic scholarship. "Haribhadra wrote both in Sanskrit and Prakrit. He was an eminent composer in verse and in prose, and also wrote systematic scientific treatises (Prakaraṇas) and comprehensive philosophical works. Probably, he was also the first to write commentaries to the Canon in Sanskrit... While utilising the ancient Prakrit commertaries he retained the narratives *(Kathānakas)* in their original Prakrit form".[7]

Compared to his predecessors and successors Ācārya Haribhadra leaves a deep impression on our minds of his two remarkable qualities: his non-sectarian approach and attitude, and courteous and respectful attitude towards his adversaries. His fair and impartial attitude is very well reflected in his famous statement:

पक्षपातो न मे वीरे न द्वेषः कपिलादिषु ।
युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः ।।

Ācārya Haribhadra's meeting with the Jain *sādhvī mahattarā* Yākinī marked the turning point in his life and led to his entering the ascetic order. Out of a sense of gratefulness he thenceforth called himself the spiritual son of the great nun Yākinī. It may be noted that got another name for himself, "bhava-viraha", out of his zest for *mokṣa.*

### (ix) Ācārya Haribhadra's *Pañcasūtraka-Vyākhyā*

There are various kinds of expositions in Sanskrit and Prakrit literatures. *Vyākhyā, Vṛtti, Paddhati, Vārttika, Vivaraṇa, Bhāṣya, Pañjikā, Nijjutti (Sk niryukti), Cūrṇi, Avacūri, Samīkṣā* are well known types of expositions, each and every one of them having characteristic feature/s of its own. In his *Kāvyamīmāṁsā* Rājaśekhara defines some of these kinds of exposition. The term 'Vyākhyā' is thus defined:

"अर्थस्य अप्रतीयमानस्य पर्यायाभिधानेन विभज्य प्रतिपादनं व्याख्या, शब्दस्यापि व्युत्पादनं व्याख्या। एवमेते द्वे व्याख्ये (तयोरर्थपरिज्ञानमेकस्याः कार्यम्, शब्दपरिज्ञानमेकस्याः।)"[8]

The religio-philosophical nature and antiquity of this short but important *Pañcasūtraka* attracted a scholar of Ācārya Haribhadra's eminence and inspired him to write commentary on it. He has not only put his finger on the stiff points and pointed out their exact meaning "which the ancient unknown author "seems to have intended but at places he has beautifully preserved the traditional explanations which obtained at his time. The commentary is small in compass but rich in meaning, and its style is lucid and graceful. In support of his explanations he cites passages from earlier works of Jain *āgama* and post-*āgama* Jain works and from poetic works as well. Thus we have citations from *Daśavaikālika-sūtra, Bṛhat-saṁgrahaṇī, Niśītha-bhāṣya, Āvaśyaka-niryukti, Viśeṣāvaśyaka-*

7. *A History of Indian Literature*, Vol. II, pp. 480-481.
8. Oriental Institute, Baroda, 1934 edn., p. 5



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*bhāṣya*, *Āvaśyaka-sūtra*, *Srāvaka-Prajñapti*, *Bhagavatī-sūtra*, *Ogha-niryukti*, *Tattvārtha*, *Praśamarati*, and Aśvaghoṣa's *Saundarānanda* and *Buddha-carita* and from his own other works like *Lokatattvanirṇaya*, *Yogadṛṣṭi-samuccaya* and *Yogabindu*, *Pañcāśaka*, *and Lalita-vistarā*. There are quite a few citations which remain to be traced to their sources. These numerous citations attest to Ācārya Haribhadra's wide reading and ability to use them on appropriate occasions. Ācārya Haribhadra's *Vyākhyā*, though learned, is not more erudite and difficult than the text, but explains the text clearly and unambiguously.

*Place* : Bombay

*Date* : 5th September, 1985

— **V. M. Kulkarni**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

याकिनीमहत्तराधर्मसून्वाचार्यप्रवरश्रीहरिभद्रसूरिविरचितव्याख्यासमलङ्कृतं

## चिरन्तनाचार्यविरचितं

# पञ्चसूत्रकम्।

॥ ॐ नमो वीतरागाय ॥

**प्रणम्य परमात्मानं, महावीरं जिनेश्वरम्।**
**सत्पञ्चसूत्रकव्याख्या, समासेन विधीयते ॥१॥**

**आह–किमिदं पञ्चसूत्रकं नाम? उच्यते–पापप्रतिघातगुणबीजाधानसूत्रादीनि पञ्च सूत्राण्येव, तद्यथा–पापप्रतिघातगुणबीजाधानसूत्रम् १, साधुधर्मपरिभावनासूत्रम् २, प्रव्रज्याग्रहणविधिसूत्रम् ३, प्रव्रज्यापरिपालनासूत्रम् ४, प्रव्रज्याफलसूत्रम् ५ इति।**

---

१ अत्रेदमवधेयम्—अस्य **सटीकस्य पञ्चसूत्रकस्य** संशोधनमस्माभिः अष्ट हस्तलिखितादर्शानवलम्ब्य विहितम्। तेषु चत्वार आदर्शास्तालपत्रात्मकाः, चत्वारस्तु कागदपत्रात्मकाः। तेषां संक्षिप्तः परिचय इत्थम्—

(१) K1=खम्भातनगरे श्रीशान्तिनाथतालपत्रग्रन्थभाण्डागारे विद्यमाना प्रतिः। अस्यां प्रतौ मूलमात्रं पञ्चसूत्रकं Catalogue of palm–leaf mss. in the Santinatha Jain Bhandara, Cambay अनुसारेण No. 114 मध्ये (११४ तममञ्जूषायां) ७४ तः ८८ पर्यन्तेषु १५ पत्रेषु वर्तते। ईसवीयत्रयोदशशतकस्य पूर्वार्धे ग्रन्थोऽयं लिखित इति लिप्याद्यनुसारेण लेखनसमयविषये ग्रन्थसूचिकारिणामभिप्रायः।

(२) K=खम्भातनगरे श्रीशान्तिनाथतालपत्रग्रन्थभाण्डागारे विद्यमाना प्रतिः। अस्यां प्रतौ मूलमात्रं पञ्चसूत्रकम् उपरिनिर्दिष्टCatalogue अनुसारेण No. 89 मध्ये (८९ तममञ्जूषायां) १–१६ पत्रेषु ग्रन्थोऽयं वर्तते। ईसवीयत्रयोदशशतकस्य उत्तरार्धे ग्रन्थोऽयं लिखित इति लिप्याद्यनुसारेण लेखनसमयविचारकाणां मतम्।

(३) S=**पाटण**नगरे 'संघवीपाडा'सत्कतालपत्रग्रन्थभाण्डागारे विद्यमाना प्रतिः, सम्प्रति सम्पूर्णोऽप्ययं तालपत्रग्रन्थसंग्रहः **पाटण**नगरे एव श्रीहेमचन्द्राचार्यजैनज्ञानमन्दिरे वर्तते। अस्यां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह–किमर्थमेवमेतेषामुपन्यास इति। अत्रोच्यते–एतदर्थस्यैवमेव तत्त्वतो भाव इति ख्यापनार्थम्, न हि प्रायः पापप्रतिघातेन गुणबीजाधानं विना तत्त्वतस्तच्छ्रद्धाभावप्ररोहः, न चासत्यस्मिन् साधुधर्मपरिभावना, न चापरिभावितसाधुधर्मस्य प्रव्रज्याग्रहणविधावधिकारः, न चाप्रतिपन्नस्तां तत्पालनाय यतते, न चापालने एतत्फलमाप्नोतीति प्रवचनसार एष सज्ज्ञान-क्रियायोगात्। अन्यथा अनादिमति संसारे यथाकथञ्चिदनेकशः एतत्प्राप्त्यादेः स्यादेतत् सर्वसत्त्वानामेव। न चैतदेवम्, सर्वसत्त्वानां सिद्ध्यभावात्। सिद्धिश्च प्रधानं फलं प्रव्रज्यापरिपालनस्य। आनुषङ्गिकं तु सुदेवत्वादि।

यथाकथञ्चिदनेकश एतत्प्राप्त्यादि च वचनप्रामाण्यात्, सर्वसत्त्वानामेव प्रायो ग्रैवेयकेष्वनन्तश उपपातश्रुतेः, न च साधुक्रियामन्तरेणोपपातः, न च सम्यग्दृष्टेरु-

---

प्रतौ १–१६१ पत्राणि, तेषु १–३२ पत्रेषु मूलमात्रं पञ्चसूत्रकं वर्तते, ३३–१६१ पत्रेषु आचार्यश्रीहरिभद्रसूरिविरचिता टीका वर्तते।

(४) H=**पाटण**नगरे श्री हेमचन्द्राचार्यज्ञानमन्दिरे विद्यमाना 'संघनो भंडार'सत्का तालपत्रलिखिता प्रतिः (डाबडो नंबर ८९, पोथी नंबर १०५)। अस्यां प्रतौ ३२ तः ६४ पर्यन्तं पत्राणि सन्ति। तेषु च आचार्यश्री हरिभद्रसूरिविरचिता पञ्चसूत्रकटीका प्रथमसूत्रं यावदेव वर्तते।

(५) A=पाटणनगरे श्री हेमचन्द्राचार्यजैनज्ञानमन्दिरे विद्यमाना 'श्री संघनो जैनज्ञानभंडार'-सत्का कागदपत्रोपरि विक्रमसंवत् १६७३ वर्षे लिखिता प्रतिः (डाबडो नंबर ५८, प्रति नंबर १४०३)। अस्यां प्रतौ १–२१ पत्राणि। एषु पत्रेषु पञ्चसूत्रकटीकैव वर्तते।

(६) B=पाटणनगरे श्री हेमचन्द्राचार्यज्ञानमन्दिरे विद्यमाना 'श्री संघनो जैन ज्ञानभंडार'-सत्का विक्रमसंवत् १६७४ वर्षे कागदपत्रोपरि लिखिता प्रतिः (डाबडो नंबर ५८, प्रति नंबर १४०१)। अस्यां प्रतौ १–२० पत्राणि। एषु च पत्रेषु पञ्चसूत्रकटीकैव वर्तते।

(७) C=पाटणनगरे श्री हेमचन्द्राचार्यज्ञानमन्दिरे विद्यमाना 'श्री संघनो जैन ज्ञानभंडार'-सत्का विक्रमसंवत् १६७३ वर्षे कागदपत्रोपरि लिखिता १–७ पत्रात्मिका प्रतिः (डाबडो नंबर ५८, प्रति नंबर १३९९)। अस्यां मूलमात्रं पञ्चसूत्रकं वर्तते।

(८) D=इयमपि प्रतिरुपरिनिर्दिष्टप्रतिवत् ज्ञेया, केवलं लेखनवर्षस्य निर्देशो नास्ति, (तथा प्रति नंबर १४०० ज्ञेयः)। अस्यामपि मूलमात्रं पञ्चसूत्रकं वर्तते॥

२ **आक्षेपे** Aटि०॥ ३ °**पालन**° H. ॥

१ दृश्यतां **भगवतीसूत्रे** १२।७॥ २ °**रुपार्ध**° S. H. विना। "जेसिमवड्ढो पुग्गलपरियट्टो सेसओ उ संसारो। ते सुक्कपक्खिआ खलु अहिए पुण किण्हपक्खिया ॥७२॥" इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पार्द्धपुद्गलपरावर्ताभ्यधिको भव इति भावनीयमेतत् । तस्मान्निर्बीजस्यैव क्रियामात्रस्य[1] सा प्राप्तिरिति प्रतिपत्तव्यम् । सबीजायां तु तस्यां न दीर्घदौर्गत्यम् । अत[2] एतदर्थस्यैवमेव तत्त्वतो भाव इति स्थितम् । अयं चातिगम्भीरो न भवाभिनन्दिभिः क्षौद्र्याद्युपघातात् प्रतिपत्तुमपि शक्यते, आस्तां पुनः कर्तुमिति न सर्वेषामेवैतत्प्राप्त्यादि । अतो यथोक्तदोषाभावः । इत्यलं विस्तरेण ।

इह चेदमादिसूत्रम्—

**णमो वीतरागाणं सव्वण्णूणं[3] देविंदपूइयाणं[4] जहट्ठियवत्थुवाईणं तेलोक्कगुरूणं अरुहंताणं[5] भगवंताणं जे एवमाइक्खंति—इह खलु अणाइजीवे, अणादिजीवस्स भवे अणादिकम्मसंजोगणिव्वत्तिए[6], दुक्खरूवे, दुक्खफले, दुक्खाणुबंधे ।**

**णमो वीतरागाणमित्यादि । नमो वीतरागेभ्यः ।** तत्र रज्यतेऽनेनेति रागः, रागवेदनीयं कर्म, आत्मनः क्वचिदभिष्वङ्गपरिणामापादनात् । रञ्जनं वा रागः, रागवेदनीयकर्मापादितो भावोऽभिष्वङ्गपरिणाम एव । वीतोऽपेतो रागो येषां ते वीतरागाः, तेभ्यो नमः । एतच्च वीतद्वेष-मोहोपलक्षणम् , वीतद्वेषेभ्यो वीतमोहेभ्यः । तत्र द्विष्यतेऽनेनेति द्वेषः, द्वेषवेदनीयं कर्म, आत्मनः क्वचिदप्रीतिपरिणामापादनात् । द्वेषणं वा द्वेषः, द्वेषवेदनीयकर्मापादितो भावोऽप्रीतिपरिणाम एव । एवं मुह्यतेऽनेनेति मोहः, मोहवेदनीयं कर्म, आत्मनः क्वचिद्ज्ञानपरिणामापादनात् । मोहनं वा मोहः, मोहवेदनीयकर्मापादितो भावोऽज्ञान-

---

**उमास्वाति**प्रणीतायां **श्रावकप्रज्ञप्तौ** । " येषाम( मु ? )पार्धपुद्गलपरावर्त एव शेषः संसारस्तत ऊर्ध्वं सेत्स्यन्ति ते शुक्लपाक्षिकाः क्षीणप्रायसंसाराः, खलुशब्दो विशेषणार्थः, प्राप्तदर्शना वा अप्राप्तदर्शना वा सन्तीति विशेषयति । अधिके पुनरुपार्धपुद्गलपरावर्ते संसारे कृष्णपाक्षिकाः क्रूरकर्माण इत्यर्थः । पुद्गलपरावर्तो नाम त्रैलोक्यगतपुद्गलानामौदारिकादिप्रकारेण ग्रहणम् । उपार्धपुद्गलपरावर्तस्तु किञ्चिन्न्यूनोऽर्धपुद्गलपरावर्त इति ।" इति आचार्यश्री**हरिभद्रसूरि**विरचितायां **श्रावकप्रज्ञप्तिटीकायाम्** ।

१ **° मात्रस्यैसा(षा ?) प्राप्तिरिति** H. ॥ २ A B विना-**अत एवतद्स्यैव °** S. । **अत एवतस्यैव °** H. । दृश्यतां पृ० २ पं० १ ॥ ३ **सव्वन्नूणं** K. ॥ ४ **पूईयाणं** K1. ॥ ५ **अरहंताणं** K1.S. ॥ ६ **निव्वत्तीए** K.K1 ॥

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

परिणाम एव। एतदुपलक्षणं 'वीतराग'ग्रहणम्। तथा चाह–सव्वण्णूणं, सर्वज्ञेभ्यः। न ह्यवीतरागा इव अवीतद्वेषादयः सर्वज्ञा भवन्ति। सर्वं जानन्तीति सर्वज्ञाः, तेभ्यो नमः।

आह–ये वीतरागास्ते सर्वज्ञा एवेति गतार्थं विशेषणम्, न, छद्मस्थवीतरागाणामसर्वज्ञत्वात्। यद्येवं 'सर्वज्ञेभ्यः' इत्येतावदेवास्तु, अलं 'वीतराग'ग्रहणेन, न, अवीतरागाणामपि सकलशास्त्रविदामुपचारेण सर्वज्ञव्यवहारसिद्धेस्तद्व्यवच्छेदार्थं 'वीतराग'ग्रहणमिति।

एतद्विशेषणायैवाह–देविंदपूजिताणं, देवेन्द्रपूजितेभ्यः। देवेन्द्राः शक्रादयः, तैः पूजिताः समभ्यर्चिताः, तेभ्यो नमः। आह–ये वीतरागाः सर्वज्ञाश्च ते देवेन्द्रपूजिता एवेति नार्थोऽनेन विशेषणेन, न, मुण्डकेवलिप्रभृतीनां केषांश्चित् तत्पूजितत्वानुपपत्तेः। यद्येवं देवेन्द्रपूजितेभ्य इत्येतदेवास्तु, अलं वीतरागादिग्रहणेन, न, अवीतरागादीनामपि गणधरादीनां देवेन्द्रपूजितत्वसिद्धेस्तद्व्यवच्छेदार्थं वीतरागादिग्रहणमिति।

एतद्विशेषणायैवाह–जहट्ठिवत्थुवादीणं, यथास्थितवस्तुवादिभ्यः। यथास्थितमभिलाप्यानभिलाप्यत्वादिना प्रकारेण स्थितं वस्तु वदितुं शीलाः यथास्थितवस्तुवादिनः, तेभ्यो नमः।

आह–ये वीतरागाः सर्वज्ञाः देवेन्द्रपूजिताश्च ते यथास्थितवस्तुवादिन एवेति न किञ्चिदनेन विशेषणेन, न, असदभ्युपगमव्यवच्छेदार्थत्वात्। तथाहि–अस्त्येवंविधोऽसदभ्युपगमः–किल वीतरागादयोऽपि न यथास्थितवस्तुवादिनः,

वस्तु वाचामगोचरः [ ]

इति वचनात्। यद्येवं 'यथास्थितवस्तुवादिभ्यः' इत्येतावदेव चारु, नार्थो वीतरागादिग्रहणेन, न, साम्यतः पूर्वधरादेरपि यथास्थितवस्तुवादित्वात्

१ नेहावी° H.॥ २ H. विना °रागा–व Sमू०, °रागा एव Sसं०। °रागा एव A.B॥ ३ इत्येतदेवा० H.॥ ४ °शास्त्रार्थविचार उपचारेण H.॥ ५ पूईयाणं H.॥ ६ "आत्ममात्रतारकमूकान्तकृत्केवल्यादिरूपमुण्डकेवली'त्यादि स्याद्वादमञ्जर्याम् [प्रथमकारिकाव्याख्यायां पृ० ५८]। अतो मूका अन्तकृतश्च ये केवलिनस्ते मुण्डकेवलिपदवाच्याः"—Aटि०॥ ७ केषांचिदिंद्रपूजित० H.॥ ८ ०रागग्रह० H.॥ ९ अत्र H. मध्ये पत्रद्वयं नास्ति। अतः ०वीत० इत्यत आरभ्य चतुस्त्रिंशदतिशयसमन्विते० [पृ० ९ पं. ९] इत्यन्तः पाठः Hमध्ये नास्ति॥ १० ०लप्यानभिलप्य० S.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्व्यवच्छेदार्थं वीतरागादिग्रहणमिति । व्यवच्छेदश्चेह 'सर्वत्र गुणप्रकर्षवान् स्तवार्हः' इति तस्य तत्संपादने तदन्तर्गतगुणानां तत्संपादनमेव ' इति न्यायख्यापनार्थमिति, [ न ] तु निराकरणार्थमेव ।

एभिश्चतुर्भिर्विशेषणपदै[1]रपायापगमातिशयादयश्चत्वारो मूलातिशया उक्ता वेदितव्याः । तद्यथा—[2]अपायापगमातिशयः १, ज्ञानातिशयः २, पूजातिशयः ३, वागतिशयश्च ४, यथोद्देशमेव च वेदितव्याः, अनेनैव क्रमेणैतेषां भावात् । तथाहि—वीतरागो १ भूत्वा सर्वज्ञो २ भवति, सर्वज्ञस्य च पूजातिशयसंभवः ३, तदनु धर्मदेशना ४ इति अनेनैव क्रमेणैतेषां भाव इति । एतदविनाभाविनश्चान्येऽपि देहसौगन्ध्यादयः प्रभूता वेदितव्याः । ततश्च ' चतुस्त्रिंशदतिशयसमन्वितेभ्यः परमात्मभ्यो नमः ' इत्युक्तं भवति ।

अत एव सकलविशेषणार्थोपसंहारेणाह—**तेलोक्कगुरूणं [3]अरुहंताणं भगवंताणं** ति । **त्रैलोक्यगुरुभ्यः**, त्रैलोक्यवासिसत्त्वेभ्यो गृणन्ति शास्त्रार्थमिति त्रैलोक्यगुरवः, तद्गुणाधिकत्वात् तन्माननीयत्वाद्वा, तेभ्यो नमः । [4]एतानेव सनिबन्धनेनान्वर्थनाम्नाऽऽह—**अरुहेभ्यो भगवद्भ्य** इति । **न रोहन्ति** न भवाङ्कुरोदयमासादयन्ति [5]कर्मबीजाभावादिति अरुहाः, तेभ्यः । किंविशिष्टेभ्यः ? भगः समग्रैश्वर्यादिलक्षणः, स विद्यते येषां ते भगवन्तः, तेभ्यो भगवद्भ्यो नम इति । एवंभूताश्च ते समधिकृतातिशयभाजश्चरमदेह[6]स्था अपि, ततो मुक्तिभावे जन्माङ्कुरोदयाभावात् ।

अत एवाह एतदुक्तार्थसूत्रानुवादकृत्—**जे एवमाइक्खंती**ति । एवं चानन्तरेण ग्रन्थेनेष्टदेवतानमस्कारः अनुवादकरणस्यापि श्रेयोभूतत्वेन तदारम्भे विघ्नविनायकोपशान्तये मङ्गलार्थ उक्तो वेदितव्यः ।

ये वीतरागादिविशेषणविशिष्टा भगवन्त **एवम्** इति वक्ष्यमाणम् **आचक्षते** अत्यर्थं व्यक्तमभिदधति । कथम् ? इत्याह— **इह खलु अणादिजीवे, इह खल्व**नादिजीवः । इह लोके, खलुशब्दोऽवधारणार्थः, लोके एव [7]नालोके,

१ ०ऽपायातिशया० S. ॥ २ अपायातिशयः Sमू० ॥ ३ °अर° S. H ॥ ४ एतेनैव A B ॥ ५ कर्मभावबीजा° H. ॥ ६ अत्र H. मध्ये एकं पत्रं नास्ति, ततः 'स्था इत्यत आरभ्य इह खल्व' [ पृ. ५ पं० २३ ] इतिपर्यन्तः पाठः H. मध्ये नास्ति ॥ ७ नालोको ये अनादिः H. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनादिः सततं समवस्थितो जीव आत्मा, सर्वथाऽसतः सत्ताऽयोगात्, अतिप्रसङ्गात्, विशिष्टशक्त्यसिद्धेः ।

तथा अणादिजीवस्स भवे, अनादिजीवस्य भवः । भवन्त्यस्मिन् कर्मवशवर्त्तिनः प्राणिन इति भवः संसारः । किंकृतोऽयम्? इत्याह-अणाइकम्मसंजोगणिव्वत्तिए, अनादिकर्मसंयोगनिर्वर्त्तितः । अनादिश्चासौ कर्मसंयोगश्च, तत्कृत इत्यर्थः । नान्यथा कर्मसंयोगः, मुक्तस्येव केवलस्य तदयोगात्, अहेतुकत्वापत्तेः । कृतकत्वेऽपि प्रवाहतस्तथाविधकालवत् अनादित्वाविरोधात् ।

अयमेव विशेष्यते—दुक्खरूवे दुक्खफले दुक्खाणुबंधे, दुःखरूपो दुःखफलो दुःखानुबन्धः । तत्र दुःखरूपः, जन्म-जरा-मरण-रोग-शोकरूपत्वात्, एतेषां च दुःखत्वात् । तथा दुःखफलः, गत्यन्तरेऽपि जन्मादिभावात् । तथा दुःखानुबन्धः, अनेकभववेदनीयकर्मावहत्वात् ।

कस्तर्ह्यस्य प्रतीकारः? इत्याह—

**एयस्स णं वोच्छित्ती सुद्धधम्माओ । सुद्धधम्मसंपत्ती पावकम्मविगमाओ । पावकम्मविगमो तहाभव्वत्तादिभावाओ ।**

एयस्स णं वोच्छित्ती सुद्धधम्माओ । एतस्य भवस्य, णं इति वाक्यालंकारे, व्यवच्छित्तिः उच्छित्तिः शुद्धधर्मात् ज्ञान-दर्शन-चारित्ररूपात् औचित्येन सातत्य-सत्कार-विधिसेवितात् । अयं च श्रावकादेरप्यभिग्रहपालनेन ज्ञेयः, अभिग्रहभावस्य सातत्येन भावादिति ।

शुद्धधर्मसंप्राप्तिः कुतः? इत्याह-सुद्धधम्मसंपत्ती पावकम्मविगमाओ । शुद्धधर्मो यथोदितः । तस्य सम्यक् प्राप्तिः संप्राप्तिः भावप्राप्तिरित्यर्थः । पापं कर्म मिथ्यात्वमोहनीयादि, तस्य विगमो विशिष्टो गमः, अपुनर्बन्धकत्वेन पृथग्भाव इति यावत्, तस्मात् पापकर्मविगमात् ।

अयं पुनः कुत इत्याह—पावकम्मविगमो तहाभव्वत्तादिभाव(वा)तो ।

---

१ °शक्तासिद्धेः H. ॥ २ तुला-"अभ्यास-वैराग्याभ्यां तन्निरोधः ॥१२॥ तत्र स्थितौ यत्नोऽभ्यासः ॥१३॥ स तु दीर्घकाल-नैरन्तर्य-सत्कारासेवितो दृढभूमिः ॥१४॥" इति पातञ्जलयोगदर्शने प्रथमे समाधिपादे ॥ ३ इत आरभ्य महा० [पृ० ७ पं. १२] पर्यन्तः पाठे H मध्ये नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पापकर्मविगमः यथोदितः, तथाभव्यत्वादिभावात् । भव्यत्वं नाम सिद्धिगमनयोग्यत्वमनादिपारिणामिको भावः । तथाभव्यत्वमिति विशिष्टमेतत्, कालादिभेदेनात्मनां बीजसिद्धिभावात् । आदिशब्दात् काल-नियति-कर्म-पुरुषकार[1]परिग्रहः । साध्यव्याधिकल्पत्वात् ।

तथाभव्यत्वस्य विपाकसाधनान्याह—

**तस्स पुण विवागसाहणाणि—चउसरणगमणं, दुक्कडगरिहा, सुक्कडासेवणं[2]। अओ कायव्वमिणं[3] होउकामेणं सया सुप्पणि[4]-हाणं, भुज्जो भुज्जो संकिलिसे, तिकालमसंकिलिसे ।**

**तस्स पुण विवागसाधणाणि**, तस्य पुनः तथाभव्यत्वस्य **विपाक-साधनानि** अनुभावकारणानि । कानि तानि ? इत्याह—**चतुसरणगमणं**, चतुर्णामर्हत्-सिद्ध-साधु-केवलिप्रज्ञप्तधर्माणां **शरणगमनं** प्रधानशरणोपगम इत्यर्थः । महानयं प्रत्यपाये[5] परिरक्षणोपायः ।

तथा **दुक्कडगरहा**, दुष्कृतेष्विह-परभव[6]कृतेषु गर्हा अकर्त्तव्यबुद्धिसारा परसाक्षिकी तथानिवेदनाप्रतिपत्तिर्[7]दुष्कृतगर्हा । अप्रतिहतेयं कर्मानुबन्धापनयने इति कर्त्तव्या ।

तथा **सुकडासेवणं**, सुकृतस्य सति विवेके नियतभाविनो[8]ऽखण्डभाव-सिद्धेः परकृतानुमोदनरूपस्यासेवनं सुकृतासेवनम्[9]। महदेतत् कुशलाशय[10]निबन्धन-मिति परिभावनीयम् । कृत-कारिता-ऽनुमतिभेदभिन्ने हि पुण्य-पापे । एभिस्तत्तथा-स्वाभाव्यात् साध्यव्याधिवत् तथाभव्यत्वं परिपाच्यते इति ।

---

१ ०कारपरि० Aसं. B । "कालो सहाव नियई पुव्वकयं पुरिसकारणेगंता । मिच्छत्तं ते चेव उ समासओ होंति सम्मत्तं ॥१६४॥" इति उपदेशपदे ॥ २ सुक्कडा० K1 ॥ ३ ०मिणंति होउ० S.॥ ४ सुपणि० K1 ॥ ५ प्रत्यपायपरि० H. विना ॥ ६ ०भवगतेषु H. विना ॥ ७ तथा निवेदना प्रतिपत्ति० इत्यपि पदच्छेदोऽत्र भवेत् ॥ ८ नियमभा० H. । नियभा० Sमू., नियतभा० Sसं. ॥ ९ सुकृतासेवनम् H. विना नास्ति ॥ १० कुशलनिबन्ध० H. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत एवम् **अओ कायव्वमिणं होउकामेणं** । यस्मादुक्तवदधिकृततत्त्वसिद्धिः **अतः** अस्मात् कारणात् **कर्त्तव्यम् इदं** वक्ष्यमाणं **भवितुकामेन** मोक्षार्थिना भव्यसत्त्वेन । कथं कर्त्तव्यम् ? इत्याह–**सया सुप्पणिहाणं** । **सदा** सर्वकालं **सुप्रणिधानम्**, शोभनेन प्रणिधानेन नात्र कालो नियम्यते, किन्तु सुप्रणिधानमिति, यदा यदा क्रियते तदा तदा सुप्रणिधानं कर्त्तव्यमित्यर्थः । सुप्रणिधानस्य फलसिद्धौ प्रधानाङ्गत्वात् । उक्तं च–

> प्रणिधानकृतं कर्म मतं तीव्रविपाकवत् ।
> सानुबन्धनियमाच्छुभांशाच्चैतदेव तत् ॥ [ ]

इत्थं चैतदङ्गीकर्त्तव्यम् इत्याह– **भुज्जो भुज्जो संकिलेसे**, कर्त्तव्यमिदं **भूयो भूयः** पुनः पुनः **संक्लेशे** सति तीव्ररागादिसंवेदनरूपे,अरतावुत्पन्नायामिति यावत् । तथा **तिकालमसंकिलिसे** । **त्रिकालं** त्रिसन्ध्यं कर्त्तव्यमिदम् **असंक्लेशे** प्रकृत्या कालगमने सति ।

यत् कर्त्तव्यं तदाह–

# [२]जावज्जीवं मे भगवंतो परमतिलोगणाहा अणुत्तरपुण्णसंभारा [३]खीणरागदोसमोहा अचिंतचिंतामणी भवजलहिपोया एगंतसरण्णा अरहंता सरणं ।

**जावज्जीवं मे भगवंतो अरहंता सरणं** इति योगः । **यावज्जीवं** यावज्जीवितं **मे** मम **भगवन्तः** समग्रैश्वर्यादियुक्ताः **अर्हन्तः शरणम्** इति योगः । अत्र 'यावज्जीवम्' इति कालपरिमाणं परतो भङ्गभयात्, [४]न पुनरवधित्वेन, परतोऽप्यधिकृतशरणस्येष्टत्वात्[५] ।

**एत एव** विशेष्यन्ते–**परमतिलोगनाहा**, परमाश्च ते दुर्गतिभयसंरक्षणेन त्रिलोकनाथाश्च, अत्र [६]त्रिलोकग्रहणेन त्रिलोकवासिनो देवादयः परिगृह्यन्ते ।

---

१ इत आरभ्य **काल०** [पृ० ८ पं. १९] इतिपर्यन्तम् एकं पत्रं H. मध्ये नास्ति ॥ २ **जावजीवं** K 1. K. ॥ ३ **०रागद्दोस०** K1 ॥ ४ **न** H. विना नास्ति ॥ ५ **०शरणत्वेनस्यष्टत्वात्** H. । अत्र H. अनुसारेण 'अधिकृतशरणत्वे**नास्येष्टवात्**' इत्यपि पाठः संभवेत् ॥ ६ **त्रिलोकग्रहणेन** S.H. विना नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत एव विशेष्यन्ते–अणुत्तरपुण्णसंभारा । अनुत्तरः सर्वोत्तमहेतूत्कर्षात् पुण्यसंभारः तीर्थकरनामकर्मलक्षणो येषां ते तथा ।

त एव विशेष्यन्ते–खीणरागदोसमोहा । क्षीणा राग-द्वेष-मोहा अभिष्वङ्गा-ऽप्रीत्यज्ञानलक्षणा येषां ते तथा ।

त एव विशेष्यन्ते–अचिंतचिंतामणी । अचिन्त्यचिन्तामणयः, चिन्तातिक्रान्तापवर्गविधायकत्वेन ।

त एव विशेष्यन्ते–भवजलहिपोया । भवजलधिपोताः, तदुत्तारकत्वेन ।

त एव विशेष्यन्ते–एगंतसरण्णा । एकान्तशरण्याः, सर्वाश्रितहितत्वेन ।

क एवंभूताः ? कि वा एते ? इत्याह–अरहंता सरणं, अर्हन्तः शरणम् । तत्राशोकाद्यष्टमहाप्रातिहार्यलक्षणां[2] पूजामर्हन्तीत्यर्हन्तः, ते मम शरणमाश्रय इति ।

## तहा पहीणजरामरणा अवेयकम्मकलंका पणट्ठवाबाहा केवलनाणदंसणा सिद्धिपुरवासी णिरुवमसुहसंगया सव्वहा कयकिच्चा सिद्धा सरणं ।

तहा पहीणजरामरणा सिद्धा सरणं इति योगः । तथा न केवलमर्हन्तः, किन्तु[3] सिद्धाः शरणमिति क्रिया ।

किंविशिष्टास्ते ? इत्याह–प्रक्षीणजरा-मरणाः । प्रक्षीणे सदाऽपुनर्भावित्वेन जरा-मरणे येषां ते तथा, जन्मादिबीजाभावात् ।

एत एव विशेष्यन्ते–अवेयकम्मकलंका । अपेतकर्मकलङ्काः, अपेतः कर्मकलङ्को येषां ते तथाविधाः, सर्वथा[4] कर्मरहिता इत्यर्थः ।

एत एव विशेष्यन्ते–पणट्ठवाबाहा । प्रनष्टव्याबाधाः[5], प्रकर्षेण नष्टा क्षीणा व्याबाधा येषां ते तथा, सर्वव्याबाधावर्जिता इति भावः ।

एत एव विशेष्यन्ते–केवलनाणदंसणा । केवलज्ञानदर्शनाः, केवले संपूर्णे ज्ञानदर्शने येषां ते तथाविधाः, सर्वज्ञाः सर्वदर्शिन इत्यर्थः[6] ।

---

१ त एव S.॥ २ ०हार्याविल० H.॥ ३ किन्तु H. नास्ति । ४ सर्वकर्मरहिता H.॥ ५ प्रणष्ट० H. विना । "नशः शः १२।३।७८। अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात्परस्य नशेः शकारान्तस्य संबन्धिनो नकारस्य णो भवति ॥" इति सिद्धहेमबृहद्वृत्तौ ॥ ६ इत्यर्थः H.॥

२

एत एव विशेष्यन्ते—**सिद्धिपुरवासी**, सिद्धिपुरवासिनः, सिद्धिपुरे लोकान्ते वस्तुं[1] शीलं येषां ते तथा, मुक्तिवासिन इति गर्भः ।

एत एव विशेष्यन्ते—**णिरुवमसुहसंगया** । निरुपमसुखसङ्गताः, निरुपमसुखेनाविद्यमानोत्प्रेक्षेण[2] संगता इति समासः । असांयोगिकानन्दयुक्ता इत्यर्थः ।

एत एव विशेष्यन्ते—**सव्वहा कयकिच्चा** । सर्वथा कृतकृत्याः, सर्वथा सर्वप्रकारैः कृतं कृत्यं यैस्ते तथा, निष्ठितार्था इति भावः ।

क एवंभूताः ? किं वा एते ? इत्याह—**सिद्धा सरणं**, सिद्धाः शरणम्, सिद्ध्यन्ति स्म सिद्धाः परमतत्त्वरूपाः, ते मम शरणमाश्रय इति ।

## तहा पसंतगंभीरासया सावज्जजोगविरया पंचविहायारजाणगा[3] परोवयारनिरया[4] पउमाइणिदंसणा झाणज्झयणसंगया विसुज्झमाणभावा साहू[5] सरणं ।

**तहा पसंतगंभीरासया** '**साहू सरणं**' इति योगः । तथा न केवलं सिद्धाः शरणम्, किन्तु साधवः शरणमिति क्रिया । किंविशिष्टास्ते ? इत्याह - **प्रशान्तः** क्षान्तियोगात् गम्भीरोऽगाधतया[6] आशयश्चित्तपरिणामो येषां ते प्रशान्तगम्भीराशयाः ।

एत[7] एव विशेष्यन्ते—**सावज्जजोगविरया** । सहावद्येन सावद्यः सपापो योगो व्यापारः कृतादिरूपः, तस्माद्विरताः सावद्ययोगविरताः ।

एत[8] एव विशेष्यन्ते—**पंचविहायारजाणगा** । पञ्चविधमाचारं[9] ज्ञानाचारादिभेदभिन्नं जानते इति पञ्चविधाचारज्ञाः ।

एत[10] एव विशेष्यन्ते—**परोवयारनिरया** । परोपकारे ए(ऐ)कान्तिकात्यन्तिकरूपे निरताः परोपकारनिरताः ।

---

१ वसितुं H. ॥ २ ०नोत्प्रेक्षण H. । ०नापेक्षण S. । ०नापेक्षेण H.S. विना ॥ ३ ०वगार० S. ॥ ४ ०माय० K1 ॥ ५ साधू S. ॥ ६ गंभीरो भावनया H. । गंभीरो भतया Sमू० । गंभीरो[ऽ?]भयतया Sसं., । गंभीराशयतया Sसं. ॥ ७ त एव H. ॥ ८ त एव H, S. ॥ ९ ०धाचारं ज्ञाना० H. ॥ १० त एव H. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत[1] एव विशेष्यन्ते–**पउमाइनिदंसणा** । पद्मादीनि पङ्कोत्पत्ति[2]-जलस्थिति-भावेऽपि तदस्पर्शनेन कामभोगापेक्षयै[3]वमेव भाव इति निदर्शनानि येषां ते पद्मादिनिदर्शनाः, आदिशब्दाच्छरत्सलिला[4]दिग्रहः ।

एत एव विशेष्यन्ते–**झाणज्झयणसंगया** ध्याना-ऽध्ययनाभ्यां एकाग्र[5]-चिन्तानिरोध-स्वाध्यायलक्षणाभ्यां संगताः ध्याना-ऽध्ययनसंगताः ।

एत एव विशेष्यन्ते–**विसुज्झमाणभावा** । विशुध्यमानो विहितानुष्ठानेन भावो येषां ते विशुध्यमानभावाः ।

क एवंभूताः ? किं वा एते ? इत्याह **साहू सरणं** । तत्र सम्यग्दर्शनादिभिः सिद्धिं साधयन्तीति साधवः, मुनय इत्यर्थः । ते मम **शरणमाश्रय** इति ।

**तहा सुरासुरमणुयपूइओ[6], मोहतिमिरंसुमाली, रागदोसविसपरममंतो, हेऊ सयलकल्लाणाणं, कम्मवणविहावसू, साहगो सिद्धभावस्स, केवलिपण्णत्तो धम्मो जावज्जीवं मे भगवं सरणं ॥**

**तहा सुरासुरमणुयपूजिओ 'केवलिपण्णत्तो धम्मो जावज्जीवं मे भगवं सरणं'** इति[7] योगः ।

**तथा न केवलं साधवः शरणम्, किन्तु केवलिप्रज्ञप्तो धर्म** इति[8] **संबन्धः** ।

---

१ **त एव** H. ॥ २ **०त्पन्नजल०** H. । तुला–"पुरुषवरपुण्डरीकेभ्यः इति । पुरुषाः पूर्ववत्, ते वरपुण्डरीकाणीव संसारजलासङ्गादिना धर्मकलापेन पुरुषवरपुण्डरीकाणि । यथा पुण्डरीकाणि पङ्के जातानि जले वर्धितानि तदुभयं विहाय वर्तन्ते प्रकृतिसुन्दराणि च भवन्ति, निवासो भुवनलक्ष्म्याः, आयतनं चक्षुराद्यानन्दस्य, प्रवरगुणयोगतो विशिष्टतिर्यग्नरामरैः सेव्यन्ते सुखहेतूनि भवन्ति च, तथैतेऽपि भगवन्तः कर्मपङ्के जाताः दिव्यभोगजलेन वर्धिताः उभयं विहाय वर्तन्ते, सुन्दराश्चातिशययोगेन, निवासो गुणसम्पदः, हेतवो दर्शनाद्यानन्दस्य केवलादिगुणभावेन भव्यसत्त्वैः सेव्यन्ते, निर्वाणनिबन्धनं च जायन्ते" इति **ललितविस्तरायाम्** ॥ ३ **कामलोकापेक्ष०** Sमू. । **कामनालवापक्ष०** H. । (कामजलापेक्ष० ?) ॥ ४ **०दिपरिग्रहः** H. ॥ ५ "उत्तमसंहननस्य एकाग्रचिन्तानिरोधो ध्यानम् ॥९।२८॥" इति **तत्त्वार्थसूत्रे** ॥ ६ **पूईओ०** K1 ॥ ७ **इति योगः इति सम्बन्धः** H. ॥ ८ **इति योगः इति सम्बन्धः** H. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किंविशिष्टः? इत्याह–सुरासुरमनुजैः पूजितः सुरासुरमनुजपूजितः। सुरा ज्योतिष्क-वैमानिकाः। असुरा व्यन्तर-भवनपतयः। मनुजाः पुरुष-विद्याधराः।

अयमेव विशेष्यते–मोहतिमिरंसुमाली। मोहस्तिमिरमिव मोहतिमिरं सद्भावावारकत्वेन, तस्यांशुमालीवांशुमाली, तदपनयनादादित्यकल्पः।

अयमेव विशेष्यते–रागदोसविसपरममंतो। राग-द्वेषौ विषमिव राग-द्वेषविषम्, तस्य परममन्त्रः, तद्घातित्वेनेति भावः।

अयमेव विशेष्यते–हेऊ सयलकल्लाणाणं। हेतुः कारणं प्रवर्त्तकत्वादिना सकलकल्याणानां सुदेवत्वादीनाम्।

अयमेव विशेष्यते–कम्मवणविहावसू। कर्मवनस्य ज्ञानावरणीयादिसमुदयरूपस्य विभावसुरिवाग्निरिव, तद्दाहकत्वेन।

अयमेव विशेष्यते–साहगो सिद्धभावस्स। साधकः निर्वर्तकः सिद्धभावस्य सिद्धत्वस्य, तथा[3] तत्संपादकत्वेन।

कोऽयमेवं किं वेत्याह–केवलिपण्णत्तो धम्मो। केवलिप्रज्ञप्तः केवलिप्ररूपितः धर्मः श्रुतादिरूपः जावज्जीवं मे भगवं, 'यावज्जीवम्' इति पूर्ववत् मे मम भगवान् समग्रैश्वर्यादिगुणयुक्तः शरणम् आश्रयः।

एतच्चतुःशरणगमनम् एकार्थसाधकत्वेन प्रभूतानामप्यविरुद्धमेव। अत एव पारमार्थ(र्ष)म्–

[5]चत्तारि सरणं पवज्जामि–अरहंते सरणं पवज्जामि, सिद्धे सरणं पवज्जामि, साहू सरणं पवज्जामि, केवलिपण्णत्तं धम्मं सरणं पवज्जामि [आव. ४] [2]इति।

---

१ समुदायस्य H. ॥ २ तथा तथा (त)संपादकत्वेन S. ॥ ३ आश्रय इति। चतुःशरणगमनम् H. ॥ ४ अत्र 'पारमर्षम्' इत्यपि पाठो भवेत्। 'परमार्षम्' इति पाठे तु 'परमं च तदार्षं च' इति विग्रहः कार्यः ॥ ५ "चत्वा(तु)रः संसारभयपरित्राणाय 'शरणं प्रपद्ये' आश्रयं गच्छामि भेदेन तानुपदर्शयन्नाह–'अरिहंते'त्यादि, 'अर्हतः शरणं प्रपद्ये' सांसारिकदुःखशरणायार्हत आश्रयं गच्छामि, भक्तिं करोमीत्यर्थः, एवं सिद्धान् शरणं प्रपद्ये, साधून् शरणं प्रपद्ये, केवलिप्रज्ञप्तं धर्मं शरणं प्रपद्ये ॥" इति आवश्यकसूत्रस्य हरिभद्रसूरिविरचितायां वृत्तौ ॥ ६ इति नास्ति H. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चतुःशरणगमनानन्तरं दुष्कृतगर्होक्ता । तामाह सरणमुवगओ य एएसिमित्यादिना–**

**सरणमुवगओ य[1] एएसिं गरिहामि दुक्कडं–जण्णं अरहंतेसु वा, सिद्धेसु वा, आयरिएसु वा, उवज्झाएसु वा, साहूसु वा, साहुणीसु वा, अन्नेसु वा धम्मट्ठाणेसु माणणिज्जेसु पूयणिज्जेसु, तहा माईसु वा, पिईसु वा, बंधूसु वा, मित्तेसु वा, उवयारीसु वा, [2]ओहेण वा जीवेसु, मग्गट्ठिएसु, अमग्गट्ठिएसु, मग्गसाहणेसु, अमग्गसाहणेसु, जं किंचि वितहमायरियं अणायरियव्वं अणिच्छियव्वं पावं पावाणुबंधि सुहमं वा बायरं वा मणेण वा वायाए वा काएण वा कयं वा कारियं वा अणुमोइयं[3] वा रागेण वा दोसेण वा मोहेण वा, एत्थ वा जम्मे जम्मंतरेसु वा, गरहियमेयं दुक्कडमेयं उज्झियव्वमेयं, विआणियं मए कल्लाणमित्तगुरुभयवंतवयणाओ, एवमेयं ति रोइयं सद्धाए, अरहंत-सिद्धसमक्खं गरहामि अहमिणं 'दुक्कडमेयं उज्झियव्वमेयं'। एत्थ मिच्छामि दुक्कडं, मिच्छामि दुक्कडं, मिच्छामि दुक्कडं।**

[4]**शरणमुपगतश्च सन्नेतेषामर्हदादीनां गर्हे दुष्कृतम्** । किंविशिष्टम् ? इत्याह–**जं णं अरहंतेसु वा** इत्यादि । **यत्** इति दुष्कृतनिर्देशः, **णं** इति वाक्यालङ्कारे । **अर्हत्सु वा** अर्हद्विषयं वा । एवं **सिद्धेषु वा, आचार्येषु वा**

---

१ **य** नास्ति S. ॥ २ **ओघेण** K 1. ॥ ३ **अणुमोईयं** K1. ॥ ४ "**पापप्रतिघातगुणबीजाधानसूत्रे हरिभद्र**सूरिभिरप्येतद्भवसम्बन्धि भवान्तरसम्बन्धि वा पापं यत्–तत्पदाभ्यां परामृश्य मिथ्यादुष्कृतप्रायश्चित्तेन विशोधनीयमित्युक्तम् । तथाहि–"सरणमुवगओ अ एएसिं गरिहामि दुक्कडं । जण्णं अरहंतेसु वा सिद्धेसु वा आयरिएसु वा उवज्झाएसु वा साहूसु वा साहुणीसु वा अन्नेसु वा धम्मट्ठाणेसु माणणिज्जेसु पूअणिज्जेसु तहा माईसु वा पिईसु वा बन्धूसु वा मित्तेसु वा उवयारिसु वा ओहेण वा जीवेसु मग्गट्ठिएसु वा अमग्गट्ठिएसु वा मग्गसाहणेसु वा अमग्गसाहणेसु वा जं किंचि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उपाध्यायेषु वा, साधुषु वा, साध्वीषु वा, अन्येषु वा धर्मस्थानेषु** सामा[1]न्येन गुणाधिकेषु, **माननीयेषु पूजनीयेषु । तथा मातृषु वा, पितृषु वा,** अनेकजन्मापेक्षं बहुवचनम् । **बन्धुषु वा, मित्रेषु वा, उपकारिषु वा, ओघेन वा जीवेषु, मार्गस्थितेषु** सम्यग्दर्शनादियुक्तेषु, **अमार्गस्थितेषु** एतद्विपरीतेषु,**मार्गसाधनेषु** पुस्तकादिषु, **अमार्गसाधनेषु**, खड्गादिषु, **यत्किञ्चिद् वितथमाचरितं** अविधिपरिभो[2]गादि । **अनाचरितव्यं** क्रियया । **अनेष्टव्यं** मनसा । **पापं** पापकारणत्वेन, **पापानुबन्धि**, तथाविपाकभावेन । **सूक्ष्मं वा बादरं वा** स्वरूपतः । कथमेतदाचरितम् ? इत्याह–**मनसा [4]वा वाचा वा कायेन वा ।** कृतं वात्मना १ । **कारितं** वान्यैः २ । **अनुमोदितं** वा परकृतम् ३ । **एतदपि रागेण वा द्वेषेण वा मोहेन वा । अत्र वा जन्मनि, जन्मान्तरेषु वा** अतीतेषु । **गर्हितमेतत्** कुत्सास्पदम् । **दुष्कृतमेतत्** सद्धर्मबाह्यत्वेन । **उज्झितव्यमेतत्** हेयतया । **विज्ञातं मया कल्याणमित्रगुरुभगवद्वचनात्** । भगवद्वचनप्राप्तौ प्राय इयमानुपूर्वीत्येवमुपन्यासः । **एवमेतदिति रोचितं श्रद्धया** तथाविधकर्मक्षयोपशमजया । ततः किम् ? इत्याह–**अर्हत्सिद्धसमक्षं** तां[6]नधिकृत्य **गर्हेऽहमिदं** कुत्सामीत्यर्थः । कथम् ? इत्याह–

---

वितहमायरिअं अणायरिअव्वं अणिच्छिअव्वं पावं पावाणुबंधि सुहुमं वा बायरं वा मणेणं वा वायाए वा काएणं वा कयं वा काराविअं वा अणुमोइअं वा रागेण वा दोसेण वा मोहेण वा इत्थं वा जम्मे जम्मन्तरेसु वा गरहियमेयं दुक्कडमेयं उज्झियव्वमेअं वियाणिअं मए कल्लाणमित्त-गुरुभगवंतवयणाओ एवमेअं ति रोइअं सद्धाए अरहंतसिद्धसमक्खं गरहामि अहमिणं दुक्कडमेअं उज्झियव्वमेअं इत्थ मिच्छामि दुक्कडं ३ ।" एतद्व्याख्या यथा–चतुःशरणगमनान्तरं दुष्कृतगर्होक्ता, तामाह–शरणमुपगतश्च सन्नेतेषामर्हदादीनां गर्हे दुष्कृतम् । किंविशिष्टम् ? इत्याह–जण्णं अरहंतेसु वा इत्यादि, अर्हदादिविषयमोघेन वा जीवेषु मार्गस्थितेषु सम्यग्दर्शनादियुक्तेषु, अमार्गस्थितेषु एतद्विपरीतेषु, मार्गसाधनेषु पुस्तकादिषु, अमार्गसाधनेषु खड्गादिषु, यत्किंचिद्वितथमाचरितम् अविधिपरिभोगादि, अनाचरितव्यं क्रियया, अनेष्टव्यं मनसा, पापम् पापकारणत्वेन, पापानुबन्धि तथा विपाकभावेन, गर्हितमेतद् कुत्साऽऽस्पदम् , दुष्कृतमेतद् धर्मबाह्यत्वेन, उज्झितव्यमेतद् हेयतया, विज्ञातं मया कल्याणमित्रगुरुभगवद्वचनाद्, एवमेतद् इति रोचितं श्रद्धया तथाविधक्षयो-पशमजया, अर्हत्सिद्धसमक्षं गर्हे, कथम् ? इत्याह–दुष्कृतमेतद् , उज्झितव्यमेतद् । अत्र व्यतिकरे 'मिच्छामिदुक्कडं' वारत्रयं पाठः । इति **यशोविजय**वाचकविरचितायां **धर्मपरीक्षास्वोपज्ञवृत्तौ** पृ० २३–२४ ॥ ५ **इत्यादिना दुष्कृतनिर्देशः** H. ॥

१ **सामान्येषु गुणा°** H. ॥ २ **°गादिना अना°** H. S. विना ॥ ३ "अनिच्छाविषयतया कर्तव्यमित्यर्थः" Aटि० ॥ ४ **मनसा वा वाचा कायेन वा** S. । **मनसा वाचा वा कायेन वा** A. B. । **मनसा वाचा कायेन वा** H. ॥ ५ **तद्धर्म°** H. ॥ ६ **तामधि°** H. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुष्कृतमेतत् उज्झितव्यमेतत् । अत्र व्यतिकरे मिच्छामि दुक्कडं ३, वारात्रयं पाठः । व्याख्या चास्य अर्थविशेषत्वात् प्राकृताक्षरैरेव न्याय्या, निर्युक्तिकारवचनप्रामाण्यात् । आह च निर्युक्तिकारः-

मि त्ति मिउमद्दवत्ते छ त्ति य दोसाण छायणे होइ ।
मि त्ति य मेराए ठिओ दु त्ति दुगंछामि अप्पाणं ॥
क त्ति कडं मे पावं ड त्ति य डेवेमि तं उवसमेणं ।
एसो मिच्छादुक्कडपयक्खरत्थो समासेणं ॥ [आव० नि० ६८६-६८७]

अत्रैतत् सुन्दरत्वात्सम्यगभिमन्यमान आह-

## होउ मे एसा सम्मं गरहा । होउ मे अकरणनियमो ।

---

१ वार ? Aसं० ॥ २ H विना–व्याख्या स्यार्थ° Sमू० । व्याख्यास्यास्यार्थ° Sसं० । व्याख्यास्यार्थ० A. B. ॥ ३ "कः पुनरस्य मिथ्यादुष्कृतपदस्यार्थ इत्याशङ्क्याह—

मि त्ति मिउमद्दवत्ते छ त्ति य दोसाण छायणे होइ ।
मि त्ति य मेराएँ ट्ठिओ उ दु त्ति दुगुंछामि अप्पाणं ॥६८६॥

व्याख्या—'मी'त्येवं वर्णः मृदुमार्दवत्वे वर्त्तते, तत्र मृदुत्वं–कायनम्रता मार्दवत्वं–मानननम्रतेति 'छे'ति च दोषस्य असंयमयोगलक्षणस्य छादने स्थगने भवति, 'मी'ति चायं वर्णः मर्यादायां चारित्ररूपायां स्थितोऽहमित्यस्यार्थस्याभिधायकः 'दु' इत्ययं वर्णः जुगुप्सामि निन्दामि दुष्कृतकर्मकारिणमात्मानमित्यस्मिन्नर्थे वर्त्तत इति गाथार्थः ॥

कत्ति कडं मे पावं डत्ति य डेवेमि तं उवसमेणं ।
एसो मिच्छादुक्कडपयक्खरत्थो समासेणं ॥६८७॥दारं॥

व्याख्या – 'क' इत्ययं वर्णः कृतं मया पापमित्येवमभ्युपगमार्थे वर्त्तते, 'ड' इति च 'डेवेमि तं'ति लङ्घयामि–अतिक्रमामि तत् , केनेत्याह–उपशमेन हेतुभूतेन, 'एषः' अनन्तरोक्तः प्राकृतशैल्या मिथ्यादुष्कृतपदस्याक्षरार्थ इति 'समासेन' संक्षेपेणेति गाथार्थः ॥ आह–कथमक्षराणां प्रत्येकमुक्तार्थतेति, पदवाक्ययोरेवार्थदर्शनादिति, अत्रोच्यते, इह यथा वाक्यैकदेशत्वात्पदस्यार्थोऽस्ति तथा पदैकदेशत्वाद्वर्णार्थोऽप्यवसेय इति, अन्यथा पदस्याप्यर्थशून्यत्वप्रसङ्गः, प्रत्येकमक्षरेषु तदभावादिति, प्रयोगश्च–इह यद् यत्र प्रत्येकं नास्ति तत् समुदायेऽपि न भवति, प्रत्येकमभावात् , सिकतातैलवदिति, इष्यते च वर्णसमुदायात्मकस्य पदस्यार्थः, तस्मात्तदन्यथाऽनुपपत्तेर्वर्णार्थोऽपि प्रतिपत्तव्य इत्यलं प्रसङ्गेनेति द्वारम् २ ।" इति **आवश्यकनिर्युक्तेर्हरिभद्रसूरिविरचितायां वृत्तौ** ॥ ४ अत्र S. मध्ये **०सम्यगिति मन्यमान** इति केनचित् संशोधितः पाठो वर्तते, स च सुन्दरतरोऽपि भाति, तथापि S. मध्ये पूर्वं **०सम्यगभिमन्यमान** इति पाठ एव आसीत् , अन्येष्वपि सर्वेषु हस्तलिखितादर्शेषु **०सम्यगभिमन्यमान** इत्येव पाठ उपलभ्यते, अतः स एव पाठोऽत्र मूले स्थापितोऽस्माभिः ॥ ५. गरिहा S. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बहुमयं[१] ममेयं ति इच्छामि अणुसट्ठिं[२] अरहंताणं[३] भगवंताणं गुरूणं कल्लाणमित्ताणं ति[४] । होउ मे एएहिं संजोगो । होउ मे एसा सुपत्थणा । होउ मे एत्थ बहुमाणो । होउ मे इओ[५] मोक्खबीयं[६] ।**

होउ मे एसा सम्मं गरहेत्यादि । भवतु मम एषा अनन्तरोदिता सम्यग्गर्हा भावरूपा । भवतु मे अकरणनियमः ग्रँन्थिभेदवत्तद्बन्धरूपः, गर्हाविषय इति सामर्थ्यम् । बहुमतं ममैतद् द्वयम् इत्यस्मादिच्छामि अनुशास्तिम् उदितप्रपञ्चबीजभूताम् । केषाम् ? इत्याह–अर्हतां भगवताम्, तथा गुरूणां कल्याणमित्राणामिति । प्रतिपन्नतत्त्वानां गुणाधिकविषयैव प्रवृत्तिर्न्याय्या इत्येवमुपन्यासः ।

प्रणिध्यन्तरमाह–होउ मे एएहिं संयोगो । भवतु मम एभिः अर्हदादिभिः संयोगः, उचितो योग इत्यर्थः । भवतु ममैषा सुप्रार्थना अर्हदादिसंयोगविषया । भवतु ममात्र बहुमानः प्रार्थनायाम् । भवतु मम इतः प्रार्थनातो मोक्षबीजं सुवर्णघटसंस्थानीयं प्रवाहतः कुशलानुबन्धि कर्मेत्यर्थः ।

**पत्तेसु एएसु अहं सेवारिहे सिया, आणारिहे सिया, पडिवत्तिजुत्ते सिया, निरइआरपारगे सिया ।**

---

१. ०मयमेयं ति K1 ॥ २. अणुसिट्ठिं K. ॥ ३. अरुहंताणं K1 ॥ ४. ति नास्ति S.॥ ५. इय K ॥ ६. ०बीअं ति C D. ॥ ७. "न खलु भिन्नग्रन्थेर्भूयस्तद्बन्धः" इति ललितविस्तरायाम् । "न खलु नैव भिन्नग्रन्थेः सम्यक्त्ववतो भूयः पुनः तद्बन्धः ग्रन्थिबन्धः" इति मुनिचन्द्रसूरिविरचितायां ललितविस्तरापञ्जिकायाम् ॥ ८. घटस्थानीयं S. ।

"एईए उ विसिट्ठं सुवन्नघडतुल्लमिह फलं नवरं ।
अणुबंधजुयं संपुन्नहेउओ सम्ममवसेयं ॥२५०॥

एतस्याः पुनः–सुक्रियायाः सकाशाद् विशिष्टम्–अपरक्रियाजन्यपुण्यविलक्षणम् । अत एवाह–सुवर्णघटतुल्यं–शातकुम्भकुम्भसन्निभमिह–जगति फलं–पुण्यलक्षणं नवरं–केवलं जायते अनुबन्धयुतम्–उत्तरोत्तरानुगमरूपवत् । कुत इत्याह–'सम्पूर्णहेतुतः' सम्पूर्णेभ्यो हेतुभ्यो भावाद्, हेतवश्चास्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राणिकरुणादयः । यथोक्तम्—"दया भूतेषु संवेगो विधिवद् गुरुपूजनम् । विशुद्धा शीलवृद्धिश्च पुण्यं पुण्यानुबन्ध्यदः ॥१॥" सम्यग्–यथावद् अवसेयमिदम् । न हि पूणकारणारब्धा भावाः कदाचिद् निरनुबन्धा भवितुमर्हन्ति, अन्यथा तत्तयाऽनुपपत्तेः ॥२४०॥

ननु क्रियामात्रमप्याज्ञाबहुमानशून्यानां कथं ज्ञायते ? इत्याशंक्याह;—

**किरियामेत्तं तु इहं जायति लद्धादवेक्खयाए वि ।**
**गुरुलाघवादिसन्नाणवज्जियं पायमियरेसिं ॥२४१॥**

क्रियामात्रं पुनरुक्तरूपमिह–दूरभव्येष्वभव्येषु च जायते लब्ध्याद्यपेक्षयापि, इह लब्धिर्वस्त्रपात्रकीर्त्यादिलाभलक्षणा गृह्यते, आदिशब्दात् स्वजनाद्यविरोधकुललज्जादिग्रहः, तान्यप्यपेक्ष्य स्यात् । गुरुलाघवादिसंज्ञानवर्जितं, गुणदोषयोः प्रवृत्तौ गुरुलाघवमादिशब्दात् सत्त्वादिषु मैत्र्यादिभावग्रहस्तेषु यत्संज्ञानं शुद्धसंवेदनरूपं तेन विनिर्मुक्तं प्रायो बाहुल्येनेतरेषां शुद्धाज्ञाबहुमानविहीनानामिति ॥२४१॥

**एत्तो उ निरणुबंधं मिम्मयघडसरिसमो फलं णेयं ।**
**कुलडादियदाणाइसु जहा तहा हंत एयंपि ॥२४२॥**

इतस्तु–क्रियामात्रात् पुनर्निरनुबन्धम्–उत्तरोत्तरानुबन्धशून्यम्, अत एव 'मिम्मयघडसरिसमो' इति मृत्तिकामयघटसदृक्षं फलं पुण्यबन्धलक्षणं ज्ञेयम् । पुनरपि दृष्टान्तान्तरेण भावयति–कुलटाया दुश्चारिण्याः स्त्रिया द्विजदानादयो ब्राह्मणविभववितरण-पर्वदिवसोपवास-तीर्थस्नानप्रभृतयो धर्मक्रियाविशेषास्तेषु यदा निरनुबन्धं फलं, तथा, हन्तेति कोमलामंत्रणे एतदपि क्रियामात्रजन्यं पुण्यमिति ॥२४२॥

**तम्हा भावो सुद्धो सव्वपयत्तेण हंदि परलोए ।**
**कायव्वो बुद्धिमया आणोवगजोगतो णिच्चं ॥२४३॥**

यस्मादेवं क्रियामात्रं निरनुबन्धफलं तस्माद्–भावो–मनःपरिणामः शुद्धो–रागद्वेषमोहमलविकलः सर्वप्रयत्नेन–सर्वस्वसामर्थ्यागोपनरूपेण; हंदीत्युपप्रदर्शने, परलोके–स्वर्गापवर्गादिलक्षणे साध्ये कर्त्तव्यो–घटयितव्यो बुद्धिमता–प्रशस्तमतिना पुरुषेण । कथमित्याह—'आज्ञोपगयोगतो' आज्ञामुपगच्छन्ति–अनुवर्त्तन्ते ये ते आज्ञोपगास्ते च ते योगाश्च–अनुष्ठानभेदाः तेभ्यो, जिनाज्ञानुसारिणो धर्मारम्भान् प्रतीत्यैत्यर्थः, नित्यम्–अहर्निशमिति ॥२४३॥

सम्प्रत्याज्ञामेव पुरस्कुर्वन् दृष्टान्तमाह;—

**जो आणं बहु मन्नति सो तित्थयरं गुरुं च धम्मं च ।**
**साहेति य हियमत्थं एत्थं भीमेण दिट्ठंतो ॥२४४॥**

यो जन्तुरासन्नभव्य आज्ञाम्–उक्तरूपां बहु मन्यते–पुरस्करोति, स–आज्ञाबहुमन्ता तीर्थकरम्–अर्हन्तं गुरुं च धर्म्माचार्यं धर्मं च श्रुतचारित्ररूपं बहु मन्यते, आज्ञाबहुमानस्य तीर्थकरादिबहुमानाविनाभूतत्वाद् । साधयति घटयति, चः समुच्चये, हितं–कल्याणरूपमर्थं पुरुषार्थलक्षणम् । अत्र–अस्मिन्नाज्ञाबहुमाने भीमेन राजसूनुना दृष्टान्तः–उदाहरणं वाच्यम् ॥ २४४ ॥" इति आचार्यश्री**हरिभद्रसूरि**विरचिते **मुनिचन्द्रसूरि**विरचितवृत्तिसहिते **उपदेशपदे** ॥

"**एवं पुण्णं पि दुहा मिम्मयकणयकलसोवमं भणियं । अण्णेहि वि इह मग्गे नामविवज्जासभेएणं ॥८७॥ एवं पुण्यमपि द्विधा** द्विप्रकारम् । कथम् ? इत्याह–**मृण्मय–कनककलशोपमं भणितम्** । एकं मृण्मयकलशोपमं क्रियामात्रजन्यमफलं सत् तत्फलदान–स्वभावं वा । अन्यत् कनककलशोपमं विशिष्टभावनाजन्यं तथा तथा फलान्तरसाधनत्वेन प्रकृष्ट-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा, **पत्तेसु एएसु अहं सेवारिहे सिया,** प्राप्तेषु एतेषु अर्हदादिषु **अहं सेवार्हः स्याम्** अर्हदादीनामेव, **आज्ञार्हः स्याम्** एतेषामेव, **प्रतिपत्तियुक्तः स्याम्** एतेषामेव, **निरतिचारपारगः स्यामेतदाज्ञायाः** ।

एवं सानुषङ्गां दुष्कृतगर्हामभिधाय सुकृतासेवनमाह **संविग्गो जहासत्तीए सेवेमि सुकडं** तीत्यादिना–

## संविग्गो जहासत्तीए सेवेमि सुकडं [ति ?] अणुमोएमि सव्वेसिं अरहंताणं अणुट्ठाणं, सव्वेसिं सिद्धाणं सिद्धभावं, सव्वेसिं आयरियाणं आयारं, सव्वेसिं उवज्झायाणं सुत्तप्पयाणं, सव्वेसिं साहूणं साहुकिरियं । सव्वेसिं सावगाणं मोक्खसाहणजोगे, एवं सव्वेसिं देवाणं सव्वेसिं जीवाणं

---

फलजनकस्वभावमिति । एतद् भणितम् **अन्यैरपि** सौगतैः—"द्विविधं हि भिक्षवः पुण्यम्—मिथ्यादृष्टिजं सम्यग्दृष्टिजं च । अपरिशुद्धमाद्यं फलं प्रति मृद्घटसंस्थानीयम् । परिशुद्धमुत्तरं फलं प्रति **सुवर्णघटसंस्थानीयम्**" [ ] **इह मार्गे** योगधर्ममार्गे **नामविपर्यासभेदेन** अभिधानभेदेन । एतदपि "इतरस्य तथा सुखेनैव मोक्षगामीति" [गा० ८५] एतदनुपाति तत्त्वतः । इति द्वितीयगाथार्थः ॥" इति **स्वोपज्ञवृत्तिसहिते योगशतके** ॥

१ **°चारं** H. विना ॥ २ **सानुषंगं** H. ॥

३ **"पञ्चसूत्र्यामप्युक्तम्**–'अणुमोएमि सव्वेसिं अरहंताणमणुट्ठाणं, सव्वेसिं सिद्धाणं सिद्धभावं, सव्वेसिं आयरियाणं आयारं, सव्वेसिं उवज्झायाणं सुत्तप्पयाणं, सव्वेसिं साहूणं साहुकिरियं, सव्वेसिं सावगाणं मुक्खसाहणजोए, सव्वेसिं देवयाणं सव्वेसिं जीवाणं होउकामाणं कल्लाणासयाणं मग्गसाहणजोए । होउ मे एसा अणुमोअणा ॥' **एतद्वृत्तिर्यथा–अनुमोदे**ऽहमिति प्रक्रमः । **सर्वेषामर्हतामनुष्ठानं** धर्मकथादि, **सर्वेषां सिद्धानां सिद्धभाव**मव्याबाधादिरूपम्, एवं **सर्वेषामाचार्याणामाचारं** ज्ञानाचारादिलक्षणम्, एवं **सर्वेषामुपाध्यायानां सूत्रप्रदानं** सद्विधिवद्, एवं **सर्वेषां साधूनां साधूक्रियां** सत्स्वाध्यायादिरूपाम्, एवं **सर्वेषां श्रावकाणां मोक्षसाधनयोगान्** वैयावृत्त्यादीन्, एवं **सर्वेषां देवाना**मिन्द्रादीनां **सर्वेषां जीवानां** सामान्येनैव **भवितुकामाना**मासन्नभव्यानां **कल्याणाशयानाम्**, एतेषां किम्? इत्याह— **मार्गसाधनयोगान्** सामान्येनैव कुशलव्यापारान्, **अनुमोदे** इति क्रियानुवृत्तिः । भवन्ति चैतेषामपि मार्गसाधनयोगाः, मिथ्यादृष्टीनामपि गुणस्थानकत्वाभ्युपगमाद् । अनभिग्रहे सति प्रणिधिशुद्धिमाह–**भवतु ममैषाऽनुमोद**नेत्यादि ॥" इति **यशोविजय**वाचकविरचितायां **धर्मपरीक्षास्वोपज्ञवृत्तौ** पृ. १२६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## होउकामाणं कल्लाणासयाणं मग्गसाहणजोगे ।

**संविग्नः सन् यथाशक्ति**, किम् ? इत्याह–**सेवे सुकृतम्** । एतदेवाह–**अनुमोदे**ऽहमिति प्रक्रमः । **सर्वेषामर्हताम् अनुष्ठानं** धर्मकथादि । एवं **सर्वेषां सिद्धानां सिद्धभावम्** अव्याबाधादिरूपम् । एवं **सर्वेषामाचार्याणाम् आचारं** ज्ञानाचारादिलक्षणम् । एवं **सर्वेषामुपाध्यायानां सूत्रप्रदानं** सद्विधिवत् । एवं **सर्वेषां साधूनां साधुक्रियां** सत्स्वाध्यायादिरूपाम् । एवं **सर्वेषां श्रावकाणां मोक्षसाधनयोगान्** वैयावृ(पृ?)त्यादीन् । एवं **सर्वेषां देवानाम्** इन्द्रादीनाम्, **सर्वेषां जीवानां** सामान्येनैव **भवितुकामानामा**सन्नभव्यानां **कल्याणाशयानां** शुद्धाशयानाम्, एतेषां किम् ? इत्याह–**मार्गसाधनयोगान्** सामान्येन कुशलव्यापारान्, '**अनुमोदे**' इति क्रियानुवृत्तिः । भवन्ति चैतेषामपि मार्गसाधनयोगाः, मिथ्यादृष्टीनामपि गुण[2]स्थानकत्वाभ्युपगमात्[3] । [4]अनभिग्रहे सति प्रणिधिशुद्धिमाह–

## होउ मे एसा अणुमोयणा सम्मं विहिपुव्विगा, सम्मं सुद्धासया, सम्मं प[5]डिवत्तिरूवा, सम्मं निरइयारा, परम[6]गुणजुत्तअरहंतादिसामत्थओ । अचिंतसत्तिजुत्ता हि ते भगवंतो वीयरागा सव्वण्णू परमकल्लाणा परमकल्लाणहेऊ सत्ताणं । मूढे अम्हि पावे अणाइमोहवासिए, अणभिण्णे भावओ हियाहियाणं अभिण्णे सिया, अहियनिवित्ते सिया,

---

१ "अनुमोद इति हर्षगोचरतां प्रापयामीत्यर्थः"—Bटि० ॥ २ **०स्थान्युपगमात्** H.॥ ३ "मिथ्यादृष्टिर्भवेन्मिथ्यादर्शनस्योदये सति । गुणस्थानत्वमेतस्य भद्रकत्वाद्यपेक्षया ॥३०॥ [ १।१६, पृ० १०९ ] इति योगशास्त्रवृत्तौ "रुचिर्जिनोक्ततत्त्वेषु ( यथावस्थिततत्त्वानाम् )" [योगशास्त्रे १।१६] इतिश्लोकवृत्तौ । एतच्छ्लोकोक्तं यद् भद्रकत्वादिगुणस्यान्यतीर्थिकमार्गपराङ्मुखत्वे सति जैनमार्गाभिमुखतादिलक्षणमार्गानुसारित्वादिरूपस्य अपेक्षया गुणस्थानत्वं मिथ्यादृशः । तदेव तादृग्गुणस्थानत्वमत्रापि श्री **हरिभद्रसूरि**भिरभिहितमिति मन्तव्यम् । तदभिव्यञ्जकं तु 'अनभिग्रहे सति प्रणिधिशुद्धिमाह' इत्यग्रेतनपदेन कदाग्रहाभावाभिधानमेवेति "— Aटि. ॥ ४ अत्र 'गुणस्थानकत्वाभ्युपगमात् अनभिग्रहे सति । प्रणिधिशुद्धिमाह–' इत्यपि वाक्ययोजना सम्भवेत् ॥ ५ **०वत्तिजुत्ता सम्मं** K1 ॥ ६ °**णजुत्ता अरहंतादि०** S.। °**णसंजुत्ता । अरहंतादि०**K ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हियपवित्ते सिया, आराहगे[1] सिया, उचियपडिवत्तीए सव्वसत्ताणं, सहियं ति इच्छामि सुकडं, इच्छामि सुकडं, इच्छामि सुकडं ।

**भवतु ममैषाऽनुमोदना** अनन्तरोक्ता **सम्यग्विधिपूर्विका,** सूत्रानुसारेण । **सम्यक्शुद्धाशया,** कर्मविगमेन[2] । **सम्यक्प्रतिपत्तिरूपा,** क्रियारूपेण । **सम्यग्निरतिचारा,** सन्निर्वहणेन । कुतो भवतु ? इत्याह–**परमगुणयुक्तार्हदादिसामर्थ्यतः** । आदिशब्दात् सिद्धादिपरिग्रहः[3] । प्रार्थनायाः सविषयतामाह–[4]**अचिन्त्यशक्तियुक्ता हि ते भगवन्तोऽर्हदादयः वीतरागाः सर्वज्ञाः,** प्राय आचार्यादीनामप्येतद्वीतरागादित्वमस्तीत्येवमभिधानम्, तद्विशेषापेक्षं त्वाह–**परमकल्याणा** आचार्यादयोऽपि, **परमकल्याणहेतवः सत्त्वानां** तैस्तैरुपायैः सर्व एवैते । **मूढश्चास्मि पाप एतेषां** [5]विशिष्टां प्रतिपत्तिं प्रति । **अनादिमोहवासितः** संसारानादित्वेन । **अनभिज्ञो भावतः** परमार्थतः, **हिताहितयोरभिज्ञः स्यामहमेतत्सामर्थ्येन** । **तथाऽहितनिवृत्तः स्याम्, तथा हितप्रवृत्तः स्याम्** । **एवमाराधकः स्यामुचितप्रतिपत्त्या सर्वसत्त्वानां** संबन्धिन्या । किम् ? इत्याह–[6]**स्वहितमिति इच्छामि सुकृतं ३**[7] एवं वारात्रयं पाठः । उत्तममेतत् सुकृतासेवनं विशेषतः पृथग्जनानां[8] वनच्छेत्तृबलदेव-मृगोदाहरणात्[9] परिभावनीयम् ।

---

१ **आराहइत्तए सिया** S.॥ २ °**गमनेन** H. ॥ ३ **सिद्धादिग्रहः** H.॥ ४ इत आरभ्य **तद्विशेषापेक्षं त्वाह** [ १०५ ] इति पर्यन्तः पाठः H. मध्ये नास्ति ॥ ५ **विशिष्टानां प्रतिपत्तिं** H. **विना** ॥ ६ **स्वहितमिति** H. मध्ये नास्ति ॥ ७ '३' नास्ति H. ॥ ८ "पृथग्जनानामपि सिद्धमेतत्, योगिबुद्धिगम्योऽयं व्यवहारः" इति **ललितविस्तरायाम्** । "पृथग्जनानामपि पृथक्–तथाविधालौकिकसामयिकाचारविचारादेर्बहिः स्थिता बहुविधा बालादिप्रकारा जनाः–प्राकृतलोकाः पृथग्जनास्तेषामपि शास्त्राधीनधियां सुधियामित्यपिशब्दार्थः ।" इति **ललितविस्तराया मुनिचन्द्रसूरिविरचितायां पञ्जिकायाम्** ॥
९ " तत्पार्श्वे प्राव्रजद्रामस्तपस्तीव्रं चचार च । तुङ्गिकाशिखरे गत्वा सिद्धार्थोऽस्थाच्च रक्षकः ॥३७॥
मासपारणकेऽन्येद्युर्बलः क्वापि पुरे विशन् । कयापि साभ्यया पौर्या कूपकंठस्थयैक्ष्यत ॥३८॥
रामस्य रूपातिशयालोकनव्यग्रचित्तया । कुम्भस्थाने पुत्रकण्ठे तया रज्जुरबध्यत ॥३९॥
कूपे तं क्षेप्तुमारेभे सा यावत्तावदैक्ष्यत । बलेन चिन्तितं चेदं धिङ्मे रूपमनर्थकृत् ॥४०॥
नातः परं पुरग्रामादिषु वेक्ष्यामि किं त्वहम् । वने काष्ठादिहारिभ्यः पारयिष्यामि भिक्षया ॥४१॥
तां नारीं बोधयित्वाथ तदेव हि वनं बलः । जगाम तेपे च तपो दुस्तपं मासिकादिकम् ॥४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रपाठे फलमाह–

## एवमेयं सम्मं पढमाणस्स सुणमाणस्स अणुप्पेहमाणस्स सिढिलीभवंति परिहायंति खिज्जंति असुहकम्माणुबंधा ।

आनीतं भक्तपानादि तृणकाष्ठादिहारिभिः । दत्तं च तैः प्रासुकं च गृहीत्वा पारयन्मुनिः ॥४३॥
काष्ठादिहारकास्ते च गत्वा चख्युः स्वभुभुजाम् । देवरूपः पुमान् कोऽपि चरन्नस्ति वने तपः ॥४४॥
इत्याशशंकिरे ते च किमस्मद्राज्यकांक्षया । करोति तप ईदृक्षं मन्त्रं वा साधयत्यसौ ॥४५॥
इमं हन्मस्ततो गत्वेत्यालोच्य युगपच्च ते । ईयुः सर्वाभिसारेण मुने रामस्य सन्निधौ ॥४६॥
ततश्च देवः सिद्धार्थस्तस्य सन्निहितः सदा । विचक्रेऽनेकशः सिंहाञ्जगतोऽपि भयंकरान् ॥४७॥
राजानश्चकितास्ते च नमस्कृत्य बलं ययुः । नरसिंह इति ख्यातो बलभद्रस्तदाद्यभूत् ॥४८॥
वने तपस्यतस्तस्य धर्मदेशनयाग्र्यया[1] । वासिता व्याघ्रसिंहाद्या बहवः प्रशमं ययुः ॥४९॥
केऽपि श्रावकतां भेजुः केऽपि भद्रकतां पुनः । कायोत्सर्गं व्यधुः केऽपि केऽपि चानशनं तदा ॥५०॥
मांसाहारान्निवृत्तास्ते बभूवुः पारिपार्श्विकाः । तिर्यग्रूपधराः शिष्या इव राममहामुनेः ॥५१॥
रामप्राग्भवसंबन्धः कोऽपि जातिस्मरो मृगः । अतिसंवेगमापन्नः सदा सहचरोऽभवत् ॥५२॥
उपास्योपास्य रामर्षिं स मृगो वनमभ्रमत् । अन्वेषयद्यदायातान् सान्नान् काष्ठादिहारिणः ॥५३॥
यदापश्यत्तदैवैत्य रामर्षिं ध्यानसंस्थितम् । पर्यस्यन् शिरसा पादे भिक्षादातॄन् व्यजिज्ञपत् ॥५४॥
रामस्तदुपरोधेन ध्यानं मुक्त्वा क्षणादपि । भिक्षायै निरगात्तेन हरिणेनाग्रगामिना ॥५५॥
तत्रान्येद्युर्वने भव्यदारुभ्यो रथकारकाः । आययुश्चिच्छिदुश्चापि वृक्षान् सारानृजून् बहून् ॥५६॥
तान् प्रेक्ष्य स भ्रमन्नेणः[2] सद्यो राममजिज्ञपत् । ध्यानं चापारयत्तस्योपरोधात् स महामुनिः ॥५७॥
तेषु भोक्तुं निषण्णेषु भिक्षार्थं मासपारणे । रामर्षिराययौ तत्र हरिणेनाग्रगामिना ॥५८॥
रथकाराग्रणी रामं प्रेक्ष्य प्रीतो व्यचिन्तयत् । अहो अत्राप्यरण्येऽसौ कल्पद्रुरिव कोऽप्यृषिः ॥५९॥
अहो रूपमहो तेजः प्रशमः कोऽप्यहो महान् । कृतार्थः सर्वथाप्यस्मि मुनिनातिथिनामुना ॥६०॥
रथकारो विचिन्त्यैवं पञ्चांगस्पृष्टभूतलः । बलर्षये नमस्कृत्य भोज्यपानान्युपानयत् ॥६१॥
अथ दध्यौ बलमुनिः श्राद्धः कोऽप्येष शुद्धधीः । कर्मार्जितुं स्वर्गफलं भिक्षां मे दातुमुद्यतः ॥६२॥
न चेद् गृह्णाम्यमूं भिक्षां तदेतस्य हि सद्गतेः । कृतो मयान्तरायः स्याद् गृह्णाम्येतेन हेतुना ॥६३॥
एवं विचिन्त्य भगवान् कारुण्यक्षीरसागरः । स्वकायनिरपेक्षोऽपि भिक्षां तस्मादुपाददे ॥६४॥
ऊर्ध्वाननो मृगः सोऽपि बाष्पांभःप्लावितेक्षणः । मुनिं वनच्छिदं चापि पश्यन्निदमचिन्तयत् ॥६५॥
अहो कृपानिधिः स्वामी निरपेक्षो वपुष्यपि । अन्वग्रहीद्रथकारं तपसामेक आश्रयः ॥६६॥
अहो वनच्छिद्धन्योऽयं जन्म चास्य महाफलम् । येनायं भगवानेवं पानान्नैः प्रतिलंभितः ॥६७॥
अहं पुनर्मन्दभाग्यो न तपः कर्तुमीश्वरः । प्रतिलंभयितुं नापि भिक्षां तिर्यक्त्वदूषितम् ॥६८॥
एवं त्रयोऽपि ते यावद्धर्मध्यानपराः स्थिताः । महावाताहतस्तावदर्धच्छिन्नोऽपतत्तरुः ॥६९॥
ते त्रयस्तरुणा तेन पतितेन हता मृताः । पद्मोत्तरविमानान्तर्ब्रह्मलोकेऽभवन् सुराः ॥७०॥"
इति **त्रिषष्टिशलाकापुरुषचरिते** ऽष्टमे पर्वणि द्वादशे सर्गे ॥

---

१ अग्रया श्रेष्ठया ॥ २ एणो मृगः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**निरणुबंधे वाऽसुहकम्मे भग्गसामत्थे सुहपरिणामेणं कडगबद्धे विय विसे अप्पफले सिया, सुहावणिज्जे सिया, अपुणभावे सिया ।**

**एवमेयं सम्मं पढमाणस्स** एवमेतत् सूत्रं सम्यक् पठतः संवेगसारम्, तथा **सुणमाणस्स** श्रृण्वतः आकर्णयतः अन्यसमीपात्, तथा **अणुप्पेहमाणस्स** अनुप्रेक्षमाणस्य अर्थानुस्मरणद्वारेण । किम्? इत्याह—**सिढिलीभवंति** श्लथीभवन्ति, मन्दविपाकतया । तथा **परिहायंति** परिहीयन्ते, पुद्गलापसरणेन । तथा **खिज्जंति** क्षीयन्ते [1]निर्मूलत एवाशयविशेषाभ्यासद्वारेण । के? इत्याह—**असुहकम्माणुबंधा** अशुभकर्मानुबन्धा भावरूपाः कर्मविशेषरूपा वा । ततः किम्? इत्याह—**निरणुबंधे वाऽसुहकम्मे** निरनुबन्धं वाऽशुभकर्म यच्छेषमास्ते **भग्गसामत्थे सुहपरिणामेणं** भग्नसामर्थ्यं विपाकप्रवाहमङ्गीकृत्य शुभपरिणामेनानन्तरोदितसूत्रप्रभवेन । किमिव इत्याह—**कडगबद्धे [2]विय विसे अप्पफले सिया,** कटकबद्धमिव विषं मन्त्रसामर्थ्येनाल्पफलं स्यात्, [3]अल्पविपाकमित्यर्थः । तथा **सुहावणिज्जे सिया,** सुखापनेयं स्यात् संपूर्णस्वरूपेणैव । तथा **अपुणभावे सिया,** अपुनर्भावं स्यात् कर्म, पुनस्तथाऽबन्धकत्वेन । एवमपायपरिहारः फलत्वेनोक्तः ।

इदानीं सदुपायसिद्धिलक्षणमेतदभिधातुमाह—

**तहा आसगलिज्जंति परिपोसिज्जंति निम्मविज्जंति सुहकम्माणुबंधा । साणुबंधं च [4]सुहकम्मं पगिट्ठं पगिट्ठभावज्जियं नियमफलयं सुप्पउत्ते विय महागए सुहफले सिया, सुहपवत्तगे सिया, परमसुहसाहगे सिया । अओ अप्पडिबंधमेयं असुहभावनिरोहेणं सुहभावबीयं ति सुप्पणिहाणं सम्मं पढियव्वं सोयव्वं अणुप्पेहियव्वं ति ।**

---

१ निमूलत S.॥ २ विव H. ॥ ३ अल्पफलमित्यर्थः S. । इत आरभ्य अपुनर्भावं स्यात् [पं० १६] इतिपर्यन्तः पाठः S. मध्ये पश्चात् केनचित् पूरितः ॥ ४ सुहं कम्मं S. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तथा आसगलिज्जंति** इत्यादि । **आसकलीक्रियन्ते,** आक्षिप्यन्ते इत्यर्थः । तथा **परिपोसिज्जंति,** परिपोष्यन्ते भावोपचयेन । तथा **निम्मविज्जंति,** निर्माप्यन्ते, परिसमाप्तिं नीयन्ते । के ? इत्याह–**सुहकम्माणुबंधा,** शुभकर्मानुबंधाः, कुशलकर्मानुबंधा इति भावः ।

ततः किम् ? इत्याह–**साणुबंधं च सुहकम्मं** सानुबन्धं च शुभकर्म आत्यन्तिकानुबन्धापेक्षम् । [1]किंविशिष्टं किम् ? इत्याह–**पगिट्ठं** प्रकृष्टं प्रधानं **पगिट्ठभावज्जियं** प्रकृष्टभावार्जितं शुभभावार्जितमित्यर्थः, **नियमफलयं** नियमफलदम्, प्रकृष्टत्वेनैव । तदेवंभूतं किम् ? इत्याह–**सुप्पयुत्ते विय महागदे** सुप्रयुक्त इव महागदः एकान्तकल्याणः **सुहफले सिया** शुभफलं स्यादनन्तरोदितं कर्म । तथा **सुहपवत्तगे सिया,** शुभप्रवर्तकं स्यादनुबन्धेन । एवं **परमसुहसाहगे सिया,** परमसुखसाधकं स्यात्, पारम्पर्येण निर्वाणावहमित्यर्थः ।

यत एवम् **अतो अप्पडिबंधमेयं** । अतोऽस्मात् कारणात् अप्रतिबन्धम् एतत् प्रतिबन्धरहितम्, अनिदानमित्यर्थः । **असुहभावनिरोहेण सुहभावबीजं ति** अशुभभावनिरोधेन [2]अशुभानुबन्धनिरोधेनेत्यर्थः, शुभभावबीजमिति कृत्वैतत् सूत्रं **सुप्पणिहाणं** सुप्रणिधानं शोभनेन प्रणिधानेन **सम्मं पढियव्वं सोयव्वं अणुपेहियव्वं ति** । सम्यक् प्रशान्तात्मना पठितव्यम् अध्येतव्यम् । [3]श्रोतव्यमन्वाख्यानविधिना । **अनुप्रेक्षितव्यं** [4]परिभावनीयमिति । [5]न च '**होउ मे एसा अणुमोयणा सम्मं विहिपुव्विगा**' इत्यादिना निदानपदमेतदिति मन्तव्यम्, [6][7]क्लिष्टबन्धहेतोर्भवानुबन्धिनः संवेगशून्यस्य महर्द्धि[8]भोगगृद्धौ अध्यवसानस्य निदानत्वात् । अस्य च तल्लक्षणायोगात् । अनीदृशस्य चानिदानत्वात् । आरोग्यप्रार्थनादेरपि निदानत्वप्रसङ्गात् । तथा चागमविरोधः–

आरोग्गबोहिलाभं समाहिवरमुत्तमं दिंतु । [ लोगस्स० ६ ]

इत्यादिवचनश्रवणादित्यलं प्रसङ्गेन ।

---

१ A. B विना—किंविशिष्टमित्याह H. ॥ किंविशिष्टकिमित्याह S. ॥ २ अशु[भ ?]भावानुबन्धं H. ॥ ३ श्रोतव्यम् नास्ति S. A.मू. B. ॥ ४ अनुभाव° H. ॥ ५ न तु H. ॥ ६ दृश्यतां पृ० १९ पं. १३ ॥ ७ H.S. Aमू. विना क्लिष्टकर्मबन्ध० Aसं० B. ॥ ८ ०भोगस्य गृध्नोः अध्य° H. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रपरिसमाप्तावसानमङ्गलमाह–

[1]नमो नमियनमियाणं परमगुरुवीयरागाणं । नमो सेसनमोक्कारारिहाणं। जयउ सव्वण्णुसासणं। परमसंबोहीए[2] सुहिणो भवंतु जीवा, सुहिणो भवन्तु जीवा, सुहिणो भवन्तु जीवा इति पावपडिघाय[3]गुणबीजाहाण[4]सुत्तं समत्तं[5] ॥१॥

**नमो नमियनमियाण**मित्यादि। नमो नतनतेभ्यः, देवर्षिवन्दितेभ्य इत्यर्थः। केभ्यः ? इत्याह–**परमगुरुवीयरागाणं** परमगुरुवीतरागेभ्यः, क्षीणक्लेशेभ्य इति यावत्।

**नमो सेसनमोक्कारारहाणं**। **नमः शेषनमस्कारार्हेभ्य** आचार्यादिभ्यो गुणाधिकेभ्य इति भावः।

**जयउ सव्वण्णुसासणं** जयतु सर्वज्ञशासनं कुतीर्थापोहेन।

**परमसंबोहीए सुहिणो भवंतु जीवा** इति **परमसंबोधिना** वरबोधिलाभरूपेण **सुखिनो भवन्तु** मिथ्यात्वदोषनिवृत्त्या **जीवाः** प्राणिन इति। अस्य वारात्रयं पाठः।

**पावपडिघायगुणबीजाधाणसुत्तं समत्तं। पापप्रतीघातेन** अकुशलानुबन्धाश्रवव्यवच्छेदेन गुणबीजाधानं भावतः प्राणातिपातविरमणनिमित्तन्यासः, तथाऽनुबन्धतो विचित्रविपाकवत्कर्माधानमित्यर्थः। एतत्सूचकं सूत्रं **पापप्रतीघातधर्मगुणबीजाधानसूत्रं समाप्तमिति।**

पञ्चसूत्रकव्याख्यायां प्रथमसूत्रव्याख्या समाप्ता ॥१॥

---

१ नमो २ नमियाणं K1 ॥ २ संबोहिए K1 ॥ ३ परिघाय° S. ॥ ४ ०हाणं सुत्तं K॥ ५ संमत्तं S. ॥ ६ °बन्धाश्रव्यव° S.। °बन्धाव्यव° H. ॥ ७ °धानभावतः H. ॥ ८ °णनिमित्तभ्यासः H.। °णमिति सन्यासः Sमू०। °णादिगुणन्यासः Sसं। °णमिति तत्न्यासः AB ॥ ९ °प्रतिघातकगुणबीजा° H ॥ १० °सूत्रव्या° H.॥

अधुना द्वितीयसूत्रव्याख्या प्रस्तूयते । अस्य चायमभिसंबन्धः—इह धर्मगुणबीजमाहितं सत् तत्तद्वैचित्र्यात् तत्तत्कालादिनिमित्तभेदेन विपच्यते एतदाभिमुख्येन । तत एव धर्मगुणप्रतिपत्तिश्रद्धोपजायते । तस्यां समुपजातायां यत् कर्त्तव्यं तदभिधातुमाह—

**जायाए धम्मगुणपडिवत्तिसद्धाए, भावेज्जा एएसिं सरूवं पयइसुंदरत्तं, आणुगामित्तं, परोवयारित्तं, परमत्थहेउत्तं । तहा दुरणुचरत्तं, [2]भंगदारुणत्तं, महामोहजणगत्तं, भूयो दुल्लहत्तं ति । [3]भावेऊणेवं जहासत्तीए उचियवि[4]हाणमेव अच्चंतभावसारं पडिवज्जेज्जा, तंजहा—थूलगपाणाइवायविरमणं १, थूलगमुसावायविरमणं २, थूलगअदत्तादानविरमणं ३, थूलगमेहुणविरमणं ४, थूलगपरि[5]ग्गहविरमण ५ मिच्चाइ ।**

जायाए धम्मगुणपडिवत्तिसद्धाए इत्यादि । जातायां धर्मगुणप्रतिपत्तिश्रद्धायां भावतस्तथाविधकर्मक्षयोपशमेन, भावयेत् एतेषां स्वरूपं धर्मगुणानाम् । प्रकृतिसुन्दरत्वं जीवसंक्लेशविशुद्ध्या । आनुगामुकत्वं भवान्तरवासनानुगमेन । परोपकारित्वं तथापीडादिनिवृत्त्या । परमार्थहेतुत्वं परंपरया मोक्षसाधनत्वेन । तथा दुरनुचरत्वं सदैवानभ्यासात् । भङ्गदारुणत्वं भगवदाज्ञाखण्डनतः । महामोहजनकत्वं धर्मदूषकत्वेन । भूयो दुर्लभत्वं विपक्षानुबन्धपुष्ट्येति । भावयित्वा एवमुक्तेन प्रकारेण यथाशक्ति शक्त्यनुरूपम् , न तद्धान्याधिक्याभ्याम् , उचितविधानमेव शास्त्रोक्तेन विधिना, अत्यन्तभावसारं महता प्रणिधानबलेन प्रतिपद्येत धर्मगुणान् न राभसिकया प्रवृत्त्या, अस्या विपाकदारुणत्वात् । किंभूतांस्तान् ? इत्याह—तंजहा इत्यादि ।

---

१ °मुख्येतस्तत एव S. ॥ २ भंगे K1. K. S. विना । ३ भावेऊण नास्ति K1. K.S. विना । अतः K1. K. S. विना–'एवं जहासत्तीए' इत्येव पाठः ॥ ४ विहाणेण K1 K विना ॥ ५ °ग्गहाओ वेर° K. ॥ ६ भङ्गे A.B ॥ ७ भाव इति एव° A.B ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा–स्थूरप्राणातिपातविरमणं, स्थूरमृषावादविरमणं, स्थूरादत्तादानविरमणं, स्थूरमैथुनविरमणं, स्थूरपरिग्रहविरमणमित्यादि। आदिशब्दाद् दिग्व्रताद्युत्तरगुणपरिग्रहः। आदावुपन्यासश्चैषां भावत इत्थमेव प्राप्तेरिति। उक्तं च–

[1]सम्मत्तम्मि उ लद्धे पलियपुहत्तेण सावओ होज्जा।
चरणोवसमखयाणं सागरसंखंतरा होंति ॥
एवं अप्परिवडिए सम्मत्ते देव-मणुयजम्मेसु।
अण्णयरसेढिवज्जं एगभवेणं व सव्वाइं ॥ [वि० भा० १२१९–१२२०] इत्यादि।

**पडिवज्जिऊण पालणे जइज्जा, सयाऽऽणागाहगे सिआ, सयाऽऽणाभावगे सिआ, सयाऽऽणापरतंते सिआ। आणा हि मोहविसपरममंतो, जलं [2]दोसाइजलणस्स, कम्मवाहिचिगिच्छासत्थं, कप्पपायवो सिवफलस्स।**

पडिवज्जिऊण इत्यादि। प्रतिपद्य पालने यतेत अधिकृतगुणानाम्। कथम्? इत्याह–सदाऽऽज्ञाग्राहकः स्यात्, अध्ययन-श्रवणाभ्याम्। आज्ञा आगम उच्यते। सदाऽऽज्ञाभावकः स्यात्, अनुप्रेक्षाद्वारेण। सदाऽऽज्ञापरतन्त्रः स्यादनुष्ठानं प्रति। किमेवम्? इत्याह–आज्ञा हि मोहविषपरममन्त्रः, तदप[3]नयनेन। जलं द्वेषादिज्वलनस्य, तद्विध्यापनेन। कर्मव्याधिचिकित्साशास्त्रम्, तत्क्षयकारणत्वेन। कल्पपादपः शिवफलस्य, तदवन्ध्यसाधकत्वेन।

**वज्जेज्जा अधम्ममित्तजोगं। चिंतेज्जा अभिणवपाविए गुणे, अणाइभवसंगए य अगुणे, उदग्गसहकारित्तं अधम्ममित्ताणं, उभयलोगगरहियत्तं, असुहजोगपरंपरं च।**

तथा वज्जेज्जा इत्यादि। वर्जयेत् अधर्ममित्रयोगम् अकल्याणमित्र-

---

१ "**सम्मत्तं०** गाहा। एवं सम्यक्त्वलाभात् पल्योपमपृथक्त्वकर्मस्थितिपरिक्षये श्रावकत्वं प्राप्यते, ततः संख्येयेषु सागरोपमेष्वपेतेषु चारित्रम्, ततः संख्येयेषूपशामकत्वम्। ततः संख्येयेषु क्षपकत्वमिति ॥१२१९॥ **एवं०** गाहा। एवमप्रच्युतसम्यग्दर्शनस्य देवमनुष्यजन्मनू(सू)क्तम्। यत्तेनापि हि जन्मना सर्वाणि प्राप्येरन्न तु श्रेणिद्वयम्, किन्त्वेकैवौपशमिकी क्षायिकी वेति ॥१२२०॥" इति **विशेषावश्यकभाष्यस्वोपज्ञवृत्तौ** ॥ २ **रोसाइ°** K1 K विना ॥ ३ **°नयेन**। जलं S ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**संबन्धम्** , **चिन्तयेत् अभिनवप्राप्तान् गुणान्** स्थूरप्राणातिपातविरमणादीन् , **अनादिभवसङ्गतांश्च अगुणान्** सदैवाविरतत्वेन, **उदग्रसहकारित्वमधर्ममित्राणाम् अगुणान् प्रति । उभयलोकगर्हितत्वं** तत्पापानुमत्यादिना, **अशुभयोगपरंपरां च अकुशलानुबन्धतः** ।

**परिहरेज्जा सम्मं लोगविरुद्धे अणु[1]कंपापरे जणाणं, न खिंसावेज्ज धम्मं, संकिलेसो खु एसा, परमबोहिबीयं अबोहिफलमप्पणो त्ति । एवमालोचेज्जा[2] न—खलु एत्तो परो अणत्थो, अंधत्तमेयं संसाराडवीए, जणगम[3]णिट्ठवायाणं, अइदारुणं सरूवेणं असुहाणुबंधमच्चत्थं ।**

तथा परिहरेज्जा इत्यादि । **परिहरेत् सम्यग् लोकविरुद्धानि** तदशुभाध्यवसायादिनिबन्धनानि । **अनुकम्पापरो जनानाम्** , मा भूत्तेषामधर्मः । **न खिंसयेद्धर्मम्** , न गर्हयेज्जनैरित्यर्थः । **संक्लेश एवैषा** खिंसाऽशुभभावत्वेन । **परम् अबोधिबीजं** तत्प्रद्वेषेण । **अबोधिफलमात्मन इति,** जनानां तन्निमित्तभावेन । तथा **एवमालोचयेत्** सूत्रानुसारेण । **न खल्वतः परोऽनर्थो**ऽबोधिफलात् तत्कारणभावाद्वा, लोकविरुद्धत्वादिति । **अन्धत्वमेतत् संसाराटव्यां** हितदर्शनाभावेन । **जनकमनिष्टपातानाम्** , नरकाद्युपपातकारणतया । **अतिदारुणं स्वरूपेण,** संक्लेशप्रधानत्वात् । **अशुभानुबन्धमत्यर्थं** परम्परोपघातभावेनेति । अत एवोक्तम्—

[4]**लोकः खल्वाधारः सर्वेषां धर्मचारिणां यस्मात् ।**
**तस्माल्लोकविरुद्धं धर्मविरुद्धं च संत्याज्यम्** ॥ [ प्रशम० १३१ ] इत्यादि ॥

---

१ **करुणापरे** K विना ॥ २ °**मालोएज्जा** K. K1 विना ॥ ३ °**मणिट्ठावायाणं** K. K1 विना ॥ ४ "**लोको** जनपदः । **खलु**शब्दोऽवधारणे । लोक एवाधारः । **सर्वेषां ब्रह्मचारिणां यस्मात्** । ब्रह्म संयमः सप्तदशभेदः । तद्योगात् संयमिनः । तेषां सर्वेषामिति गच्छवासिनां गच्छनिर्गतानां च । **तस्माल्लोके यद्विरुद्धं** जातमृतकसूतक-समूहनिराकृतादिगृहेषु भिक्षादिग्रहणमभोज्येषु च परिहार्यम् । यच्च लोकैकदेशे विरुद्धं मद्य-मांस-लशुन-बीजानन्तकायादि धर्मसाधनविरुद्धमनेकं तदपि परिहार्यमिति ॥१३१॥" इति **प्रशमरतिटीकायाम्** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सेवेज्ज धम्ममित्ते विहाणेणं, अंधो विय[1] अणुकड्ढगे, वाहिओ विव वेज्जे, दरिद्दो विय[2] ईसरे, भीओ विय[3] महानायगे। न इओ सुंदरतरमन्नं[4] ति बहुमाणजुत्ते सिया, आणाकंखी, आणापडिच्छगे, आणाअविराहगे, आणानिप्फायगे त्ति।**

तथा सेवेज्ज इत्यादि। सेवेत धर्ममित्राणि विधानेन सत्प्रतिपत्त्यादिना। अन्ध इवानुकर्षकान्, पातादिभयेन। व्याधित इव वैद्यान्, दुःखभयेन। दरिद्र इवेश्वरान्, स्थितिहेतुत्वेन। भीत इव महानायकान्, आश्रयणीयत्वेन। तथा न इतो धर्ममित्रसेवनात् सुन्दरतरमन्यदिति कृत्वा बहुमानयुक्तः स्यात् धर्ममित्रेषु। आज्ञाकाङ्क्षी, अदत्तायामस्यां तेषाम्। आज्ञाप्रतीच्छकः, प्रदानकाले तेषामेव। आज्ञाऽविराधकः प्रस्तुतायां तेषामेव। आज्ञानिष्पादक इत्यौचित्येन तेषामेव।

**पडिवन्नधम्मगुणारिहं[5] च वट्टिज्जा गिहिसमुचिएसु गिहिसमायारेसु परिसुद्धाणुट्ठाणे परिसुद्धमणकिरिए परिसुद्धवइकिरिए परिसुद्धकायकिरिए।**

पडिवण्णेत्यादि। प्रतिपन्नधर्मगुणार्हं च वर्तेत सामान्येनैव, गृहिसमुचितेषु गृहिसमाचारेषु नानाप्रकारेषु, परिशुद्धानुष्ठानः सामान्येनैव। परिशुद्धमनःक्रियः शास्त्रानुसारेण। परिशुद्धवाक्क्रियोऽनेनैव[6]। परिशुद्धकायक्रियोऽनेनैव।

एतद्विशेषेणाभिधातुमाह–

**वज्जेज्जाऽणेगोवघायकारगं[7] गरहणिज्जं बहुकिलेसं आयइविराहगं समारंभं। न चिंतेज्ज परपीडं। न भावेज्ज[8] दीणयं।**

---

१ विवाणुकड्ढए K1 K. विना ॥ २ विव C. D. ॥ ३ विव C. D. ॥ ४ सुंदरमन्नं K. ॥ ५ °रहं K1 ॥ ६ शास्त्रानुसारेणेत्यर्थः–Aटि० ॥ ७ °रगं K1 ॥ ८ °भासेज्ज K1 ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न गच्छेज्ज हरिसं। न सेवेज्जा वितहाभिणिवेसं। उचियमणपवत्तगे सिया। एवं न भासेज्ज अलियं, न फरुसं, न पेसुन्नं, नाणिबद्धं। हियमियभासगे सिया। एवं न हिंसेज्ज भूयाणि। न गिण्हेज्ज अदत्तं। न निरिक्खेज्ज परदारं। न कुज्जा अणत्थदंडं। सुहकायजोगे सिया।

वर्जयेत् अनेकोपघातकारकं सामान्येन, गर्हणीयं प्रकृत्या, बहुक्लेशं प्रवृत्तौ, आयतिविराधकं परलोकपीडाकरम्, समारम्भम् अङ्गारकर्मादिरूपम्। तथा न चिन्तयेत् परपीडां सामान्येन। न भावयेद् दीनतां कस्यचिदसंप्रयोगे। न गच्छेद्धर्षं कस्यचित् संप्रयोगे। न सेवेत वितथाभिनिवेशम् अतत्त्वाध्यवसायम्। किन्तु उचितमनःप्रवर्त्तकः स्याद् वचनानुसारेण। एवं न भाषेतानृतमभ्याख्यानादि, न परुषं निष्ठुरम्, न पैशु(शु)न्यं परप्रीतिहारि, नानिबद्धं विकथादि। किन्तु हितमितभाषकः स्यात् सूत्रनीत्या। एवं न हिंस्याद् भूतानि पृथिव्यादीनि। न गृह्णीयाददत्तं स्तोकमपि। न निरीक्षेत परदारं रागतः। न कुर्यादनर्थदण्डं अपध्यानाचरितादि। किन्तु शुभकाययोगः स्यात्, आगमनीत्या।

तहा लाभोचियदाणे लाभोचियभोगे लाभोचियपरिवारे लाभोचियनिहिकरे सिया, असंतावगे परिवारस्स, गुणकरे जहासत्ति, अणुकंपापरे, निम्ममे भावेणं। एवं खु तप्पालणे वि धम्मो जहऽन्नपालणे त्ति। सव्वे जीवा पुढो पुढो, ममत्तं बंधकारणं[1]।

तथा लाभोचियदाणेत्यादि। तथा लाभोचितदानः, अष्टभागाद्यपेक्षया। तथा लाभोचितभोगः, अष्टभागाद्यपेक्षया। लाभोचितपरिवारः, चतुर्भागादिभर्त्तव्यपरिमाणेन। लाभोचितनिधिकरः[2] स्यात्, चतुर्भागाद्यपेक्षयैव।

---

१ वधकारणं K1 ॥ २ °कारः Sं० A B ॥

उक्तं चात्र लौकिकैः–

> [१]पादमायान्निधिं कुर्यात् पादं वित्ताय वर्द्धयेत् ।
> धर्मोपभोगयोः पादं पादं भर्त्तव्यपोषणे ॥ [

तथाऽन्यैरप्युक्तम्–

> आयादर्द्धं नियुञ्जीत धर्मे यद्वाऽधिकं ततः ।
> शेषेण शेषं कुर्वीत यत्नतस्तुच्छमैहिकम् ॥ [ ] इत्यादि ।

तथा **असन्तापकः परिजनस्य**, स्यादिति वर्त्तते, शुभप्रणिधानेन । **गुणकरो यथाशक्ति** भवस्थितिकथनशीलत्वेन । **अनुकम्पापरः**, प्रतिफलनिरपेक्षतया । **निर्ममो भावेन** भवस्थित्यालोचनात् । [२]कं एवं गुणः स्यात् ? इत्याह–**एवं यस्मात् तत्पालनेऽपि धर्मः**, जीवोपकारभावात् । **यथाऽन्यपालन** इति जीवाविशेषेण । किमित्येतदेवम् ? इत्याह–**सर्वे जीवाः पृथक् पृथग् वर्त्तन्ते** स्वलक्षणभेदेन, किन्तु **ममत्वं बन्धकारणम्**, लोभरूपत्वात् । उक्तं च–

> संसाराम्बुनिधौ सत्त्वाः कर्मोर्मिपरिघट्टिताः ।
> संयुज्यन्ते वियुज्यन्ते, तत्र कः कस्य बान्धवः ॥ [ ]

तथा–

> अत्यायतेऽस्मिन् संसारे, भूयो जन्मनि जन्मनि ।
> सत्त्वो नैवास्त्यसौ कश्चिद्यो न बन्धुरनेकधा ॥ [ ] ॥ इत्यादि ॥

सर्वथा परिभावनामात्रमेतत्स्वजनो न स्वजन इति ॥

**तहा तेसु तेसु समायारेसु सइसमन्नागए सिया, अमुगे[३] अहं, अमुगकुले, अमुगसीसे[४], अमुगधम्मट्ठाणट्ठिए, न मे तव्विराहणा, न मे तदारंभो, वुड्ढी ममेयस्स, एयमेत्थ सारं, एयमायभूयं, एयं हियं । असारमन्नं सव्वं विसेसओ अविहिगहणेणं * विवागदारुणं च त्ति[५] * । एवमाह तिलोगबंधू परम-**

---

१ अक्षरशः समानप्रायमिदं श्लोकद्वयं **धर्मबिन्दुटीकाया**मपि [पृ० ८] उद्धृतमाचार्यश्री **मुनिचन्द्रसूरिभिः**, तथा **योगशास्त्रवृत्तौ** [पृ० १५२] आचार्यश्री **हेमचन्द्रसूरिभिः** ॥ २ एवं कृते को गुणः स्यादित्याशयः ॥ ३ **अमुगेहं** K. K1 विना ॥ ४ °**गसिस्से** K. K1 विना ॥ ५ * * एतदन्तर्गतः पाठः S. K. K1 विना नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कारुणिगे सम्मं संबुद्धे भगवं अरहंते[१] त्ति । एवं समालोचिय तदविरुद्धेसु समायारेसु सम्मं वट्टेज्जा । भावमंगलमेयं तन्निप्फत्तीए ।**

तहा तेसु तेसु इत्यादि । तथा तेषु तेषु समाचारेषु गृहिसमुचितेष्विति वर्त्तते, स्मृतिसमन्वागतः स्यात् आभोगयुक्तः । कथम् ? इत्याह—अमुकोऽहं देवदत्तादिनामा । अमुककुल इक्ष्वाका(क्वा)द्यपेक्षया । अमुकशिष्यो धर्मतः तत्तदाचार्यापेक्षया । अमुकधर्मस्थानस्थितः अणुव्रताद्यपेक्षया । न मम तद्विराधना सांप्रतम्[२] । न मम तदारम्भः विराधनारम्भः । तथा वृद्धिर्ममैतस्य धर्मस्थानस्य । एतदत्र सारं धर्मस्थानम् । एतदात्मभूतमानुगामुकत्वेन । एतद्धितं सुन्दरपरिणामत्वेन । असारमन्यत् सर्वमर्थजातादीति । विशेषतोऽविधिग्रहणेन विपाकदारुणत्वात् । यथोक्तम्—

> पापेनैवार्थरागान्धः फलमाप्नोति यत् क्वचित् ।
> बडिशामिषवत्तत्तमविनाश्य[३] न जीर्यति ॥ [ ] ॥ इति ।

एतदेवमेवेत्याह—एवमाह त्रिलोकबन्धुः समुपचितपुण्यसंभारः, परमकारुणिकः तथाभव्यत्वनियोगात् । सम्यक् संबुद्धोऽनुत्तरबोधिबीजतः । भगवानर्हन् सत्त्वविशेष इति । एवं समालोच्य तदविरुद्धेषु अधिकृतधर्मस्थानाविरुद्धेषु समाचारेषु विचित्रेषु सम्यग् वर्तेत सूत्रनीत्या । भावमङ्गलमेतद्विधिना वर्त्तनं तन्निष्पत्तेरधिकृतसमाचारनिष्पत्तेरिति ।

**तहा जागरिज्ज[४] धम्मजागरियाए—को मम[५] कालो, किमेयस्स उचियं, असारा विसया नियमगामिणो विरसावसाणा । भीसणो मच्चू, सव्वाभावकारी, अविन्नायागमणो, अणिवारणिज्जो,**

---

१ अरिहंते K ॥ २ "युक्तमित्यर्थं साम्प्रतमिति शब्दोऽत्रावसेयः" —A टि० ॥ ३ °वत्तमविधिनास्य न जीर्यति S. । °वत्तत्त विना नाशं न जीर्यति S. विना । धर्मबिन्दुटीकायां [पृ० ४] योगशास्त्रवृत्तौ [पृ० १४७] च उद्धृतोऽयं श्लोकः, किन्तु तत्र °वत्तत्तमविनाश्य न जीर्यति इति पाठः, स च S. प्रतिपाठेन सह कथञ्चित् समानः, अतोऽस्माभिरप्यत्र °वत्तत्तमविनाश्य न जीर्यति इति पाठः समादृतः ॥ ४ जागेज्जा S, K. । जगेज्ज K1 ॥ ५ ममं K. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पुणो पुणोऽणुबंधी । धम्मो एयस्स ओसहं एगंतविसुद्धो महापुरिससेविओ सव्वहियकारी निरइयारो परमाणंदहेऊ ।**

तहा जागा(ग)रेज्जेत्यादि । तथा जागृयात् भावनिद्राविरहेण । **धर्मजागरया** तत्त्वालोचनरूपया । **को मम कालः** वयोऽवस्थारूपः । **किमेतस्योचितं** धर्माद्यनुष्ठानम् । **असारा विषयाः** तुच्छाः शब्दादयो, **नियमगामिनो** वियोगान्ताः, **विरसावसानाः** परिणामदारुणाः । तथा **भयानको मृत्युः** महाभयजननः । **सर्वाभावकारी** तत्साध्यार्थक्रियाऽभावात् । **अविज्ञातागमनः**, अदृश्यस्वभावत्वान्मृत्योः । **अनिवारणीयः** स्वजनादिबलेन । **पुनः पुनरनुबन्धी**, अनेकयोनिभावेन । **धर्म एतस्यौषधं** मृत्योर्व्याधिकल्पस्य । किंविशिष्टः ? इत्याह–**एकान्तविशुद्धः** निवृत्तिरूपः, **महापुरुषसेवितः** तीर्थकरादिसेवितः, **सर्वहितकारी** मैत्र्यादिरूपतया । **निरतिचारो** यथागृहीतपरिपालनेन । **परमानन्दहेतुः**, निर्वाणकारणमित्यर्थः ।

**नमो इमस्स धम्मस्स । नमो एयधम्मपयासयाणं । नमो एयधम्मपालयाणं । नमो एयधम्मपरूवयाणं । नमो एयधम्मपवज्जगाणं । इच्छामि अहमिणं धम्मं पडिवज्जित्तए सम्मं मणवयणकायजोगेहिं । होउ ममेयं कल्लाणं परमकल्लाणाणं जिणाणमणुभावओ । सुप्पणिहाणमेवं[१] चिंतेज्जा पुणो पुणो । एयधम्मजुत्ताणं अववायकारी सिया । पहाणं मोहच्छेयणमेयं । एवं विसुज्झमाणे विसुज्झमाणे[२] भावणाए कम्मापगमेणं उवेइ एयस्स जोग्गयं । तहा संसारविरत्ते संविग्गे भवइ अममे अपरोवयावी विसुद्धे विसुद्धमाणभावे त्ति साहुधम्मपरिभावणासुत्तं[३] समत्तं ।**

---

१ °णमेयं K1 ॥ २ °माण K1.S. ॥ ३ सुत्तं बीयं समत्तं K1 ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**णमो इमस्सेत्यादि ।** **नम एतस्मै धर्माय** अनन्तरोदितरूपाय । **नम एतद्धर्मप्रकाशकेभ्यो**ऽर्हद्भ्यः । **नम एतद्धर्मपालकेभ्यो** यतिभ्यः । **नम एतद्धर्मप्ररूपकेभ्यो** यतिभ्य एव । **नम एतद्धर्मप्रतिपत्तृभ्यः** श्रावकादिभ्यः । **इच्छाम्यहमेनं धर्मं प्रतिपत्तुम्,** अनेनैतत्पक्षपातमाह । **सम्यग् मनोवाक्काययोगैः,** अनेन तु संपूर्णप्रतिपत्तिरूपं प्रणिधिविशेषमाह । **भवतु ममैतत् कल्याणम्** अधिकृतधर्मप्रतिपत्तिरूपं **परमकल्याणानां जिनानामनुभावतः,** तदनुग्रहेणेत्यर्थः । **सुप्रणिधानमेवं चिन्तयेत् पुनः पुनः ।** एवं हि स्वाशयादेव तन्निमित्तोऽनुग्रह इति । **तथा एतद्धर्मयुक्तानां यतीनामवपातकारी स्यात्,** आज्ञाकारीति भावः । **प्रधानं मोहच्छेदनमेतत्** तदाज्ञाकारित्वम्, तन्मोहच्छेदनयोगनिष्पत्त्यङ्गतयेति हृदयम् । **एवं कुशलाभ्यासेन विशुद्ध्यमानो** विशुद्ध्यमान एतत्सेवक इति प्रक्रमः, **भावनयोक्तरूपया, कर्मापगमेन** हेतुना, **उपैति एतस्य धर्मस्य योग्यताम् ।** एतदेवाह–**तथा संसारविरक्तः** तद्दोषभावनया, **संविग्नो भवति** मोक्षार्थी, **अममः** ममत्वरहितः, **अपरोपतापी** परपीडापरिहारी, **विशुद्धः** ग्रन्थ्यादिभेदेन, **विशुद्ध्यमानभावः** शुभकण्डकवृद्ध्येति **साधुधर्मपरिभावनासूत्रं समाप्तम्,** भावतः साधुधर्मप्राप्त्युपायभूतार्थसूचकं सूत्रं समाप्तम् ।

पञ्चसूत्रकव्याख्यायां द्वितीयसूत्रव्याख्या समाप्ता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधुना तृतीयसूत्रव्याख्या प्रक्रम्यते । अस्य चायमभिसंबन्धः-अनन्तरसूत्रे जातायां धर्मगुणप्रतिपत्तिश्रद्धायां यत् कर्त्तव्यं तदुक्तम्, तच्च कुर्वता साधुधर्मः परिभावितो भवति, तस्मिन् परिभाविते यत् कर्त्तव्यं तदभिधातुमाह–

**परिभाविए साहुधम्मे, जहो[1]दियगुणे जएज्जा सम्ममेयं पडिवज्जित्तए अपरोवतावं। परोवतावो हि तप्पडिवत्तिवि[2]ग्घो। अणुपाओ खु एसो। न खलु अकुसलारंभओ हियं। अप्पडिबुद्धे कहिंचि पडिबोहेज्जा अम्मापियरे। उभयलोगसफलं जीवियं, समुदायकडा कम्मा समुदायफल त्ति। एवं सुदीहो अविओगो। अण्णहा एगरुक्खनिवासिसउणतुल्लमेयं। उद्दामो मच्चू पच्चासण्णो य। दुल्लहं मणुयत्तं समुद्दपडियरयणलाभतुल्लं। अइप्पभूया अन्ने भवा दुक्खबहुला मोहंधयारा अकुसलाणुबंधिणो अजोग्गा सुद्धधम्मस्स। जोग्गं च एयं पोयभूयं भवसमुद्दे, जुत्तं सकज्जे निउंजिउं संवरट्ठइयछिद्दं नाणकण्णधारं तवपवणजवणं। खणे [3]एस दुल्लहे सव्वकज्जोवमाईए सिद्धिसाहगधम्मसाहगत्तेण। उवादेया य एसा जीवाणं। जं न इमीए जम्मो, न जरा, न मरणं, न इट्ठविओगो, नाणिट्ठसंपओगो, न खुहा, न पिवासा, न अन्नो कोइ दोसो, सव्वहा-अपरतंतं जीवावत्थाणं असुभरागाइरहियं संतं सिवं अव्वाबाहं ति।**

**परिभाविए साधुधम्मे जहोदियगुणे** इत्यादि। **परिभाविते साधुधर्मे** अनन्तरसूत्रोदितेन विधिना, **यथोदितगुणः** संसारविरक्तः संविग्नः अममः अपरोपतापी विशुद्धः विशुद्ध्यमानभावः सन्, **यतेत सम्यग्** विधिनाऽमुं **धर्मं**

१ गुणो K1 ॥ २ विग्घं K विना ॥ ३ एस K K1 विऽा नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रतिपत्तुम्** । कथम् ? इत्याह–**अपरोपतापमिति** क्रियाविशेषणम् । किमेतदाश्रीयते ? इत्याह–**परोपतापो हि तत्प्रतिपत्तिविघ्नः,** परोपतापो यस्माद्धर्मप्रतिपत्त्यन्तरायः । एतदेवाह–**अनुपाय एवैष** धर्मप्रतिपत्तौ परोपतापः । कथम् ? इत्याह–**न खल्वकुशलारम्भतो हितम्** । अकुशलारम्भश्च धर्मप्रतिपत्तावपि परोपतापः । न चान्यस्तत्र प्रायोऽयं संभवतीति संभवपरिहारार्थमाह–**अप्रतिबुद्धौ कथञ्चित्** कर्मवैचित्र्यतः, **प्रतिबोधयेन्मातापितरौ** । न तु प्रायो महासत्त्वस्यैतावप्रतिबुद्धौ भवत इति 'कथञ्चित्' इत्याह । **उभयलोकसफलं जीवितं** 'प्रशस्यते' इति शेषः । तथा **समुदायकृतानि कर्माणि** प्रक्रमाच्छुभानि, **समुदायफलानीति,** अनेन भूयोऽपि योगाक्षेपः । तथा चाह–**एवं सुदीर्घोऽवियोगः** भवपरम्परया सर्वेषामस्माकमिति प्रक्रमः । **अन्यथैवमकरणे एकवृक्षनिवासिशकुनतुल्यमेतच्चेष्टितमिति** शेषः । यथोक्तम्–

वासवृक्षं समागम्य विगच्छन्ति यथाऽण्डजाः ।
नियतं विप्रयोगान्तस्तथा भूतसमागमः ।। [ ] ।। इत्यादि ।

एतदेव स्पष्टयन्नाह–**उद्दामो मृत्युः** अनिवारितप्रसरः, **प्रत्यासन्नश्चा**ल्पायुष्ट्वेन । तथा **दुर्लभं मनुजत्वं** भवाब्धाविति शेषः । अत एवाह–**समुद्रपतितरत्नलाभतुल्यम्,** अतिदुरापमित्यर्थः । कुतः ? इत्याह–**अतिप्रभूता अन्ये भवाः** पृथिवीकायादिसंबन्धिनः **कायस्थित्या** । यथोक्तम्–

[2]**अस्संखोसप्पिणि-सप्पिणीओ एगिंदियाण उ चउण्हं ।**
**ता चेव उ अणंता, वणस्सतीए उ बोधव्वा ।। १ ।। [बृहत्सं. ३३३]**

---

१ सत्त्वावेताव° S सं० ।। २ असंखोसप्पिणि ओसप्पिणीआ S. Aमू० ।।

"पुढवाईण भवठिई एसा मे वण्णिआ समासेण ।
एएसिं कायठिइं, उड्ढं तु अओ परं वुच्छं ।।३३२।।

व्याख्या–एषाऽनन्तरोदिता भवस्थितिः पृथिव्यादीनां समासेन संक्षेपेण वर्णिता साम्प्रतमतः परमूर्ध्वमेतेषामेव पृथिवीकायादीनां **कायस्थितिं** तमेव पृथिवीकायादिकं कायमपरित्यजतामवस्थानरूपां वक्ष्ये ।।३३२।। प्रतिज्ञातमेव निर्वाहयति—

अस्संखोसप्पिणिसप्पिणीओ एगिंदियाण य चउण्हं ।
ता चेव उ अणंता वणस्सईए उ बोधव्वा ।।३३३।।

व्याख्या—एकेन्द्रियाणां चतुर्णां पृथिव्यप्तेजोवायुरूपाणां प्रत्येकमुत्कृष्टा कायस्थितिरसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः, एतच्च कालतः परिमाणम् । एतदेव कालपरिमाणं यदा क्षेत्रतश्चिन्त्यते तदैवमवसेयम्–असङ्ख्येयेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारे यावान् कालो लगति, तावत्काल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एते च दुःखबहुला उत्कटासातवेदनीयाः, मोहान्धकाराः तदुदयतीव्रतया, अकुशलानुबन्धिनः प्रकृत्याऽसच्चेष्टाहेतुत्वेन, यत एवमतः अयोग्याः शुद्धधर्मस्य चारित्रलक्षणस्य । योग्यं चैतन्मनुजत्वम् । किंविशिष्टम् ? इत्याह–पोतभूतं भवसमुद्रे, तदुत्तारकत्वेन । यत एवमतो युक्तं स्वकार्ये नियोक्तुं धर्मलक्षणे । कथम् ? इत्याह–संवरस्थगितच्छिद्रम्, छिद्राणि प्राणातिपाताविरमणादीनि । तथा, ज्ञानकर्णधारमभीक्ष्णं तदुपयोगतः । तपःपवनजवनम् अनशनाद्यासेवनतया । एवं युक्तं स्वकार्ये नियोक्तुम् ।

किम् ? इत्यत आह–क्षण एष दुर्लभः । क्षणः प्रस्तावः । सर्वकार्योपमातीत एषः । कथम् ? इत्याह–सिद्धिसाधकधर्मसाधकत्वेन हेतुना । उपादेया चैषा जीवानां सिद्धिरेव । यन्नास्यां सिद्धौ जन्म प्रादुर्भावलक्षणम् । न जरा वयोहानिलक्षणा । न मरणं प्राणत्यागलक्षणम् । नेष्टवियोगः, तदभावात् । नानिष्टसंप्रयोगोऽत एव हेतोः । न क्षुद् बुभुक्षारूपा । न पिपासा उदकेच्छारूपा । न चान्यः कश्चिद्दोषः शीतोष्णादिः । सर्वथाऽपरतन्त्रं जीवावस्थानम् अस्यां सिद्धाविति प्रक्रमः । अशुभरागादिरहितमेतदवस्थानम् । एतदेव विशेष्यते–शान्तं शिवमव्याबाधमिति । शान्तं शक्तितोऽपि क्रोधाद्यभावेन । शिवं सकलाऽशिवाभावतः । अव्याबाधं निष्क्रियत्वेनेति ।

विवरीओ य संसारो इमीए अणवट्ठियसहावो । एत्थ खलु सुही वि असुही, संतमसंतं, सुविणे[१] व सव्वमाउलं ति । ता[२] अलमेत्थ पडिबंधेणं । करेह मे अणुग्गहं । उज्जमह एयं वोच्छिंदित्तए । अहं पि तुम्हाणुमईए साहेमि एयं निव्विण्णो

---

परिमाणपरिच्छिन्ना असङ्ख्येया उत्सर्पिण्यवसर्पिण्यः । ता एवोत्सर्पिण्यवसर्पिण्यो वनस्पतेर्वनस्पतिकायिकस्यानन्तोत्कृष्टा कायस्थितिर्बोद्धव्या । इदमपि कालतः परिमाणं । क्षेत्रतः पूर्वोक्तप्रकारेणानन्ता लोकाः, असङ्ख्येयाः पुद्गलपरावर्ताः, ते चावलिकाया असङ्ख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणा वेदितव्याः ।" इति **जिनभद्रगणिक्षमाश्रमणविरचितबृहत्संग्रहण्या मलयगिरिसूरिविरचितायां टीकायाम्** ॥

१ S. K1. K. विना–**सुविणुव्व सव्वमालमालं** ति D । **सुविणुव्व सव्वमालं** ति C. ॥
२ **अलं एत्थ** S. ॥

**जम्ममरणेहिं । समिज्झइ य मे समीहियं गुरुपभावेणं । एवं सेसे वि बोहेज्जा । तओ सम[1]मेएहिं सेवेज्ज धम्मं । करेज्जोचियकरणिज्जं निरासंसो [3]हु सव्वदा । एयं परममुणिसासणं ।**

**विवरीओ य** इत्यादि । **विपरीतश्च संसारोऽस्याः सिद्धेः,** जन्मादिरूपत्वात् सर्वोपद्रवालयः, यथाह–

जरा-मरण-दौर्गत्य-व्याधयस्तावदासताम् ।
मन्ये जन्मापि वीरस्य भूयो भूयस्त्रपाकरम् ॥ [ ]

अत एवाह–**अनवस्थितस्वभावः संसारः । अत्र खलु सुख्यप्यसुखी,** पर्यायतः । **सदप्यसत्,** पर्यायत एव । **स्वप्न इव सर्वमाकुलमास्थाऽभावेने**ति । यत एवं तदलमत्र प्रतिबन्धेन संसारे । **कुरुत ममानुग्रहम् । कथम् ?** इत्याह–**उद्यच्छतैनं व्यवच्छेत्तुं संसारं यूयम् । अहमपि युष्माकमनुमत्या साधयाम्येतद्** व्यवच्छेदनम् । किमिति अत आह–**निर्विण्णो जन्ममरणाभ्यां** संसारागामिभ्याम् । **समृध्यति च मम समीहितं संसारव्यवच्छेदनं गुरुप्रभावेन । एवं शेषाण्यपि** भार्यादीनि **बोधयेद्**औचित्योपन्यासेन । **ततः सममेभि**र्मातापित्रादिभिः **सेवेत धर्मं** चारित्रलक्षणम् । **कथम् ?** इत्याह–**निराशंस एव सर्वदा** इहलोकपरलोकाभ्याम् । **एतत् परममुनिशासनं** वीतरागवचनमित्यर्थः ।

**अबुज्झमाणेसु य कम्मपरिणईए विहेज्जा जहासत्ति तदुवकरणं आओवायसुद्धं समईए । कयण्णुया खु एसा । करुणा य धम्मप्[5]पहाणजणणी जणम्मि । तओ अणुण्णाए पडिवज्जेज्ज धम्मं । अण्णहा अणुवहे चे[6]वोवहाजुत्ते सिया । धम्माराहणं**

---

१ **संममे**° S. ॥ २ **करेज्जोचियकरणिज्जं** इत्यस्य टीकायां व्याख्या न दृश्यते ॥ ३ **हु सव्वहा** K1 । **उ सव्वहा** K. । "**हु खु** निश्चय-वितर्क-सम्भावन-विस्मये" इति सिद्धहेमशब्दानुशासने ८।२।१९८ ॥ ४ **सर्वमालमास्थाभावेन** Sमू० । **सर्वमालमालस्थाभावेन** Sसं० । "सर्वमालमालमास्थाभावेनेति क्वचित् पाठः"–Aटि० ॥ ५ °**प्पहाणा**° K. ॥ ६ **चेव उवहिजुत्ते** K. K1. विना ॥

**खु हियं सव्वसत्ताणं । तहा तहेयं संपाडेज्जा । सव्वहा अपडिवज्जमाणे चएज्ज ते अट्ठाणगिलाणोसहत्थचागनाएणं[1] ।**

**अबुज्झमाणेसु** इत्यादि । **अबुध्यमानेषु च** मातापित्रादिषु **कर्मपरिणत्या** हेतुभूतया, **विदध्यात यथाशक्ति** शक्त्यनुसारेण तदुपकरणमर्थजातादीत्यर्थः । किम् ? कारणे कार्योपचारात् । किंभूतम् ? इत्याह–**आयोपायशुद्धं स्वमत्या** । ततोऽन्यसंभूतिरायः, कलान्तरादिरुपायः । किमेतदेवं कुर्यात् ? इत्याह–**कृतज्ञतैवैषा वर्त्तते, करुणा च** । किंविशिष्टेयम् ? इत्याह–**धर्मप्रधानजननी जने**, शासनोन्नतिनिमित्तमित्यर्थः । **ततोऽनुज्ञातः** सन् मातापित्रादिभिरिति प्रक्रमः । **प्रतिपद्येत धर्मं** चारित्रलक्षणम् ।

**अन्यथैवमपि** तदनुज्ञाऽभावे, **अनुपध एव भावतः**, **उपधायुक्तः स्यात्**, व्याजवान् स्यादित्यर्थः । **उक्तं च**–

**निर्माय एव भावेन मायावांस्तु भवेत् क्वचित् ।**
**पश्येत् स्वपरयोर्यत्र सानुबन्धं हितोदयम् ॥** [ ]

---

१ **°सहचाग°** S. ॥

तुला–" **तथा–गुरुजनाद्यनुज्ञेति** ॥२३॥ (२४९)

गुरुजनो–मातापित्रादिलक्षणः, आदिशब्दात् भगिनीभार्यादिशेषसंबन्धिलोकपरिग्रहः, तस्य अनुज्ञा–प्रव्रज त्वमित्यनुमतिरूपा, विधिरित्यनुवर्त्तते ॥२३॥ यदा पुनरसौ तत्तदुपायतोऽनुज्ञापितोऽपि न मुञ्चति तदा यद्विधेयं तदाह–

**तथा तथोपधायोग** इति ॥२४॥ (२५०)

'तथा तथा' तेन तेन प्रकारेण सर्वथा परैरनुपलक्ष्यमाणेन 'उपधायोगः' मायायाः प्रयोजनम् ॥२४॥ कथमित्याह–

**दुःस्वप्नादिकथनमिति** ॥२५॥ (२५१)

दुःस्वप्नस्य–खरोष्ट्रमहिषाद्यारोहणादिदर्शनरूपस्य आदिशब्दान्मातृमण्डलादिविपरीतालोकनादिग्रहः, तस्य कथनं–गुर्वादिनिवेदनमिति ॥२५॥

**तथा–विपर्ययलिङ्गसेवेति** ॥२६॥ (२५२)

विपर्ययः–प्रकृतिविपरीतभावः स एव मरणसूचकत्वात् लिङ्गम्, तस्य सेवा–निषेवणं कार्यं येन स गुर्वादिजनः संनिहितमृत्युरयमित्यवबुध्य प्रव्रज्यामनुजानीते इति विपर्ययलिङ्गानि ॥२६॥ तेषु स्वयमेवाबुध्यमानेषु किं कृत्यमित्याह–

**दैवज्ञैस्तथा तथा निवेदनमिति** ॥२७॥ (२५३)

'**दैवज्ञैः**' निमित्तशास्त्रपाठकैः 'तथा तथा' तेन तेन निमित्तशास्त्रपाठादिरूपेणोपायेन

'निवेदनं' गुर्वादिजनस्य ज्ञापनं विपर्ययलिङ्गानामेव कार्यमिति ॥२७॥ नन्वेवं मायाविनः प्रव्रज्याप्रतिपत्तावपि को गुणः स्यादित्याशङ्कयाह—

**न धर्मे मायेति** ॥२८॥ (२५४)

'न' नैव धर्मे साध्ये माया क्रियमाणा **'माया'** वञ्चना भवति, परमार्थतोऽमायात्वात्तस्याः ॥२८॥ एतदपि कुत इत्याह—

**उभयहितमेतदिति** ॥२९॥ (२५५)

उभयस्य—स्वस्य गुर्वादिजनस्य च हितं—श्रेयोरूपम् एतद्—एवं प्रव्रज्याविधौ मायाकरणम्, एतत्फलभूतायाः प्रव्रज्यायाः स्वपरोपकारकत्वात्, पठ्यते च—"अमायोऽपि हि भावेन, माय्येव तु भवेत्क्वचित् । पश्येत्स्वपरयोर्यत्र, सानुबन्धं हितोदयम् ॥ ॥१४९॥" अथेत्थमपि कृते तं विना गुर्वादिजनो निर्वाहमलभमानो न तं प्रव्रज्यार्थमनुजानीते तदा किं विधेयमित्याशङ्कयाह—

**यथाशक्ति सौविहित्यापादनमिति** ॥३०॥ (२५६)

'यथाशक्ति' यस्य यावती शक्तिः शतसहस्रादिप्रमाणनिर्वाहहेतुद्रव्यादिसमर्पणरूपा तया सौविहित्यस्य—सौस्थ्यस्यापादनं—विधानं येन प्रव्रजितेऽपि तस्मिन्नसौ न सीदति, तस्य निर्वाहोपायस्य करणमिति भावः, एवं कृते कृतज्ञता कृता भवति, करुणा च मार्गप्रभावनाबीजं, ततस्तेनानुज्ञातः प्रव्रजेदिति ॥३०॥ अथैवमपि न तं मोक्तुमसावुत्सहते तदा—

**ग्लानौषधादिज्ञातात्त्याग इति** ॥३१॥ (२५७)

ग्लानस्य—तथाविधव्याधिबाधावशेन ग्लानिमागतस्य गुर्वादेर्लोकस्य औषधादिज्ञातात्—. औषधस्य आदिशब्दात् स्वनिर्वाहस्य च ग्रहः, तस्य गवेषणमपि औषधादीत्युच्यते, ततो ग्लानौषधाद्येव ज्ञातं—दृष्टान्तः, तस्मात् त्यागः कार्यो गुर्वादेरिति, इदमुक्तं भवति—यथा कश्चित्कुलपुत्रकः कश्चिदपारं कान्तारं गतो मातापित्रादिसमेतः तत्प्रतिबद्धश्च तत्र व्रजेत्, तस्य च गुर्वादेः तत्र व्रजतो नियमघाती वैद्यौषधादिरहितपुरुषमात्रासाध्यः तथाविधौषधादिप्रयोगयोग्यश्च महानातङ्कः स्यात्, तत्र चासौ तत्प्रतिबन्धादेवमालोचयति—यथा न भवति नियमादेष गुरुजनो नीरुक् औषधादिमन्तरेण, औषधादिभावे च संशयः कदाचित्स्यात् कदाचिन्नेति, कालसहश्चायम्, ततः संस्थाप्य तथाविधचित्रवचनोपन्यासेन तं तदौषधादिनिमित्तं स्ववृत्तिहेतोश्च त्यजन् सन्नसौ साधुरेव भवति, एष हि त्यागोऽत्याग एव, यः पुनरत्यागः स परमार्थतस्त्याग एव, यतः फलमत्र प्रधानम्, धीराश्चैतद्दर्शिन एव भवन्ति, तत औषधसंपादनेन तं जीवयेदपीति, संभवात् सत्पुरुषोचितमेतत् । एवं शुक्लपाक्षिको महापुरुषः संसारकान्तारपतितो मातापित्रादिसंगतो धर्मप्रतिबद्धो विहरेत्, तेषां च तत्र नियमविनाशकोऽप्राप्तसम्यक्त्वबीजादिना पुरुषमात्रेण साधयितुमशक्यः संभवत्सम्यक्त्वाद्यौषधो दर्शनमोहाद्युदयलक्षणः कर्मातङ्कः स्यात्, तत्र स शुक्लपाक्षिकः पुरुषो धर्मप्रतिबन्धादेवं समालोचयति, यदुत—विनश्यन्त्येतान्यवश्यं सम्यक्त्वाद्यौषधविरहेण, तत्संपादने विभाषा, कालसहानि चेमानि व्यवहारतस्ततो यावद्गृहवासं निर्वाहादिचिन्तया तथा तथा संस्थाप्य तेषां सम्यक्त्वाद्यौषधनिमित्तं स्वचारित्रलाभनिमित्तं च स्वकीयौचित्यकरणेन त्यजन् सन्नभीष्टसंयमसिद्धया साधुरेव, एष त्यागोऽत्यागस्तत्त्वभावनातः, अत्याग एव च त्यागो मिथ्याभावनातः, तत्त्वफलमत्र प्रधानं बुधानाम्, यतो धीरा एतद्दर्शिन आसन्नभव्याः, एवं च तानि सम्यक्त्वाद्यौषधसंपादनेन जीवयेदा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एवं च धर्माराधनमेव हितं सर्वसत्त्वानामिति । तथा तथैव दुःस्वप्नादि-कथनेन संपादयेद् धर्माराधनम् । सर्वथाऽप्रतिपद्यमानान् अमुनाऽपि प्रकारेण, त्यजेत्तान्** मातापित्रादीन् **अस्थानग्लानौषधार्थत्यागज्ञातेन । ज्ञातमुदाहरणम् ।**

एतदेवाह **से जहे**त्यादिना—

से जहा [१]नाम केइ पुरिसे [२]कहंचि कंतारगए [३]अम्मापिति-समेए तप्पडिबद्धे वच्चेज्जा । तेसिं तत्थ नियमघाई पुरिसमित्ता-सज्झे [४]संभवंतोसहे महायंके सिया । तत्थ से पुरिसे तप्पडि-बंधाओ [५]एवमालोचिय 'न भवंति एए नियमओ ओसहमंतरेण, ओसहभावे य संसओ, कालसहाणि [६]य एयाणि', तहा संठविय संठविय तदोसहनिमित्तं सवित्तिनिमित्तं च चयमाणे साहू । एस चाए अचाए । अचाए चेव चाए । फलमेत्थ पहाणं बुहाणं । धीरा एयदंसिणो । स ते ओसह[७]संपाडणेण जीवावेज्जा । संभवाओ पुरिसोचियमेयं ।

**तद्यथा नाम कश्चित् पुरुषो** विवक्षितः **कथञ्चित् कान्तारगतः सन् मातापितृसमेतः** भार्याद्युपलक्षणमेतत्, **तत्प्रतिबद्धो व्रजेत् । तयोर्माता-पित्रोस्तत्र** कान्तारे **नियमघाती पुरुषमात्रासाध्यः संभवदौषधः महातङ्कः स्यात् । आतङ्कः सद्योघाती रोगः । तत्रासौ पुरुषः तत्प्रतिबन्धात्**

---

त्यन्तिकम् अपुनर्मरणेनामरणावन्ध्यबीजयोगेन, संभवात् सुपुरुषोचितमेतद्, यतो दुष्प्रतिकारौ नियमान्मातापितरौ शेषश्च यथोचितं स्वजनलोकः, एष धर्मः सज्जनानां, भगवानत्र ज्ञातं परिहरन्न-कुशलानुबन्धिमातापित्रादिशोकमिति ॥३१॥" इति आचार्यश्री**हरिभद्रसूरि**विरचिते **मुनिचन्द्र-सूरि**विरचितवृत्तिसहिते **धर्मबिन्दौ** चतुर्थेऽध्याये ॥

१ **नामए** नास्ति K1 ॥ २ **कहिंचि** K ॥ ३ °**पिईस**° K. । °**पीइस**° K1 ॥ ४ **संभवओसहे** K1 K. विना ॥ ५ °**चियं** K. ॥ ६ **य** नास्ति K1 K. ॥ ७ **संपायणेण** K1 विना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मातापितृप्रतिबन्धेन एवमालोच्य 'न भवत एतौ मातापितरौ नियमत औषधमन्तरेण औषधं विना । औषधभावे च संशयः–कदाचिद् भवतोऽपि। कालसहौ चैतौ मातापितरौ' । तथा तेन वृत्त्याच्छादनादिना प्रकारेण संस्थाप्य संस्थाप्य तदौषधनिमित्तं तयोर्मातापित्रोरौषधार्थं स्ववृत्तिनिमित्तं च आत्मवृत्त्यर्थं च त्यजन् साधुः शोभनः। कथम् ? इत्याह–एष त्यागोऽत्यागः, संयोगफलत्वात् । अत्याग एव त्यागः, वियोगफलत्वात् । यदि नामैवं ततः किम् ? इत्याह—फलमत्र प्रधानं बुधानां पण्डितानाम् । धीरा एतद्दर्शिनः, निपुणबुद्धया फलदर्शिनः । स ते इत्यादि, स पुरुषः तौ मातापितरौ औषधसम्पादनेन जीवयेत्, सम्भवत्येतत् । अत एवाह–सम्भवात् पुरुषोचितमेतद् यदुतेत्थं त्याग इति । एष दृष्टान्तः ।

अयमर्थोपनय इत्याह एवमित्यादिना—

एवं सुक्कपक्खिगे महापुरिसे संसारकंतारपडिए अम्मापिइ[2]संगए धम्मपडिबद्धे विहरेज्जा । तेसिं तत्थ नियमविणासगे अपत्तबीजाइपुरिसमित्तासज्झे संभवंतसम्मत्ताइओसहे मरणाइविवागे कम्मायंके सिया । तत्थ से सुक्कपक्खिगपुरिसे धम्मपडिबंधाओ एवं समालोचिय 'विणस्संति एए अवस्सं सम्मत्ताइओसहविरहेण, [3]तस्संपायणे विभासा, कालसहाणि [4]य एयाणि ववहारओ', तहा [5]संठविय संठविय इहलोगचिंताए तेसिं सम्मत्ताइओसहनिमित्तं विसिट्ठगुरुमाइभावेणं सवित्तिनिमित्तं च किच्चकरणेण चयमाणे संयमपडिवत्तीए[6] ते साहु( हू ? )

[1] "धीराः पण्डिताः फलदृष्टिपूर्वकं क्रियादर्शिनः, 'मोक्षफलं प्रति एषा क्रिया कारणीभविष्यति' इति दर्शिन इत्यर्थः । न तु क्रियादृष्टिपूर्वकं फलदर्शिन इति" –Aटि० ॥ [2] **अम्मापीसंगए** K1 ॥ [3] **तस्स संपाडणे** K K1 विना ॥ [4] **य** नास्ति K. K1 Sसं. । दृश्यतां पृ० ४० टि० ६ । **य याणि** Sमू. । **एयाणि** Sसं० ॥ [5] **संठविय इहलोग**° KI ॥ [6] ° **त्तीए साहु** K विना ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सिद्धीए। एस चाए अचाए, तत्तभावणाओ। अचाए चेव चाए, मिच्छाभावणाओ। तत्तफलमेत्थ पहाणं बुहाणं[1] परमत्थओ। धीरा एयदंसिणो आसन्नभव्वा।**

एवं शुक्लपाक्षिको महापुरुषः परीत्तसंसार इत्यर्थः। यथोक्तम्–

जस्स[2] अवड्ढो पोग्गलपरियट्टो सेसओ य संसारो।
सो सुक्कपक्खिओ खलु, अहिगे पुण कण्हपक्खीओ ॥ [श्रावकप्रज्ञप्तौ गा० ७२]

किमयम्? इत्याह–संसारकान्तारपतितः सन् मातापितृसङ्गतः, उपलक्षणमेतत् भार्यादीनाम्, धर्मप्रतिबद्धो विहरेत्, तयोर्मातापित्रोस्तत्र संसारकान्तारे नियमविनाशकः अप्राप्तबीजादिपुरुषमात्रासाध्यः संभवत्सम्यक्त्वाद्यौषधो मरणादिविपाकः कर्मातङ्कः स्यात्, क्लिष्टं कर्मेत्यर्थः। तत्रासौ शुक्लपाक्षिकः पुरुषः धर्मप्रतिबन्धाद्धेतोः एवं समालोच्य 'विनश्यत एतौ मातापितरौ अवश्यं सम्यक्त्वाद्यौषधविरहेण सम्यक्त्वाद्यौषधाभावेन। तत्संपादने सम्यक्त्वाद्यौषधसंपादने विभाषा 'कदाचिदेतत् संपादयितुं शक्यते कदाचिन्न' इत्येवंरूपा। कालसहौ चैतौ व्यवहारतः, तथा जीवनसंभवात्, निश्चयतस्तु न। यथोक्तम्–

आयुषि बहूपसर्गे वाताहतसलिलबुद्बुदानित्यतरे।
उच्छ्वस्य निःश्वसिति यः सुप्तो वा यद्विबुध्यते तच्चित्रम् ॥' [ ]

तथा तेन सौविहित्यापादनप्रकारेण संस्थाप्य संस्थाप्य[3] इहलोकचिन्तया तयोर्मातापित्रोः सम्यक्त्वाद्यौषधनिमित्तं विशिष्टगुर्वादिभावेन धर्मकथादिभावात् स्ववृत्तिनिमित्तं च कृत्यकरणेन हेतुना त्यजन् संयमप्रतिपत्त्या तौ मातापितरौ साधुः धर्मशीलः सिद्धौ सिद्धिविषये।

किमित्येतदेवम्? इत्याह–एष त्यागोऽत्यागः, तत्त्वभावनातस्तद्धितप्रवृत्तेः। अत्याग एव त्यागः, मिथ्याभावनातस्तदहितप्रवृत्तेः। तत्त्वफलं सानुबन्धमत्र प्रधानं बुधानां परमार्थतः परमार्थेन। धीरा एतद्दर्शिन आसन्नभव्या, नान्ये।

१ बुहाणं नास्ति K1 विना ॥ २ दृश्यतां पृ० २ टि० २। यस्य अ(उ?)पार्धः पुद्गलपरिवर्तः शेषकश्च संसारः। स शुक्लपाक्षिकः खलु, अधिके पुनः कृष्णपाक्षिकः ॥ ३ संस्थाप्य इहलोकचिन्तया S. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स ते सम्मत्ताइओसहसंपाडणेण जीवावेज्जा अच्चंतियं [१]अमरणमरणावंझबीअजोगेणं । संभवाओ सुपुरिसोचियमेयं । दुप्पडियारा[२]णि अ[३]म्मापिईणि । एस धम्मो सयाणं । भगवं एत्थ नायं परिहरमाणे अकुसलाणुबंधि अम्मा[४]पिइसोगं ति । एवमपरोवतावं सव्वहा सुगुरुसमीवे, पू[५]जिऊण भगवंते वीयरागे सा[६]हू य, तोसिऊण विहवोचियं कि[७]वणाई, सुप्पउत्तावस्सगे सुविसुद्धनिमित्ते समहिवासिए विसुद्ध[८]जोगे विसुज्झमाणे महया पमोएणं सम्मं पव्वएज्जा लोगधम्मेहिंतो लोगुत्तरधम्मगमणेणं । एसा जिणाणमाणा महाकल्लाण त्ति न विराहियव्वा बुहेणं महाणत्थभयाओ सिद्धिकं[९]खिण त्ति पव्वज्जागहणविहिसुत्तं[१०] [११]समत्तं ॥

स ते इत्यादि । स शुक्लपाक्षिकः पुरुषः तौ मातापितरौ सम्यक्त्वाद्यौषधसंपादनेन जीवयेदात्यन्तिकम् । कथम् ? इत्याह–[१२]अमरणमरणावन्ध्यबीजयोगेन [१३]चरममरणावन्ध्यकारणसम्यक्त्वादियोगेनेत्यर्थः । संभवत्येतदत एवाह–संभवात् पुरुषोचितमेतद् यदुतैवं तत्त्याग इति । किमिति अत आह– दुष्प्रतिकारौ मातापितरौ इति कृत्वा । एष धर्मः सतां सत्पुरुषाणाम् । भगवानत्र ज्ञातं महावीर एव परिहरन् गर्भाभिग्रहप्रतिपत्त्याऽकुशलानुबन्धिनं तथा कर्मपरिणत्या मातापितृशोकं प्रव्रज्याग्रहणोद्भवमिति । उक्तं च–

१ अमरणावंझ° S. K1. K. विना ॥ २ °राणि अ अम्मा° S. K. K1 विना ॥ ३ °पीईणि K1 K. ॥ ४ °पीतिसोगं K. । °पीईसोगं K1. ॥ ५ पूइत्ता C. D. ॥ ६ साहूण तो° K1 ॥ ७ किवणाइ K. । किविणाइ Kसं० । किविणाई K1 ॥ ८ विसुद्धजोगे नास्ति S. K. K1 विना ॥ ९ °कंखिणे त्ति K। कंखिणो त्ति K1 ॥ १० ° सुत्तं तईयं समत्तं K1 ॥ ११ समत्तं नास्ति S. K. विना ॥ १२ अमरणावन्ध्य° –Sसं० Aसं०B ॥ १३ चमरणा° Sमू० । अमरणा° Sसं० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह सत्तमम्मि मासे गब्भत्थो चेवऽभिग्गहं गेण्हे ।
णाहं समणो होहं अम्मापियरे[2] जियंतम्मि ॥ [ आवश्यकमूलभाष्ये ५९ ]

प्रस्तुतनिगमनायाह–एवमपरोपतापं सर्वथा सम्यक् प्रव्रजेदिति योगः । विधिशेषमाह–सुगुरुसमीपे, नान्यत्र । पूजयित्वा[3] भगवतो वीतरागान् जिनान्, तथा साधून् यतीन् । तोषयित्वा[4] विभवोचितं कृपणादीन् दुःखितसत्त्वानित्यर्थः । सुप्रयुक्तावश्यकः सन्नुचितेन[5] नेपथ्यादिना सुविशुद्धनिमित्तः प्रतियोगं समभिवासितो गुरुणा गुरुमन्त्रेण विशुद्धयमानो महता प्रमोदेन लोकोत्तरेण सम्यग् भाववन्दनादिशुद्धया प्रव्रजेत् । किमुक्तं भवति ? लोकधर्मेभ्यः स(श ?)बलेभ्यः लोकोत्तरधर्मगमनेन प्रकर्षेण व्रजेदित्यर्थः । एषा जिनानामाज्ञा यदुतैवं प्रव्रजितव्यम् । इयं च महाकल्याणेति कृत्वा न विराधितव्या बुधेन, नान्यथा कर्तव्येत्यर्थः ।

कस्मात् ? इत्याह–महानर्थभयात् । नाज्ञाविराधनतोऽन्योऽनर्थः । अर्थवत्तदाराधना इति । अत एवाह–सिद्धिकाङ्क्षिणा मुक्त्यर्थिनेति । न खल्वाज्ञाराधनातोऽन्यः सिद्धिपथ इति भावनीयम् । प्रव्रज्याग्रहणविधिसूत्रं समाप्तम्, तत्त्वतः प्रव्रज्याग्रहणविध्यर्थसूचकं सूत्रं समाप्तम् ।

॥ पञ्चसूत्रकव्याख्यायां तृतीयसूत्रव्याख्या समाप्ता ॥

---

१ "गमनिका–अथ सप्तमे मासे गर्भादारभ्य तयोर्मातापित्रोर्गर्भप्रयत्नकरणेनात्यन्तस्नेहं विज्ञाय अहो ममोपर्यतीव अनयोः स्नेह इति यद्यहमनयोः जीवतोः प्रव्रज्यां गृह्णामि नूनं न भवत एतावित्यतो गर्भस्थ एव अभिग्रहं गृह्णाति, ज्ञानत्रयोपेतत्वात् । किंविशिष्टमित्याह–नाहं श्रमणो भविष्यामि मातापित्रोर्जीवतोरिति गाथार्थः ॥" इति **आवश्यकसूत्रस्य हरिभद्रसूरि**विरचितायां वृत्तौ ॥ २ °पियरंमि जीवंते" इति **आवश्यकमूलभाष्ये** पाठः ॥ ३ **पूजित्वा** S. Aमू० B ॥ ४ **तोषित्वा** S. Aमू० B ॥ ५ **समुचितेन** Aसं० B । **संमुचितेन** Aमू० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साम्प्रतं चतुर्थसूत्रव्याख्याऽऽरभ्यते । अस्य चायमभिसंबन्धः – अनन्तरसूत्रे साधुधर्मे परिभाविते यत् कर्त्तव्यं तदुक्तम्, तच्च विधिना प्रव्रज्या ग्राह्येत्येतत् । अस्य चर्यामभिधातुमाह–

**स एवमभिपव्वइए समाणे सुविहिभावओ किरियाफलेण जुज्जइ, विसुद्धचरणे महासत्ते, न विवज्जयमेइ । एयाभावेऽभिप्पेयसिद्धी उवायपवित्तीओ । नाविवज्जत्थोऽणुवाए पयट्टइ । उवाओ य उवेयसाहगो नियमेण । तस्सतत्तचाओ अण्णहा, अइप्पसंगाओ, निच्छयमयमेयं ।**

**स एवमभिपव्वइए समाणे सुविहिभावतो किरियाफलेण जुज्जती**त्यादि । **स** प्रस्तुतो मुमुक्षुः, एवमुक्तेन विधिनाऽभिप्रव्रजितः **सन् सुविधिभावतः** कारणात् **क्रियाफलेन युज्यते**, सम्यक्क्रियात्वादधिकृतक्रियायाः । स एव [1]विशेष्यते–**विशुद्धचरणो महासत्त्वः**, यत एवंभूतः अतो **न विपर्ययमेति** मिथ्याज्ञानरूपम् । **एतदभावे** विपर्ययाभावेऽ**भिप्रेतसिद्धिः** सामान्येनैव । कुतः ? इत्याह–**उपायप्रवृत्तेः** । इयमेव कुतः ? इत्याह–**नाविपर्यस्तोऽनुपाये प्रवर्त्तते** । इयमेवाविपर्यस्तस्याविपर्यस्तता यदुतोपाये प्रवृत्तिः, अन्यथा तस्मिन्नेव विपर्ययः । एवमपि किम् ? इत्याह– **उपायश्चोपेयसाधको नियमेन**, कारणं कार्याव्यभिचारीत्यर्थः, अतज्जननस्वभावस्य तत्कारणत्वायोगादतिप्रसङ्गात् । एतदेवाह–**तत्स्वतत्त्वत्याग एव** उपायस्वतत्त्वत्याग **एवान्यथा** स्वमुपेयमसाधयतः । कुतः ? इत्याह **अतिप्रसङ्गात्**, तदसाधकत्वाविशेषेणानुपायस्याप्युपायत्वप्रसङ्गात् । न चैवं व्यवहारोच्छेद आशङ्कनीय इत्याह– **निश्चयमतमेतदतिसूक्ष्मबुद्धिगम्यम्** ।

**से [3]समलेट्ठुकंचणे समसत्तुमित्ते नियत्तग्गहदुक्खे पसमसुहसमेए सम्मं सिक्खमा[4]इयइ, गुरुकुलवासी, गुरुपडिबद्धे, विणीए,**

---

१. विशिष्यते S. ॥ २ °तमेतदितिसूक्ष्म° S. विना । तुला – "निश्चयनयमतमेतदतिसूक्ष्मबुद्धिगम्यमिति **लोकोत्तमाः**" इति आचार्य**श्रीहरिभद्र**सूरिविरचितायां **ललितविस्तरायां** 'लोकोत्तम'शब्दव्याख्यायाम् ॥ ३ **लेट्ठकंचणे** K. ॥ ४ °**माईयइ** K. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूयत्थदरिसी, न इओ हियतरं[१] ति मन्नइ, सुस्सूसाइगुणजुत्ते तत्ताभिनिवेसा विहिपरे परममंतो त्ति अहिज्जइ सुत्तं बद्धलक्खे आसंसाविप्पमुक्के आययट्ठी[२]। स तमवेइ सव्वहा। तओ सम्मं निउंजइ। एयं धीराण सासणं। अण्णहा अणिओगो, अविहिगहियमंतनाएणं।

अणाराहणाए[३] न किंचि, तदणारंभओ[४] धुवं। एत्थ मग्गदेसणाए दुक्खं, अवधीरणा[५], अप्पडिवत्ती। नेवमहीयमहीयं, अवगमविरहेण। न एसा मग्गगामिणो।

विराहणा अणत्थमुहा, अत्थहेऊ, तस्सारंभओ[६] धुवं। एत्थ मग्गदेसणाए अणभिनिवेसो, पडिवत्तिमेत्तं, किरियारंभो। एवं[७] पि अहीयं अहीयं, अवगमलेसजोगओ। अयं सबीओ नियमेण। मग्गगामिणो खु एसा अवायबहुलस्स।

निरवाए जहोदिए सुत्तुत्तकारी हवइ पवयणमाइसंगए पंचसमिए तिगुत्ते। अणत्थपरे एयच्चाए अवियत्तस्स, सिसुजणणिचायनाएण। वियत्ते एत्थ केवली एयफलभूए। सम्ममेयं वियाणइ दुविहाए परिण्णाए।

से समेत्यादि। स एवमभिप्रव्रजितः समलोष्टकाञ्चनः सन् सर्वथा

१. हिअं तत्तं ति C. D. ॥ २. आययट्ठिई K1 ॥ ३ आणा° K1 S. ॥ ४ °णारंभाओ K विना ॥ ५ अवधीरणाए K1 ॥ ६ °रंभाओ K. S. विना ॥ ७ एवमहीयमहीयं K. ॥

**समशत्रुमित्रः** । एवं **निवृत्ताग्रहदुःखः**, अतः स **प्रशमसुखसमेतः** अधिकारितया **सम्यक् शिक्षामादत्ते** ग्रहणा-ऽऽसेवनारूपाम् । कथम्? इत्याह—**गुरुकुलवासी**, तदनिर्गमनेन । **गुरुप्रतिबद्धः**, तद्बहुमानात् । **विनीतो** बाह्यविनयेन । **भूतार्थदर्शी** तत्त्वार्थदर्शी । **न इतो** गुरुकुलवासात् [1]**हिततरमिति मन्यते**, वचनानुसारित्वात् । वचनं च—

[2]णाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य ।
धण्णा आवकहाए, गुरुकुलवासं ण मुंचंति ॥ [ पञ्चाशके ११।१६ ]

**स खल्वत्र शुश्रूषादिगुणयुक्तः**, शुश्रूषा-श्रवण-ग्रहण-धारणा-विज्ञाने(नो)हा-ऽपोह-तत्त्वाभिनिवेशाः प्रज्ञागुणा इत्येतद्युक्तः । **तत्त्वाभिनिवेशाद् विधिपरः सन्**, किम्? इत्याह—**परममन्त्रो** रागादिविषघ्नतयेति **कृत्वाऽधीते सूत्रं** पाठ-श्रवणाभ्याम् । किंविशिष्टः सन्? इत्याह—**बद्धलक्षोऽनुष्ठेयं प्रति, आशंसाविप्रमुक्तः** इहलोकाद्यपेक्षया, **आयतार्थी** मोक्षार्थी । **अत एव स एवंभूतः तत् सूत्रमवैति सर्वथा** याथातथ्येन । ततः किम्? इत्याह—**ततोऽवगमात् सम्यग् नियुङ्क्ते तत् सूत्रम्** । **एतद्वीराणां शासनं यदुतैवमधीतं सम्यग्**

१. हिततत्रमिति Sमू० । हिततत्वमिति Sसं० । **हितं तत्वमिति** A.B. ॥
२. गाथेयं **पञ्चवस्तुके** १३५८ **उपदेशपदे** ६८२ चाप्यस्ति । "**ज्ञानस्य** श्रुतज्ञानादेः **भवति** स्यात्, **भागी** भाजनम्, गुरुकुले वसन्निति प्रकृतम्, प्रत्यहं वाचनादिभावात् । तथा **स्थिरतरकः** पूर्वप्रतिपन्नदर्शनोऽपि सन्नतिशयस्थिरो भवति **दर्शने** सम्यक्त्वेऽन्वहं स्वसमयपरसमयतत्त्वश्रवणात् । तथा **चरित्रे** चरणे स्थिरतरो भवति, अनुवेलं वारणादिभावात् । **च**शब्दः समुच्चये । यत एवं ततो **धन्या** धर्मधनं लब्धारः **यावत्कथं** यावज्जीवम् **गुरुकुलवासं** गुरुगृहनिवसनं **न मुञ्चन्ति** न त्यजन्ति । इति गाथार्थः ।" इति **अभयदेवसूरि**विरचितायां **पञ्चाशकवृत्तौ** पृ० १८२ ॥ ३ "शुश्रूषा-श्रवण ग्रहण-धारणा-विज्ञानोहापोह-तत्त्वाभिनिवेशा **प्रज्ञागुणाः**" इति **ललितविस्तरायां** 'सरणदयाणं' इत्यस्य व्याख्यायाम् । "शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । **ऊहो**ऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥ तत्र शुश्रूषा श्रोतुमिच्छा । श्रवणमाकर्णनम् । ग्रहणं शास्त्रार्थोपादानम् । धारणमविस्मरणम् । **ऊहो**ऽविज्ञातमर्थमवलम्ब्यान्येषु तथाविधेषु व्याप्त्या वितर्कणम् । अपोह उक्ति-युक्तिभ्यां विरुद्धादर्थाद् हिंसादिकात् प्रत्यपायसम्भावनया व्यावर्तनम् । अथवा **ऊहः** सामान्यज्ञानम्, अपोहो विशेषज्ञानम् । अर्थविज्ञानमूहापोहयोगाद् मोह-सन्देह-विपर्यासव्युदासेन ज्ञानम् । तत्त्वज्ञानमूहापोहविज्ञानविशुद्धम् 'इदमित्थमेव' इति निश्चयः । शुश्रूषादिभिर्हि उपाहितप्रज्ञाप्रकर्षः पुमान् न कदाचिदकल्याणमाप्नोति । एते च बुद्धिगुणा यथासम्भवं द्रष्टव्याः ॥" इति **योगशास्त्रस्वोपज्ञवृत्तौ** प्रथमप्रकाशे पृ० १५३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नियुक्त**मिति। अन्यथाऽविध्यध्ययनेऽ**नियोग**:, नियोगादन्योऽनियोगः, [1]विपर्ययानि(न्नि ?)योग इत्यर्थः । अत एवाह–**अविधिगृहीतमन्त्रज्ञातेन**, तत्रापि ग्रहादिभावाद्विपर्ययात्[2] नियोग एव ।

**अनाराधनायामेका**[3]**न्तेन(ना)प्रवृत्तस्य न किञ्चिदिष्टमनिष्टं वा फल** मोक्षोन्मादादि । सदनुष्ठानं हि मोक्षफलमेव । यथोक्तम्–

श्रामण्यस्य फलं मोक्षः प्रधानमितरत् पुनः ।
तत्त्वतोऽफलमेवेह ज्ञेयं कृषिपलालवत् ॥ [ ]

भङ्गस्याप्युन्मादाद्येव । यथोक्तम्

"[4]उम्मादं व लभेज्जा रोगातङ्कं व पाउणे दीहं ।
केवलिपण्णत्ताओ धम्माओ वा वि भंसेज्जा" ॥ [आव० नि० १४१४]

न पुनरसम्यक्त्वमेव ।

कथमत्र 'अनाराधनायां न किञ्चित्' ? इत्याह–**तदनारम्भतो ध्रुवम्**, तत्त्वतस्तस्यानारम्भात् । न[5] चान्यस्मिन्नेवोद्भवत्यतिप्रसङ्गात् । इहैव लिङ्गमाह–**अत्रानाराधनायाम्, मार्गदेशनायां** तात्त्विकायां **दुःखं श्रृण्वतो भवति** । उक्तं च–

शुद्धदेशना हि क्षुद्रसत्त्वमृगयूथसंत्रासनसिंहनादः । [ललितविस्तरा पृ० ६]

तथा **अवधीरणा** मनाग्लघुतरकर्मणः, न दुःखम् । तथा **अप्रतिपत्तिस्ततो**ऽपि लघुतरकर्मणः, नावधीरणा । ततः किम् ? इत्याह–**नैवमनाराधनयाऽधीतमधीतं सूत्रं** तत्त्वतः । कुतः ? इत्याह–**अवगमविरहेण** सम्यगवबोधाभावेन । **नैषा मार्गगामिन** एकान्तमनाराधना भवति, सम्यक्त्वादिभावे सर्वथा सत्क्रियायोगात् ।

---

१ **विपर्ययानियोग** Sमू० A.B. । **विपर्ययोनियोग** Sसं० । अत्र '**विपर्ययो[ऽ]नियोगः**' इति अथवा '**विपर्यया[द]नियोगः**' इति पाठोऽपि कदाचित् संभवेत् ॥ २ °**यात् योग एव** Sमू० A.B ॥ ३. °**न्तेन प्रस्तुतस्य** Sमू० । Sमू० विना °**न्तेन प्रवृत्तस्य** इत्येवं यद्यपि सर्वेषु हस्तलिखितादर्शेषु पाठ उपलभ्यते तथापि °**न्तेनाप्रवृत्तस्य** इति पाठः समीचीनो भाति । '**अनाराधनायाम्**' इति पदस्य 'एकान्तेनाप्रवृत्तस्य' इत्याशयोऽत्र ज्ञेयः । पृ० ४९ पं० १ मध्ये '**विराधना** प्रक्रमादध्ययनस्य' इति वक्ष्यते, तदनुसारेणात्र यदि '**प्रस्तुतस्य** अध्ययनस्य एकान्तेन अनाराधनायाम्' इति विवक्षा भवेत् तदा तु °**न्तेन प्रस्तुतस्य** इति Sमू०-पाठोऽत्र समीचीनो भातीति ध्येयम् ॥ ४. व्याख्या–"खेत्तादिगो उम्माओ, चिरकालिओ रोगो, आसुघाती आयंको, एतेण वा पावेज्जा, धम्माओ भंसेज्जा, मिच्छदिट्ठी वा भवति, चरित्ताओ वा परिवडइ ॥" इति **आवश्यकसूत्रस्य हरिभद्रसूरिविरचितायां वृत्तौ** ॥ ५. **न चान्यस्मिन्नेवाद्भवत्य**°' S । अत्र S. अनुसारेण **न चान्यस्मिन्नेवा[न्य]द्भवत्य**° इत्यपि पाठः कदाचित् स्यात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत एवाह–**विराधनेत्यादि । विराधना** प्रक्रमादध्ययनस्य **अनर्थमुखा**[1] उन्मादादिभावेन । अ(इ ?)यं च गुरुतरदोषापेक्षयाऽर्थहेतुः, पारम्पर्येण मोक्षाङ्गमेवेत्यर्थः । कुतः ? इत्याह–**तस्यारम्भाद् ध्रुवम्**, मोक्षगमनस्यैवारम्भात्, कण्टक-ज्वर-मोहोपेतमार्गगन्तृवत् । उक्तं च–

मुनेर्मार्गप्रवृत्तिर्या, सा सदोषाऽपि सैव हि ।
[2]कण्टक-ज्वर-सन्मोहयुक्तस्येव सदध्वनि ॥ [ ]

एतद्भावे लिङ्गमाह–**अत्र** विराधनायां सत्यां **मार्गदेशनायां** पारमार्थिकायाम**नभिनिवेशः** शृण्वतो भवति, हेयोपादेयतामधिकृत्य । यथाह–

समेषु स्खलन्नन्ध-बधिरवन्मूकवच्च रूपादिषु, तथा सन्मोहात् [ ] इति ।

तथा **प्रतिपत्तिमात्रं** मनाग् विराधकस्य, नानभिनिवेशः । तथा **क्रियारम्भोऽल्पतरविराधकस्य**, न प्रतिपत्तिमात्रम् । **एवं किम् ?** इत्याह –**एवमपि** विराधनयाऽ**धीतमधीतं सूत्रं** भावतः । कुतः ? इत्याह –**अवगमलेशयोगतः** सम्यगवबोधलेशयोगेन । **अयं सबीजो नियमेन** विराधकः, सम्यग्दर्शनादियुक्त इत्यर्थः । कुतः ? इत्याह–**मार्गगामिन एवैषा** विराधना, प्राप्तबीजस्येति भावः । न सामान्येनैव, किं तर्हि ? **अपायबहुलस्य**[3] निरुपक्रमक्लिष्टकर्मवतः ।

---

१ ° **मुखानुन्मादादि** ° S । ° **मुखानन्मादादि** ° Amू० । ° **मुखा उन्मादादि** ° Asं०॥

२ तुला––"विघ्नजयस्त्रिविधः खलु विज्ञेयो हीनमध्यमोत्कृष्टः । मार्ग इह कण्टक-ज्वर-मोहजयसमः प्रवृत्तिफलः ॥३।९॥" इति **आचार्यश्री हरिभद्र**सूरिविरचिते **षोडशकप्रकरणे** ॥

"अपायमेवाधिकृत्य परमतसंवादमाह–

**कण्टक-ज्वर-मोहैस्तु समो विघ्नः प्रकीर्तितः ।**
**मोक्षमार्गप्रवृत्तानामत एवापरैरपि** ॥३७४॥

**कण्टक-ज्वर-मोहैस्तु** कण्टकेन ज्वरेण मोहेन च पुनः **सम**स्तुल्यः **विघ्नः** प्रत्यूहो जघन्य-मध्यमोत्कृष्टभेदभिन्नः **प्रकीर्तितो** निरूपितः **मोक्षमार्गप्रवृत्तानां** सम्यग्दर्शनाद्याराधनावहितात्मनाम् **अत एव** योगनिरनुबन्धत्वादेव हेतोः **अपरैरपि** योगिभिः, न केवलमस्माभिरित्य**पि**शब्दार्थः । यथा हि केषांचित् पथिकानां क्वचित् पाटलिपुत्रादौ गन्तुं प्रवृत्तानां कण्टक-ज्वर-मोहैरभिभूतानां यथाक्रमं स्तोक-बहु-बहुतरकालं गमनभङ्गहेतुर्विघ्नः सम्पद्यते एवं योगिनामपि सिद्धिपथप्रस्थितानां तथाविधकर्मोदयात् त्रिप्रकारोऽन्तरायः समुपजायत इति ॥३७४॥" इति सटीके **योगबिन्दौ** ॥

३ यद्यपि S.A.B. हस्तलिखितादर्शेषु अत्र ° **बहुलस्यानिरुपक्रम** ° इति पाठ उपलभ्यते तथापि ° **बहुलस्य निरुपक्रम** ° इति पाठ एवात्र समीचीनः । तुला––"अथापायमेव व्याचष्टे––

**अपायमाहुः कर्मैव निरपायाः पुरातनम् ।**
**पापाशयकरं चित्रं निरुपक्रमसंज्ञकम्** ॥३७२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरपायो यथोदितः मार्गगामीति प्रक्रमः। एतदेवाह–सूत्रोक्तकारी भवति सबीजो निरपायः। प्रवचनमातृसङ्गतः, सामान्येन तद्युक्तः। विशेषेणै-तदेवाह – पञ्चसमितः त्रिगुप्तः। ईर्यासमित्याद्याः समितयः पञ्च, मनोगुप्त्या-द्याश्च तिस्रो गुप्तय इति। सम्यग्ज्ञानपूर्वकमेवमित्याह–अनर्थपरश्चारित्रप्राणक्षरणेन एतत्त्यागः प्रवचनमातृत्यागः। सम्यगेतद्विजानातीति योगः। कस्यानर्थपर एतत्त्यागः? इत्याह–अव्यक्तस्य भावबालस्य। केनोदाहरणेन? इत्याह–शिशु-जननीत्यागज्ञातेन, शिशोर्बालस्य जननीत्यागोदाहरणेन, स हि तत्त्यागाद् विनश्यति। व्यक्तोऽत्र कः? इत्याह–व्यक्तोऽत्र भावचिन्तायां केवली सर्वज्ञः, एतत्फलभूतः प्रवचनमातृफलभूतः। सम्यग् भावपरिणत्या एतद्विजानात्यन-न्तरोदितम्। एतदेवाह–द्विविधया परिज्ञया ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च। ज्ञपरिज्ञाऽवबोधमात्ररूपा, प्रत्याख्यानपरिज्ञा तद्गर्भक्रियारूपा।

तहा आसासपयासदीवं संदीणाऽथिराइभेयं। असंदीण-थिरत्थमुज्जमइ। जहासत्तिमसंभंते अणूसगे, असंसत्तजोगाराहए भवइ। उत्तरुत्तरजोगसिद्धीए मुच्चइ पावकम्मुण त्ति विसुज्झमाणे आभवं भावकिरियमाराहेइ। पसमसुहमणुहवइ अपीडिए संजम-तवकिरिआए, अव्वहिए परीसहोवसग्गेहिं, वाहियसुकिरिया-नाएणं।

तहा आसासेत्यादि। तथा आश्वासप्रकाशद्वीपं दीपं वा 'सम्यग् विजानाति' इति वर्त्तते। किंविशिष्टम्? इत्याह–स्पन्दनवदस्थिरादिभेदम्। इह भवाब्धावाश्वासद्वीपः, मोहान्धकारे दुःखगहने प्रकाशदीपश्च। तत्राद्यः स्पन्दनवान-स्पन्दनवांश्च, प्लावनवानप्लावनवांश्चेत्यर्थः। इतरोऽपि स्थिरोऽस्थिरश्च, अप्रति-

---

अपायमाहुः कर्मैव नापरं किञ्चित् निरपाया उपरतसकलक्लिष्टादृष्टाः तीर्थकरादयः पुरातनं प्राक्कालोपार्जितं पापाशयकरं मोक्षपथप्रतिकूलचित्तवृत्तिहेतुः चित्रं नानारूपं निरुपक्रमसंज्ञकम्, उपक्रमणम् उपक्रमः सर्वत उच्छेदः, ततो वास्तविकविपाकसामर्थ्यहरणम्, ततो विशिष्टानुष्ठानमिष्टयोग-मपि, निर्गतमुपक्रमान्निरुपक्रमम्, तत् संज्ञा नाम यस्य तत् तथा ॥३७३॥" इति सटीके योगबिन्दौ ॥

१ °प्रकाशदीपं द्वीपं वा S.॥ २. दृश्यतां पं० ५, ९ पृ. ४६ पं० १५॥

३ "जहा से दीवे असंदीणे एवं से धम्मे आरियपदेसिए" इति आचाराङ्ग-सूत्रे षष्ठेऽध्ययने तृतीय उद्देशके। "द्विर्गता आपोऽस्मिन्निति द्वीपः, स च द्रव्यभावभेदाद् द्वेधा–तत्र द्रव्यद्वीप आश्वासद्वीपः, आश्वास्यतेऽस्मिन्नित्याश्वासः, आश्वा-सश्चासौ द्वीपश्चाश्वासद्वीपः, यदिवा आश्वसनमाश्वासः, आश्वासाय द्वीप आश्वासद्वीपः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाती प्रतिपाती चेत्यर्थः । अयं च यथासंख्यं मानुष्ये क्षायोपशमिक-क्षायिक-चारित्ररूपः, क्षायोपशमिक-क्षायिकज्ञानरूपश्च । उभयत्राद्यो नाक्षेपेणेष्टसिद्धये, सप्रत्यपायत्वात् । चरमस्तु सिद्धये, निष्प्रत्यपायत्वात् । सम्यगेतद् विजानाति ।

न केवलं विजानाति, अस्पन्दनवत्-स्थिरार्थमुद्यमं करोति सूत्रनीत्या । कथम् ? इत्याह–यथाशक्ति शक्त्यनुरूपम्, असंभ्रान्तो भ्रान्तिरहितः, अनुत्सुक औत्सुक्यरहितः फलं प्रति । असंसक्तयोगाराधको भवति, निःसपत्नश्रामण्यव्यापारकर्त्ता, सूत्रानुसारित्वात् । सूत्रं च–

---

तत्र नदीसमुद्रबहुमध्यप्रदेशे भिन्नबोहित्थादयस्तमवाप्याश्वसन्ति । असावपि द्वेधा सन्दीनोऽसन्दीनश्चेति, यो हि पक्षमासादावुदकेन प्लाव्यते स सन्दीनः, विपरीतस्त्वसन्दीनः सिंहलद्वीपादिः, यथा हि सांयात्रिकास्तं द्वीपमसन्दीनमुदन्वदादेरुत्तितीर्षवः समवाप्याश्वसन्ति एवं तं भावसंधानायोत्थितं साधुमवाप्यापरे प्राणिनः समाश्वस्युः । यदिवा दीप इति प्रकाशदीपः, प्रकाशाय दीपः प्रकाशदीपः, स चादित्य-चन्द्र-मण्यादिरसन्दीनः, अपरस्तु विद्युदुल्कादिः सन्दीनः, यदिवा प्रचुरेन्धनतया विवक्षितकालावस्थाय्यसन्दीनः, विपरीतस्तु सन्दीन इति, यथा ह्यसौ रथपुटाद्यावेदनतो हेयोपादेय-हानोपादानवतां निमित्तभावमुपयाति तथा कश्चित्समुद्राद्यन्तर्वर्त्तिनामाश्वासकारी च भवति एवं ज्ञानसंधानायोत्थितः परीषहोपसर्गाक्षोभ्यतयाऽसन्दीनः साधुर्विशिष्टोपदेशदानतोऽपरेषामुपकारायेति । अपरे भावद्वीपं भावदीपं वा अन्यथा व्याचक्षते, तद्यथा–भावद्वीपः सम्यक्त्वम्, तच्च प्रतिपातित्वा-दौपशमिकं क्षायोपशमिकं च संदीनो भावद्वीपः, क्षायिकं त्वसन्दीन इति, तं द्विविधमवाप्य परीतसंसारत्वात् प्राणिन आश्वसन्ति । भावदीपस्तु सन्दीनः श्रुतज्ञानम्, असंदीनस्तु केवलमिति, तच्चावाप्य प्राणिनोऽवश्यमाश्वसन्त्येवेति । अथवा धर्म्मं संदधानः समुत्थितः सन्नरते-र्दुष्प्रधृष्यो भवतीत्युक्ते कश्चिच्चोदयेत्–किम्भूतोऽसौ धर्म्मो यत्सन्धानाय समुत्थित इति, अत्रोच्यते, यथाऽसौ द्वीपोऽसन्दीनः–असलिलप्लुतोऽवरुग्णवहनानामितरेषां च बहूनां जन्तूनां शरण्यतया आश्वासहेतुर्भवत्येवमसावपि धर्म्मः 'आर्यप्रदेशितः' तीर्थंकरप्रणीतः कष-ताप-च्छेद-निर्घटितोऽसन्दीनः, यदिवा कुतर्काप्रधृष्यतयाऽसन्दीनः–अक्षोभ्यः प्राणिनां त्राणायाश्वासभूमि-र्भवति ।" इति **शीलाचार्य**विरचितायाम् **आचाराङ्गसूत्रटीकायाम्** पृ० २४७-२४८ ॥

१ 'यथासङ्ख्य'शब्देन स्पन्दनवदस्थिरादिभेदो द्वीपो दीपश्च ग्राह्यः ॥ २ "क्षायोपशमिक-क्षायिकचारित्रयोः स्पन्दनवदस्पन्दनवत्पदवाच्ययोर्मध्येऽस्पन्दनवत्पदेन क्षायिकचारित्रमुच्यते इति । तथा स्थिरा-ऽस्थिरपदवाच्ययोः क्षायिक-क्षायोपशमिकज्ञानयोर्मध्ये स्थिरपदेन क्षायिकज्ञानं केवलज्ञानरूपं गृह्यते । ततस्तदुभयावाप्त्यै यतेत्यर्थः (यतत इत्यर्थः ?)" -Aटि० ॥ ३ **उभयत्राद्यो नाक्षेपेणेष्टसिद्धये** इति हस्तलिखितादर्शेषु पाठः । अत्र यदि **न अक्षेपेणेष्ट-सिद्धये** इति पदच्छेदः स्वीक्रियते तदा **क्षेपः** कालविलम्बः इत्यर्थः, 'न अविलम्बेन, किन्तु विल-म्बेन इष्टसिद्धये' इत्याशयः । यदि तु **'न आक्षेपेण इष्टसिद्धये'** इति **'अनाक्षेपेण इष्टसिद्धये'** इति वा पदच्छेदः स्वीक्रियते तदा 'इष्टसिद्धिं साक्षान्नाक्षिपति, किन्तु परम्परया इष्टसिद्धिर्भवति' इत्याशयो भवेत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]जोगो जोगो जिणसासणम्मि दुक्खक्खया पउंजंतो ।
अण्णोण्णमबाहंतो असवत्तो होइ कायव्वो ॥ [ओघनि० २७६]

**एवमुत्तरोत्तरयोगसिद्ध्या धर्मव्यापारसिद्ध्येत्यर्थः । किम् ? इत्याह– मुच्यते पापकर्मणा तत्तद्गुणप्रतिबन्धकेन इति एवं विशुद्ध्यमानः सन् आभवं आजन्म आसंसारं वा भावक्रियां निर्वाणसाधिकामाराधयति निष्पादयत्यौचित्यारम्भनिर्वहणरूपाम् । तथा प्रशमसुखमनुभवति तात्त्विकम् । कथम् ? इत्याह– अपीडितः [1]संयम-तपःक्रियया आश्रवनिरोधा-ऽनशनादिरूपया । तथा अव्यथितः सन् परीषहोपसर्गैः क्षुद्-दिव्यादिभिः । कथमेतदेवम् ? इति**

---

१ "**जोगो जोगो जिणसासणंमि दुक्खक्खया पउंजंतो ।**
**अण्णोण्णमबाहाए असवत्तो होइ कायव्वो ॥२७७॥**

योगो योग इति वीप्सा, ततश्च व्यापारो जिनशासने प्रयुज्यमानो दुःखक्षयाय 'प्रयुज्यमानः' क्रियमाणः, कथम् ? 'अन्योऽन्याबाधया' परस्परापीडया, एतदुक्तं भवति–यथा क्रिया क्रियमाणाऽन्येन क्रियान्तरेण न बाध्यते एवमन्योऽन्याबाधया प्रयुज्यमानः 'असवत्तो' असपत्नः अविरुद्धो भवति कर्त्तव्य इति । इदानीं फलं प्रदर्शयन्नाह—

**जोगे जोगे जिणसासणंमि दुक्खक्खया पउंजंते ।**
**एक्किक्कंमि अणंता वट्टंता केवली जाया ॥२७८॥**

सुगमा । नवरम् एकैकस्मिन् 'योगे' व्यापारे वर्त्तमाना अनन्ताः केवलिनो जाताः ॥" इति **द्रोणाचार्यविरचितायाम् ओघनिर्युक्तिटीकायाम्** ॥

१ "इमे ते खलु बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइया, जे भिक्खू सोच्चा नच्चा जेच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विहन्नेज्जा, तंजहा– दिगिंछापरीसहे १, पिवासापरीसहे २, सीयपरीसहे ३, उसिणपरीसहे ४, दंसमसयपरीसहे ५, अचेलपरीसहे ६, अरइपरीसहे ७, इत्थीपरीसहे ८, चरियापरीसहे ९, निसीहियापरीसहे १०, सेज्जापरीसहे ११, अक्कोसपरीसहे १२, वहपरीसहे १३, जायणापरीसहे १४, अलाभपरीसहे १५, रोगपरीसहे १६, तणफासपरीसहे १७, जल्लपरीसहे १८, सक्कारपुरक्कारपरीसहे १९, पन्नापरीसहे २०, अन्नाणपरीसहे २१, दंसणपरीसहे २२" इति उत्तराध्ययनसूत्रे द्वितीयाध्ययने ॥२॥

"क्षुत्-पिपासा-शीतोष्ण-दंशमशक-नाग्न्या-ऽरति-स्त्रीचर्या-निषद्या-शय्या-ऽऽक्रोश-वध-याचना-ऽलाभ-रोग-तृण-स्पर्श-मल-सत्कारपुरस्कार-प्रज्ञा-ऽज्ञान-दर्शनानि ॥" इति **तत्त्वार्थाधिगमसूत्रे** ९।९ ।

"चउव्विहा उवसग्गा पन्नत्ता, तंजहा–दिव्वा, माणुसा, तिरिक्खजोणिया, आतसंचेयणिज्जा १। दिव्वा उवसग्गा चउव्विहा पन्नत्ता, तंजहा–हासा, पओसा, वीमंसा, पुढोवेमाता २ । माणुसा उवसग्गा चउव्विधा पन्नत्ता, तंजहा–हासा, पओसा, वीमंसा, कुसीलपडिसेवणया ३ । तिरिक्खजोणिया उवसग्गा चउव्विहा पन्नत्ता, तंजहा–भता, पदोसा, आहारहेउं, अवच्चलेणसारक्खणया ४। आतसंचेयणिज्जा उवसग्गा चउव्विहा पन्नत्ता, तंजहा–घट्टणता, पवडणता, थंभणता, लेसणता ५ ।" इति **स्थानाङ्गसूत्रे** सू० ३६१। "उपसर्जनानि उपसृज्यते वा–धर्मात् प्रच्याव्यते जन्तुरेभिरित्युपसर्गा बाधाविशेषाः, ते च कर्तृभेदाच्चतुर्विधाः, आह च–"उवसज्जणमुवसग्गो तेण तओ य उवसिज्जए जम्हा । सो दिव्वमणुयतेरिच्छआयसंचेयणाभेओ ॥१॥" [ विशेषावश्यकभाष्ये गा० ३५५२ ] इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**निदर्शनमाह–व्याधितसुक्रियाज्ञातेन, रोगितस्य शोभनक्रियोदाहरणेन ।**

**एतदेवाह–**

## से जहा[2] केइ महावाहिगहिए, अणुभूयतव्वेयणे, विण्णाया

आत्मना संचेत्यन्ते क्रियन्त इत्यात्मसंचेतनीयाः, तत्र दिव्या हास त्ति हासाद्भवन्ति हाससम्भूतत्वाद्वा हासा उपसर्गा एवेत्येवमन्यत्रापि, यथा भिक्षार्थं ग्रामान्तरप्रस्थितक्षुल्लकैर्व्यन्तर्या उपयाचितं प्रतिपन्नं यदीप्सितं लप्स्यामहे तदा तवोण्डेरकादि दास्याम इति, लब्धे च तत्र तवेदमिति भणित्वा तदुण्डेरकादि तैः स्वयमेव भक्षितं, देवतया च हासेन तद्रूपमावृत्य क्रीडितम्, अनागच्छत्सु च क्षुल्लकेषु व्याकुले गच्छे निवेदितमाचार्याणां देवतया क्षुल्लकवृत्तम्, ततो वृषभैरुण्डेरकादि याचित्वा तस्यै दत्तं, तया तु ते दर्शिता इति । प्रद्वेषाद्यथा सङ्गमको महावीरस्योपसर्गानकरोत् । विमर्षात् यथा क्वचिद्देवकुलिकायां वर्षासूषित्वा साधुषु गतेषु तदीय एवान्यः पश्चादागतस्तत्रोषितः, तं च देवता किंस्वरूपोऽयमिति विमर्षादुपसर्गितवतीति । पृथग्–भिन्ना विविधा मात्रा–हासादिवस्तुरूपा येषु ते पृथग्विमात्राः, अथवा पृथग् विविधा मात्रा विमात्रा, तया, इत्येतल्लुप्ततृतीयैकवचनं पदं दृश्यम्, तथाहि–हासेन कृत्वा प्रद्वेषेण करोतीत्येवं संयोगाः, यथा सङ्गमक एव विमर्षेण कृत्वा प्रद्वेषेण कृतवानिति, तथा मानुष्या हासात्, यथा गणिकादुहिता क्षुल्लकमुपसर्गितवती, सा च तेन दण्डेन ताडिता, विवादे च राज्ञः श्रीगृहदृष्टान्तो निवेदितस्तेनेति । प्रद्वेषाद्यथा गजसुकुमारः सोमिलब्राह्मणेन व्यपरोपितः । विमर्षाद्यथा चाणक्योक्तचन्द्रगुप्तेन धर्मपरीक्षार्थं लिङ्गिनोऽन्तःपुरे धर्ममाख्यापिताः क्षोभिताश्च, साधवस्तु क्षोभितुं न शकिता इति । कुशीलम्–अब्रह्म, तस्य प्रतिषेवणं कुशीलप्रतिषेवणम्, तद्भावः कुशीलप्रतिषेवणता उपसर्गः, कुशीलस्य वा प्रतिषेवणं येषु ते कुशीलप्रतिषेवणकाः, अथवा कुशीलप्रतिषेवणयेति व्याख्येयम्, यथा सन्ध्यायां वसत्यर्थं प्रोषितस्येर्ष्यालोर्गृहे प्रविष्टः साधुश्चतसृभिरीर्ष्यालुजायाभिर्दत्तावासः प्रत्येकं चतुरोऽपि यामानुपसर्गितो न च क्षुभितः । तथा तैरश्चा भयात् श्वादयो दशेयुः । प्रद्वेषाच्चण्डकौशिको भगवन्तं दष्टवान् । आहारहेतोः सिंहादयः । अपत्य-लयनसंरक्षणाय काकादयः उपसर्गयेयुरिति । तथा आत्मसंचेतनीयाः घट्टनता घट्टनया वा, यथाऽक्षिणि रजः पतितं ततस्तदक्षि हस्तेन मलितं दुःखितुमारब्धमथवा स्वयमेवाक्षिणि गले वा मांसाङ्कुरादि जातं घट्टयति इति । प्रपतनया वा, यथा अप्रयत्नेन सञ्चरतः प्रपतनात् दुःखमुत्पद्यते । स्तम्भनता स्तम्भनया वा यथा तावदुपविष्टः स्थितो यावत् सुप्तः पादादिः स्तब्धो जातः । श्लेषणता श्लेषणया वा यथा पादमाकुञ्च्य स्थितो वातेन तथैव पादो लगित इति । भवन्ति चात्र गाथाः–“हास १ पदोस २ वीमंसओ ३ विमायाय ४ वा भवे दिव्वो । एवं चिय माणुस्सो कुसीलपडिसेवण चउत्थो ॥१॥ तिरिओ भय १ प्पओसा २ ऽऽहारा ३ वच्चादिरक्खणत्थं वा ४ । घट्टण १ थंभण २ पवडण ३ लेसणओ वाऽऽयसंचेओ ४ ॥२॥ दिव्वंमि वंतरी १ संगमे २ गजइ ३ लोभणादीया ४ । इत्युत्तरार्द्धम्, गणिया १ सोमिल २ धम्मोवएसणे ३ सालुजोसियाईया ४ । तिरियंमि साण १ कोसिय २ सीहा ३ अविरनुविप्पगवाई ४ ॥३॥ कणुग १ कुडणा २ भिपयणाइ ३ गत्तसंलेसणादओ ४ नेया । आओदाहरणा वाय १ पित्त २ कफ ३ सन्निवाया वा ॥४॥ [विशेषावश्यकभाष्ये गा. ३५५३–३५५४, ३५५८–३५६०] इति” इति **अभयदेव**सूरिविरचितायां **स्थानाङ्ग**टीकायाम् ॥

१ °**तस्य सुक्रिया**° S. विना ॥ २ **जहा नामए केइ** S. K. विना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सरूवेण, निव्विण्णे तत्तओ, सुवेज्जवयणेण सम्मं तमवगच्छिय जहाविहाणओ पवन्ने सुकिरियं, निरुद्धजहिच्छाचारे, तुच्छपत्थभोई मुच्चमाणे वाहिणा नियत्तमाणवेयणे समुवलब्भारोग्गं[1] पवड्ढमाणतब्भावे, तल्लाभनिव्वुईए तप्पडिबंधाओ सिराखाराइजोगे वि वाहिसमारोग्गविण्णाणेण[2] इट्ठनिप्फत्तीओ अणाकुलभावयाए किरिओवओगेण, अपीडिए[3], अव्वहिए, सुहलेस्साए वड्ढइ, वेज्जं च बहु मन्नइ ।

**से** जहेत्यादि । तद्यथा—कश्चित् **सत्त्वो महाव्याधिगृहीतः** कुष्ठादिग्रस्त इत्यर्थः । **अनुभूततद्वेदनः**, अनुभूतव्याधिवेदनः । **विज्ञाता स्वरूपेण** वेदनायाः, न कण्डूगृहीतकण्डूयनकारिवद् विपर्यस्तः । **निर्विण्णस्तत्त्वतः** तद्वेदनयेति प्रक्रमः । ततः किम् ? इत्याह—**सुवैद्यवचनेन** हेतुभूतेन **सम्यग**वैपरीत्येन **तं** व्याधिम**वगम्य यथाविधानतो** यथाविधानेन देवतापूजादिलक्षणेन, **प्रपन्नः सुक्रियां** परिपाचनादिरूपाम्, **निरुद्धयदृच्छाचारः** सन् प्रत्यपायभयात्, तथा **तुच्छपथ्यभोजी** व्याध्यानुगुण्यतः, अनेन प्रकारेण **मुच्यमानो व्याधिना** खसराद्यपगमेन, **निवर्त्तमानवेदनः** कण्ड्वाद्यभावात्, **समुपलभ्यारोग्यं** सदुपलम्भेन, **प्रवर्द्धमानतद्भावः** प्रवर्द्धमानारोग्यभावः, **तल्लाभनिर्वृत्या** आरोग्यलाभनिर्वृत्या, **तत्प्रतिबन्धात्** आरोग्यप्रतिबन्धाद्धेतोः, **शिराक्षारादियोगेऽपि** शि[4]रावेधक्षारपातभावेऽपीत्यर्थः । **व्याधिशमारोग्यविज्ञानेन**, व्याधिशमाद् यदारोग्यं तदवबोधेनेत्यर्थः । किम् इत्याह—**इष्टनिष्पत्ते**रारोग्यनिष्पत्तेर्हेतोर**नाकुलभावतया** निबन्धनाभावात्, तथा **क्रियोपयोगेन** इतिकर्त्तव्यतायां बोधेन हेतुना, **अपीडितः**, **अव्यथितो** निवातस्थानाऽऽसनौषधपानादिना । किम् ? इत्याह—**शुभलेश्यया** प्रशस्तभावरूपया **वर्द्धते**

---

१ °**रोगं** S. K. ॥ २ °**रोग**° S. ॥ ३ **अपीडिए** नास्ति K. ॥ ४ द्रश्यतां **सुश्रुतसंहितायां** तृतीये शारीरस्थानेऽष्टमेऽध्याये सिराव्यधविधौ, तथा प्रथमे सूत्रस्थाने एकादशेऽध्याये क्षारपाकविधौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृद्धिमाप्नोति । तथा वैद्यं च बहु मन्यते, महापायनिवृत्तिहेतुरयं ममेति सम्यग् ज्ञानात् । एष दृष्टान्तः ।

अयमर्थोपनयः—

एवं कम्मवाहिगहिए, अणुभूयजम्माइवेयणे, विण्णाया दुक्खरूवेणं, निव्विण्णे तत्तओ तओ, सुगुरुवयणेण अणुट्ठाणाइणा तमवगच्छिय पुव्वुत्तविहाणओ पवन्ने सुकिरियं पवज्जं, निरुद्धपमायचारे, असारसुद्धभोई, मुच्चमाणे कम्मवाहिणा, नियत्तमाणिट्ठवियोगाइवेयणे, समुवलब्भ [१]चरणारोग्गं पवड्ढमाणसुहभावे, तल्लाभ[२]निव्वुईए तप्पडिबंधविसेसओ परीसहोवसग्गभावे वि तत्तसंवेयणाओ [३]कुसलसिद्धीए थिरासयत्तेण धम्मो[४]वओगाओ सया थिमिए तेउल्लेसाए वड्ढइ, गुरुं च बहु मन्नइ जहोचियं असंगपडिवत्तीए, [५]निसग्गपवित्तिभावेण एसा [६]गुरू वियाहिया भावसारा विसेसओ भगवंतबहुमाणेणं । जो मं पडिमन्नइ से गुरुं ति तयाणा । अन्नहा किरिया अकिरिया कुलडानारीकिरियासमा, गरहिया तत्तवेईणं, [७]अफलफलजोगओ । विसन्न[८]तत्तीफलमेत्थ नायं । आवट्टे खु तप्फलं असुहाणुबंधे ।

एवमित्यादि । एवं कर्मव्याधिगृहीतः प्राणी । किंविशिष्टः ? इत्याह—अनुभूतजन्मादिवेदनः । आदिशब्दाज्जरा-मरणादिग्रहः । विज्ञाता दुःख-

१ °रोगं S. ॥ २ °निव(व्व ?)त्तीए K. ॥ ३ कुसलसुद्धीए थिरा० K. । कुसलसिद्धिओ थिरा° S. । कुसलासयवुड्ढी थिरा° C. D. ॥ ४ °वओगओ K1 ॥ ५. णिस्संगप° S. ॥ ६. गुरु विया° K । गुरुई S.C.D. ॥ ७ अफलजोगओ S. K. K1 विना ॥ ८ °तेत्ती° S. K. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रूपेण** जन्मादिवेदनायाः, न तु तत्रैवासक्त्या विपर्यस्त इति। ततः किम्? इत्याह–**निर्विण्णस्तत्त्वतः ततो** जन्मादिवेदनायाः। किम्? इत्याह–**सुगुरुवचनेन** हेतुना**ऽनुष्ठानादिना** उपायेन **तमवगम्य** सुगुरुं कर्मव्याधिं च, **पूर्वोक्तविधानतस्तृतीयसूत्रोक्तेन** विधानेन **प्रपन्नः** सन् **सुक्रियां प्रव्रज्याम्, निरुद्धप्रमादचारो** यदृच्छया, **असारशुद्धभोजी** संयमानुगुण्येन, अनेन विधिना **मुच्यमानः कर्मव्याधिना, निवर्त्तमानेष्टवियोगादिवेदनस्तथा** मोहनिवृत्त्या, किम्? इत्याह–**समुपलभ्य चरणारोग्यं** सदुपलम्भेन, **प्रवर्द्धमानशुभभावः** प्रवर्द्धमानचरणारोग्यभावः बहुतरकर्मव्याधिविकारनिवृत्त्या **तल्लाभनिवृत्त्या** **तत्प्रतिबन्धविशेषात्**[2] चरणारोग्यप्रतिबन्धविशेषात्, स्वाभाविकात् कारणात्, **परीषहोपसर्गभावेऽपि** क्षुद्-दिव्यादिव्यसनभावेऽपि, **तत्त्वसंवेदनात्** सम्यग्ज्ञानाद्धेतोः, तथा **कुशलसिद्ध्या**[1] क्षायोपशमिकभाववृद्ध्या, **स्थिराशयत्वेन** चित्तस्थैर्येण हेतुना, तथा **धर्मोपयोगात्** इतिकर्तव्यताबोधात् कारणात्, **सदा स्तिमितः** भावद्वन्द्वविरहात् **प्रशान्तः**। किम्? इत्याह–**तेजोलेश्यया** शुभप्रभावरूपया **वर्द्धते** वृद्धिमनुभवति, **गुरुं च बहु मन्यते** भाववैद्यकल्पम्, कथम्? इत्याह–**यथोचितमौचित्येन, असङ्गप्रतिपत्त्या** स्नेहरहितै[3]तद्भावप्रतिपत्त्या। किमस्या उपन्यासः? इत्याह–**निसर्गप्रवृत्तिभावेन** सांसिद्धिकप्रवृत्तित्वेन हेतुना, **एषाऽसङ्गप्रतिपत्तिर्गुर्वी व्याख्याता** भगवद्भिः, किम्? इत्यत आह–**भावसारा** तथौदयिकभावविरहेण **विशेषतः** असङ्गप्रतिपत्तेः। इहैव युक्त्यन्तरमाह–**भगवद्बहुमानेन** अचिन्त्यचिन्तामणिकल्पतीर्थकरप्रतिबन्धेन। कथमयम्? इत्याह–**यो मां प्रतिमन्यते** भावतः **स गुरुमित्येवं तदाज्ञा** भगवदाज्ञा, इत्थं तत्त्वं व्यवस्थितम्।

**अन्यथेत्यादि**। **अन्यथा** गुरुबहुमानव्यतिरेकेण **क्रिया**[4] उपधिप्रत्युपेक्षणादिरूपा **अक्रिया** सत्क्रियातोऽन्या। किंविशिष्टा? इत्याह–**कुलटानारीक्रियासमा** दुःशीलवनितोपवासक्रियातुल्या। ततः किम्? इत्याह–**गर्हिता तत्त्ववेदिनां** विदुषाम्। कस्मात्? इत्याह–**अ**[5]**फलफलयोगतः**, इष्टफलादन्यदफलम्, मोक्षात् सांसारिकमित्यर्थः, तद्योगात्। एतदेव स्पष्टयन्नाह–**विषान्न**-

१ कुशलाशद्ध्या Sमू० । कुशलाशयवृद्ध्या Sसं० A. B. । दृश्यतां पृ० ५५ पं० ११ टि० ३ ॥ २ तत्प्रतिबन्धात् S. ॥ ३ °तस्तद्भाव° S. ॥ ४ क्रियाप्यक्रिया प्रत्युपे S. विना ॥ ५ अफलयोगतः S. विना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृप्तिफलमत्र ज्ञातमल्पं विपाकदारुणम्, विराधनासेवनात् । एतदेवाह— आवर्त्त एव तत्फलम्, आवर्त्तन्ते प्राणिनोऽस्मिन्नित्यावर्त्तः संसारः, स एव तत्त्वतः तत्फलं विराधनाविषजन्यम् । किंविशिष्ट आवर्त्तः ? इत्याह—अशुभानुबन्धः, तथा तथा विराधनोत्कर्षेण ।

एवं सफलं गुर्वबहुमानमभिधाय तद्बहुमानमाह आयत इत्यादिना—

**आयओ गुरुबहुमाणो अवंझकारणत्तेण । अओ परमगुरुसंजोगो । तओ सिद्धी असंसयं । एसेह सुहोदए, पगिट्ठतयणुबंधे, भववाहितेगिच्छी । न इओ सुंदरं परं । उवमा एत्थ न विज्जई । से एवंपण्णे एवंभावे एवंपरिणामे अप्पडिवडिए वड्ढमाणे तेउ[१]लेसाए दुवालसमासिएणं परियाएणं अइक्कमइ स[२]व्वदेवतेउलेसं । एवमाह महामुणी । तओ सुक्के सुक्काभिजाई भवइ । [३]पायं छिण्णकम्माणुबंधे । खवइ लोगसण्णं । पडिसोयगामी, अणुसोय[४]नियत्ते, सया सुहजोगे, [५]एस जोगी वियाहिए । एस आराहगे सामण्णस्स । [६]जहागहियपइण्णे सव्वोवहासुद्धे संधइ सुद्धगं भवं सम्मं अभवसाहगं भोगकिरिया-सुरूवाइकप्पं । तओ ता संपुण्णा पाउणइ अविगलहेउभावओ असंकिलिट्ठसुहरूवाओ अपरोवताविणीओ [७]सुंदराओ अणुबंधेणं । न य अण्णा संपुण्णा, तत्तत्तखंडणेणं ।**

आयतो गुरुबहुमानः, साद्यपर्यवसितत्वेन, दीर्घत्वादायतो मोक्षः, स गुरुबहुमानः, गुरुभावप्रतिबन्ध एव मोक्ष इत्यर्थः । कथम् ? इत्याह—अवन्ध्य-

१ लेस्साए S. ॥ २ °लेस्सं S. ॥ ३ पाइच्छित्तकम्मा° K. ॥ ४ °नित्ते S.मू० । °निवित्ते Sसं० C. D. ॥ ५ एस नास्ति S. K1 K. । 'एस जोगी वियाहिए आराहगे सामण्णस्स' इत्ययमपि S. K. K1 पाठः सुन्दर एव भाति ॥ ६ अहा° K1 ॥ ७ °रा अणु A B ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणत्वेन मोक्षं प्रत्यप्रतिबद्धसामर्थ्यहेतुत्वेन । एतदेवाह–**अतः परमगुरुसंयोगः**, अतो गुरुबहुमानात्तीर्थकरसंयोगः । **ततः** संयोगादुचिततत्संबन्धत्वात् **सिद्धिरसंशयं** मुक्तिरेकान्तेन, यतश्चैवमतः **एषोऽत्र शुभोदयो गुरुबहुमानः**, कारणे कार्योपचारात्, यथाऽऽयुर्घृतमिति । अयमेव विशेष्यते–**प्रकृष्टतदनुबन्धः** प्रधानशुभोदयानुबन्धः, तथा तथाराधनोत्कर्षेण । तथा **भवव्याधिचिकित्सकः** गुरुबहुमान एव, हेतुफलभावात् । **न इतः सुन्दरं परं** गुरुबहुमानात् । उपमात्र न विद्यते गुरुबहुमाने, सुन्दरत्वेन भगवद्बहुमानादित्यभिप्रायः । **स एवंप्रज्ञः**, **स** तावदधिकृतप्रव्रजितः, **एवंप्रज्ञो** विमलविवेकात् । **एवंभावः**, विवेकाभावेऽपि प्रकृत्या । **एवंपरिणामः** सामान्येन गुर्वभावेऽपि क्षयोपशमान्माषतुषवत् । यथोक्तम्–

**विवेक-शुभभाव-परिणामा वचन-गुरु-तदभावेषु यमिनाम् [ ] इति ।**

---

१ "नन्वविज्ञातसुवचनविनियोगानामपि केषांचिच्छास्त्रे चारित्ररूपः शुभपरिणामः श्रूयते, स कथं तेषाम् ? इत्याशंकयाह—

**मासतुसादीयाण उ मग्गणुसारित्तओ सुहो चेव ।**
**परिणामो विन्नेओ सुहोहसण्णाणजोगाओ ॥१९३॥**

माषतुषादिकानां त्वागमप्रसिद्धानां जडसाधूनां पुनर्जीवाजीवादितत्त्वगोचरव्यक्तश्रुतोपयोगाभावेऽपि मार्गानुसारित्वतस्तीव्रमिथ्यात्वमोहनीयक्षयोपशमभावात्, इह च मार्गश्चेतसोऽवक्रगमनं भुजङ्गगमननलिकायामतुल्यो विशिष्टगुणस्थानावाप्तिप्रगुणः स्वरसवाही जीवपरिणतिविशेषस्तमनुसरति तच्छीलश्च यः स तथा, तद्भावस्तत्त्वं तस्मात्, शुभश्चेव परिशुद्ध एव व्यावृत्तविपर्यासदुःख एव परिणामो विज्ञेयः । ननु मार्गानुसारित्वेऽपि बठरतया कथं तत्परिणामशुद्धिरित्याशंक्याह—शुभौघसंज्ञानयोगात् शुभमविपर्यस्तमोघेन सामान्येन सुबहुविशेषावधारणाक्षमं यत्संज्ञानं वस्तुतत्त्वसंवेदनरूपं तस्य योगात् । ते हि बहिर्बहु श्रुतमपठन्तोऽपि अतितीक्ष्णसूक्ष्मप्रज्ञतया बहुपाठकस्थूलप्रज्ञपुरुषानुपलब्धं तत्त्वमवबुध्यन्त इति । तदुक्तं—"स्पृशन्ति शरवत्तीक्ष्णाः स्वल्पमन्तर्विशन्ति च । बहुस्पृशापि स्थूलेन स्थीयते बहिरश्मवत् ॥१॥"

कथानकसम्प्रदायश्चैवम्—

बभूव कश्चिदाचार्यो गुणरत्नमहानिधिः । श्रुतमत्यर्थिशिष्यालिसेव्यमानक्रमाम्बुजः ॥१॥ सूत्रार्थपाथसां दाने महाम्भोद इवाश्रमः । संघादिकार्यभाराणां निस्तारे धुर्यसन्निभः ॥२॥ तस्यैवान्योऽभवद् भ्राता विशिष्टश्रुतवर्जितः । स्वेच्छया स्थाननिद्रादेः कर्त्ता स्वार्थपरायणः ॥३॥ तत्र सूरिः क्वचित्कार्ये श्रान्तः सन् मुग्धबुद्धिभिः । अज्ञातावसरैः शिष्यैर्व्याख्यानं कारितः किल ॥४॥ ततोऽसौ श्रान्तदेहत्वाद् व्याख्यायामक्षमत्वतः । चित्तखेदं जगामात्र चिन्तयामास चेदृशम् ॥५॥ धन्योऽयं पुण्यवानेष मद्भ्राता निर्गुणो यतः । सुखमास्ते सुखं शेते पारतंत्र्यविवर्जितः ॥६॥ वयं पुनरधन्या ये स्वगुणैरेव वश्यताम् । परेषां प्रापिताः स्थातुं सुखेन न लभामहे ॥७॥ एवं

चिन्तयता तेन निबद्धं कर्म सूरिणा । ज्ञानावरणमत्युग्रमज्ञानादिनिमित्ततः ॥८॥ नालोचितं च तत्तेन ततो मृत्वा दिवं गतः । ततोऽप्यसौ च्युतः क्वापि सत्कुले जन्म लब्धवान् ॥९॥ कालेन साधुसम्पर्काद् बुद्धोऽसौ जिनशासने । सद्गुरूणां समीपेऽथ प्रवव्राज विरागतः ॥१०॥ ततोऽसौ सूरिपादान्तेऽधीते सामायिकश्रुतम् । उदीर्णं च तकत् तस्य कर्म जन्मान्तरार्जितम् ॥११॥ तस्योदयाद् न शक्नोति ग्रहीतुं पदमप्यसौ । प्रपठन्नप्यविश्रामं बहुमानयुतोऽपि सन् ॥१२॥ ततः सूरिरशक्तं तं पाठे ज्ञात्वा तपोधनम् । सामायिकश्रुतस्यार्थं तं संक्षेपादपीपठत् ॥१३॥ यथा मा रुष्य मा तुष्येत्येवमेव स भक्तितः । घोषयामास तत्रापि विस्मृतिस्तस्य जायते ॥१४॥ ततो महाप्रयत्नेन संस्मृत्य किल किञ्चन । तत्रासौ घोषयामास तुष्टो मासतुषेत्यलम् ॥१५॥ ततस्तद्घोषणाज्जित्यं माषतुषेत्यभिख्यया । ख्यातिं नीतो महात्मासौ बालिशैः क्रीडनापरैः ॥१६॥ अदोऽपि विस्मरत्येष यदा मोहात्तदा तकम् । शून्यचित्तमवाञ्चं च हसन्तो बालका जगुः ॥१७॥ अहो माषतुषः साधुरेष मौनेन तिष्ठति । एवमुक्तः स तैर्मेने साधु भो स्मारितं मम ॥१८॥ ततोऽधीते तदेवासौ मन्यमानोऽत्यनुग्रहम् । साधवस्तु तथा श्रुत्वा वारयन्ति स्म सादराः ॥१९॥ शिक्षयन्ति स्म तं साधो मा रुष्येत्यादि घोषय । अतः प्रमोदमापन्नो घोषयामास तत्तथा ॥२०॥ एवं सामायिकाद्यर्थेऽप्यशक्तो गुरुभक्तितः । ज्ञानकार्यमसौ लेभे कालतः केवलश्रियम् ॥२१॥१९३॥

अथामुमेव शुभौघसंज्ञानयोगमेषां भावयन्नाह—

**रुद्दो खलु संसारो सुद्धो धम्मो तु ओसहमिमस्स ।**
**गुरुकुलसंवासे सो निच्छयओ णायमेतेणं ॥१९४॥**

रौद्रो विषविकारादिवद्दारुणः, खलुरवधारणे, संसारो नरनारकादिभ्रमणरूपः सर्वशरीरसाधारणः पारमार्थिकव्याधिस्वभावतामापन्नो यतः, ततः शुद्धो धर्म एव पञ्चनमस्कारस्मरणादिरूप औषधं निवृत्तिहेतुरस्य संसारस्य । यथोक्तम् —"पंचनमोक्कारो खलु विहिदाणं सत्तिओ अहिंसा य । इंदियकसायविजओ एसो धम्मो सुहपओगो ॥१॥" एवमवगते यदेष पुनर्निर्णीतवान् तदाह --गुरुकुलसंवासे गुरोरुक्तलक्षणस्य कुलं परिवारस्तत्र सम्यक् तद्गतमर्यादया वासे सति स शुद्धो धर्मो निश्चयतः परमार्थवृत्त्या सम्पद्यते । अनिश्चयरूपस्तु कृत्रिमसुवर्णसदृशः परीक्षामक्षममाणोऽन्यथापि स्यात् । न च तेन किञ्चित्, संसारफलत्वेनासारत्वादिति ज्ञातमेतेन माषतुषादिना साधुजडेनापि सता ॥१९४॥

कुत एतदेवमिति चेदुच्यते—

**जं कुणति एवमेवं तस्साणं सव्वहा अलंघंतो ।**
**एगागिमोयणम्मिवि तदखंडण मो इहं णायं ॥१९५॥**

यद्यस्मात् कुरुते एवं निश्चयतः, एवं गुरुकुलसंवासं माषतुषादिः । कीदृश इत्याह—तस्य गुरोराज्ञामिच्छा-मिथ्याकारादिपरिपालनरूपां सर्वथा मनसा वाचा कायेन च अलंघयन्ननतिक्रामन् । नन्वेकाकिनस्तस्य किमित्याह—एकाकिमोचनेऽपि कुतोऽप्यशिवादिपर्यायादेकाकिनोऽपरसाधुसाहाय्यरहितस्य क्वचिद् ग्रामनगरादौ गुरुणा स्थापने सत्यपि तदखण्डना गुर्वाज्ञानुल्लंघना वर्त्तते 'मो' इति प्राग्वत् । अयमत्राभिप्रायः—बहुसाधुमध्ये लज्जाभयादिभिरपि भवत्येव गुर्वाज्ञानुल्लंघनम् । यदा त्वसौ एकाकितया मुक्तोऽपि गुरुकुलवासप्रवृत्तां समाचारीं सर्वामनुवर्त्तते, तदा ज्ञायते निश्चयतो गुरुकुलसंवासवानसौ, तत्साध्यस्य क्रियाकलापस्य सर्वथाऽखण्डनात्, इह गुर्वाज्ञानुल्लंघने ज्ञातं दृष्टान्तो ज्ञेयम् ॥१९५॥"

इति आचार्यश्री **हरिभद्रसूरि**विरचिते **मुनिचन्द्रसूरि**विरचितवृत्तिसहिते **उपदेशपदे** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एवमप्रतिपतितः सन् वर्द्धमानस्तेजोलेश्यया नियोगतः, शुभप्रभावरूपया । किम्? इत्याह–द्वादशमासिकेन पर्यायेण एतावत्कालमानया प्रव्रज्ययेत्यर्थः, अतिक्रामति सर्वदेवतेजोलेश्यां सामान्येन शुभप्रभावरूपाम्। क एवमाह? इत्याह–एवमाह महामुनिर्भगवान् महावीरः। तथा चागमः–**

**[1]जेमे अज्जत्ताए समणा णिग्गंथा एते णं कस्स तेउलेसं वीतिवयंति? गोयमा! मासपरियाए समणे णिग्गंथे वाणमंतराणं देवाणं तेउलेसं वीइवयइ। एवं दुमासपरियाए समणे णिग्गंथे असुरिंदवज्जिआणं भवणवासीणं देवाणं तेउलेसं वीतीवयति। तिमासपरियाए समणे णिग्गंथे असुरकुमारिंदाणं देवाणं तेउलेसं वीतीवयति। चउमासपरियाए समणे णिग्गंथे गहगण-णक्खत्त-तारारूवाणं जोतिसियाणं तेउलेसं वीतीवयति। पंचमासपरियाए समणे णिग्गंथे चंदिम-सूरियाणं जोतिसिंदाणं तेउलेसं वीतीवयति। छम्मासपरियाए समणे णिग्गंथे सोहम्मीसाणाणं देवाणं तेउलेसं वीतीवयति। सत्तमासपरियाए समणे णिग्गंथे सणंकुमार-माहिंदाणं देवाणं तेउलेसं वीतीवयति। अट्ठमासपरियाए समणे णिग्गंथे बंभलोग-लंतगाणं देवाणं तेउलेसं वीतीवयति। णवमासपरियाए समणे णिग्गंथे महासुक्क-सहस्साराणं देवाणं तेउलेसं वीतीवयति। दसमासपरियाए समणे णिग्गंथे आणय-पाणय–**

---

१ "जे इमे भंते! अज्जताए समणा निग्गंथा विहरंति एते णं कस्स तेयलेस्सं वीतीवयंति? गोयमा! मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं तेयलेस्सं वीइवयंति, दुमासपरियाए समणे निग्गंथे असुरिंदवज्जियाणं भवणवासीणं देवाणं तेयलेस्सं वीयीवयंति, एवं एएणं अभिलावेणं तिमासपरियाए समणे नि० असुरकुमाराणं देवाणं तेय०, चउम्मासपरियाए सगहनक्खत्ततारारूवाणं जोतिसियाणं देवाणं तेय०, पंचमासपरियाए य सचंदिमसूरियाणं जोतिसिंदाणं जोतिसरायाणं तेय०, छम्मासपरियाए समणे सोहम्मीसाणाणं देवाणं०, सत्तमासपरियाए सणंकुमारमाहिंदाणं देवाणं०, अट्ठमासपरियाए बंभलोगलंतगाणं देवाणं तेय०, नवमासपरियाए समणे महासुक्कसहस्साराणं देवाणं तेय०, दसमासपरियाए आणयपाणयआरणच्चुयाणं देवाणं०, एक्कारसमासपरियाए गेवेज्जगाणं देवाणं०, बारसमासपरियाए समणे निग्गंथे अणुत्तरोववाइयाणं देवाणं तेयलेस्सं वीयीवयंति, तेण परं सुक्के सुक्काभिजाए भवित्ता तओ पच्छा सिज्झति जाव अंतं करेति। सेवं भंते! सेवं भंते त्ति जाव विहरति (सूत्रं ५३७) ॥१४-९॥

'जे इमे' इत्यादि, ये इमे प्रत्यक्षाः 'अज्जत्ताए'त्ति आर्यतया पापकर्म्मबहिर्भूततया अद्यतया वा–अधुनातनतया वर्त्तमानकालतयेत्यर्थः 'तेयलेस्सं'ति तेजोलेश्यां–सुखासिकां, तेजोलेश्या हि प्रशस्तलेश्योपलक्षणम्, सा च सुखासिकाहेतुरिति कारणे कार्योपचारात्तेजोलेश्याशब्देन सुखासिका विवक्षितेति, 'वीइवयंति' व्यतिव्रजन्ति व्यतिक्रामन्ति। '**असुरिंदवज्जियाणं**'ति चमरबलिवर्जितानाम्। 'तेण परं'ति ततः संवत्सरात्परतः 'सुक्के'त्ति शुक्लो नाम भिन्नवृत्तोऽमत्सरी कृतज्ञः सदारम्भी हितानुबन्ध इति; निरतिचारचरण इत्यन्ये, 'सुक्काभिजाइ'त्ति शुक्लाभिजात्यः परमशुक्ल इत्यर्थः, अत एवोक्तम्—"आकिञ्चन्यं मुख्यं ब्रह्मापि परं सदागमविशुद्धम्। सर्वं शुक्लमिदं खलु नियमात्संवत्सरादूर्ध्वम् ॥१॥" एतच्च श्रमणविशेषमेवाश्रित्योच्यते न पुनः सर्व एवैवंविधो भवतीति ॥ चतुर्दशशते नवमः ॥१४-९॥ इति **अभयदेवसूरि**विरचितवृत्तिसहिते **भगवतीसूत्रे** ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरण-ऽच्चुयाणं देवाणं तेउलेस्सं वीतीवयति । एक्कारसमासपरियाए समणे णिग्गंथे गेविज्जाणं देवाणं तेउलेसं वीतीवयति । बारसमासपरियाए अणुत्तरोववातियाणं देवाणं तेउलेसं वीतीवयति । तेण परं सुक्के सुक्काभिजाती [1]भवित्ता सिज्झति, जाव अंतं करेति । [ भगवती० १४।९ ]

[2]अत्र तेजोलेश्या चित्तसुखलाभलक्षणा । अत एवाह–ततः **शुक्ल[ः] शुक्लाभिजात्यो भवति** । तत्र शुक्लो नामाभिन्नवृत्तोऽमत्सरी कृतज्ञः सदारम्भी हितानुबन्ध इति । शुक्लाभिजात्यश्चैतत्प्रधानः । **प्रायश्छिन्नकर्मानुबन्धः**, न तद्वेदयंस्तथाविधमन्यद् बध्नाति । **प्रायो**ग्रहणमचिन्त्यत्वात् कर्मशक्तेः कदाचिद् बध्नात्यपि । स एवंभूतः **क्षपयति लोकसंज्ञां** भगवद्वचनप्रतिकूलां प्रभूतसंसाराभिनन्दिसत्त्वक्रियाप्रीतिरूपामिति । अत एवाह–**प्रतिस्रोतोगामी** लोकाचारप्रवाहनदीं प्रति । **अनुस्रोतोनिवृत्तः** एनामेवाधिकृत्य, एतदभ्यासत एव, न्याय्यं चैतत् । यथोक्तम्—

[3]अणुसोयपट्ठिए बहुजणंमि पडिसोयलद्धलक्खेणं ।
पडिसोयमेव अप्पा दायव्वो होउकामेणं ।
अणुसोयसुहो लोगो पडिसोओ आसवो सुविहियाणं ।
अणुसोओ संसारो पडिसोओ तस्स णिप्फेण ।।
[दशवैकालिके गा. ५६१–५६२]

---

१ भविता S. Aमू० ।। २ 'अत्र तेजोलेश्या चित्तसुखलाभलक्षणा' इति पाठः S मध्ये Aमू० मध्ये च नास्ति ।।

३ "अणुसोयपट्ठिए बहुजणम्मि पडिसोयलद्धलक्खेणं ।
पडिसोयमेव अप्पा दायव्वो होउकामेणं ।।५६१।।
अणुसोयसुहो लोगो पडिसोओ आसवो सुविहियाणं ।
अणुसोओ संसारो पडिसोओ **तस्स उत्तारो** ।।५६२।।"

इति दशवैकालिकसूत्रस्य द्वितीयायां चूलिकायाम् । अगस्त्यसिंहसूरिकृतायां **दशवैकालिकचूर्णौ 'तस्स उत्तारो'** इत्यस्य स्थाने **'तस्स निप्फेडो'** इति पाठः । वृद्धविवरणे तु **'तस्स निग्घाडो'** इति पाठः । अस्य गाथाद्वयस्य आचार्यश्री हरिभद्रसूरिकृता व्याख्या—"**अनुस्रोतःप्रस्थिते** नदीपूरप्रवाहपतितकाष्ठवद् विषयकुमार्गद्रव्यक्रियानुकूल्येन प्रवृत्ते **बहुजने** तथा विद्याभ्यासात् प्रभूतलोके तथा प्रस्थानेन उदधिगामिनि, किमित्याह—**प्रतिस्रोतोलब्धलक्ष्येण** द्रव्यतस्तस्यामेव नद्यां कथञ्चिद् देवतानियोगात् प्रतीपस्रोतःप्राप्तलक्ष्येण, भावतस्तु विषयादिवैपरीत्यात् कथञ्चिदवाप्तसंयमलक्ष्येण **प्रतिस्रोत एव** दुरपाकरणीयमप्यपाकृत्य विषयादि संयमलक्ष्याभिमुखमेव **आत्मा** जीवो **दातव्यः** प्रवर्त्तयितव्यः **भवितुकामेन** संसारसमुद्रपरिहारेण मुक्ततया भवितुकामेन साधुना, न क्षुद्रजनाचरितान्युदाहरणीकृत्यासन्मार्गप्रवणं चेतोऽपि कर्तव्यम्, अपि त्वागमैकप्रवणेनैव भवितव्यमिति । उक्तं च—"निमित्तमासाद्य यदेव किञ्चन स्वधर्ममार्गं विसृजन्ति बालिशाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एवं सदा शुभयोगः** श्रामण्यव्यापारसङ्गतः। **एष योगी व्याख्यातः।** एवंभूतो भगवद्भिर्योगी प्रतिपादितः। यथोक्तम्—

सम्यक्त्वज्ञानचारित्रयोगः सद्योग उच्यते।
एतद्योगाद्धि योगी स्यात् परमब्रह्मसाधकः॥ [ ]

**एष एवंभूत आराधकः श्रामण्यस्य,** निष्पादकः श्रमणभावस्य। यथागृहीतप्रतिज्ञः, आदित आरभ्य सम्यक्प्रवृत्तेः। एवं **सर्वोपधाशुद्धो** निरतिचारत्वेन। किम्? इत्याह–**संधत्ते** घटयति, **शुद्धं भवं** जन्मविशेषलक्षणं भवैरेव। अयमेव विशेष्यते–**सम्यगभवसाधकम्,** सत्क्रियाकरणेन मोक्षसाधकमित्यर्थः। निदर्शनमाह–**भोगक्रिया-सुरूपादिकल्पम्,** न रूपादिविकलस्यैताः सम्यग् भवन्ति। यथोक्तम्–

'रूपवयोवैचक्षण्यसौभाग्यमाधुर्यैश्वर्याणि भोगसाधनम् [ ] इति।

**ततस्ताः संपूर्णाः प्राप्नोति** सुरूपादिकल्पाद् भवाद् भोगक्रिया इत्यर्थः। कुतः? इत्याह–**अविकलहेतुभावतः** कारणादिति। किंविशिष्टाः? इत्याह–**असंक्लिष्टसुखरूपाः,** न्यूनताऽभावेन संक्लेशाभावात्। तथा **अपरोपतापिन्यो** वैचक्षण्यादिभावेन। तथा **सुन्दरा अनुबन्धेना**ऽत एव हेतोः। **न चान्याः संपूर्णा** उक्तलक्षणाभ्यो भोगक्रियाभ्यः। कुतः? इत्याह—**तत्त्वखण्डनेन,** संक्लेशादिभ्य उभयलोकापेक्षया भोगक्रियास्वरूपखण्डनेनेति भावः।

---

तपःश्रुतज्ञानधनास्तु साधवो न यान्ति कृच्छ्रे परमेऽपि विक्रियाम्॥१॥" तथा–"कपालमादाय विपन्नवाससा वरं द्विषद्वेश्मसमृद्धिरीक्षिता। विहाय लज्जां न तु धर्मवैशसे सुरेन्द्रता(सा)र्थेऽपि समाहितं मनः॥२॥" तथा–"पापं समाचरति वीतघृणो जघन्यः प्राप्यापदं सघृण एव विमध्यबुद्धिः। प्राणात्ययेऽपि न तु साधुजनः स्ववृत्तं वेलां समुद्र इव लङ्घयितुं समर्थः॥३॥" इत्यलं प्रसङ्गेन। इति सूत्रार्थः।

अधिकृतमेव स्पष्टयन्नाह—**अनुस्रोतःसुखो लोकः** उदकनिम्नाभिसर्पणवत् प्रवृत्त्यानुकूलविषयादिसुखो लोकः, कर्मगुरुत्वात्। **प्रतिस्रोत एव** तस्माद् विपरीतः **आश्रवः** इन्द्रियजयादिरूपः परमार्थपेशलः कायवाङ्मनोव्यापारः **आश्रमो** वा व्रतग्रहणादिरूपः **सुविहितानां** साधूनाम्। उभयफलमाह—**अनुस्रोतः संसारः** शब्दादिविषयानुकूल्यं संसार एव, कारणे कार्योपचारात्, यथा विषं मृत्युः, दधित्रपुषी प्रत्यक्षो ज्वरः। **प्रतिस्रोतः** उक्तलक्षणः **तस्येति** पञ्चम्यर्थे षष्ठी, 'सुपां सुपो भवन्ति' [ ] इति वचनात् तस्मात् संसारात् **उत्तारः,** उत्तरणमुत्तारः, हेतौ फलोपचारात् यथा आयुर्घृतम्, तन्दुलान् वर्षति पर्जन्य इति सूत्रार्थः।" इति आचार्यश्री **हरिभद्रसूरि**विरचितायां **दशवैकालिकटीकायाम्**॥

१ **रूपं** S॥.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयं नाणं ति वुच्चइ। एयंमि सुहजोगसिद्धी उचियपडिवत्ति-पहाणा। एत्थ भावे पवत्तगे। पायं विग्घो न विज्जइ निरणुबंधासुहकम्मभावेण। अक्खित्ता उ इमे जोगा भावाराहणाओ तहा, तओ सम्मं [1]पवत्तइ, [2]निप्फाएइ अणाउले। एवं किरिया सुकिरिया एगंतनिक्कलंका निक्कलंकत्थसाहिया, तहा सुहाणुबंधा [3]उत्तरुत्तरजोगसिद्धीए। तओ से साहइ [4]परं परत्थं सम्मं तक्कुसले सया तेहिं तेहिं पगारेहिं साणुबंधं, महोदए बीजबीजादिट्ठावणेणं, [5]कत्तिविरिआइजुत्ते, अवंझसुहचेट्ठे, समंतभद्दे, सुप्पणिहाणाइहेऊ, मोहतिमिरदीवे, रागामयवेज्जे, दोसाणलजलनिही, संवेगसिद्धिकरे हवइ अचिंतचिंतामणिकप्पे।

से एवं [6]परपरत्थसाहए तहा करुणाइभाव[7]ओ अणेगेहिं भवेहिं विमुच्चमाणे पावकम्मुणा, पवड्ढमाणे अ सुहभावेहिं अणेगभवियाए आराहणाए पाउणइ [8]सव्वुत्तमं भवं चरमं अचरम[9]भवहेउं [10]अविगलपरपरत्थनिमित्तं।

तत्थ काऊण निरवसेसं किच्चं विहूयरयमले सिज्झइ, बुज्झइ, मुच्चइ, परिनिव्वाइ, सव्वदुक्खाणमंतं करेइ त्ति पव्वज्जा-परिपालणा[11]सुत्तं समत्तं ॥

---

१ पवत्तए K ॥ २ K1 विना–निफाएइ K. । निप्पाइए S. । निप्फायइ A.B ॥ ३ उत्तरोत्तर० K. ॥ ४ परपरत्थं K1 ॥ ५ कत्तिविरियजुत्ते S.K. K1 ॥ ६ परं परत्थ ° K1 विना ॥ ७ °भावाओ S. ॥ ८ ° त्तमभवी चरमं चरमभाव° K. ॥ ९ °भाव° S.K. ॥ १० °लपरत्थनि° K. ॥ ११ ° सुत्तं चउत्थं सम्मत्तं K1 ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतद् ज्ञानमित्युच्यते यदेवमिष्टवस्तुतत्त्वनिरूपकम् । **एतस्मिन् शुभयोगसिद्धिः** । एतस्मिन् ज्ञाने सति शुभव्यापारनिष्पत्तिः लोकद्वयेऽपीष्टप्रवृत्तौ । किंविशिष्टा ? इत्याह–**उचितप्रतिपत्तिप्रधाना**, संज्ञाना(सज्ज्ञान ?)लोचनेन तत्तदनुबन्धेक्षणात् । न ज्ञस्तदारभते यद्विनाशयति । अत एवाह–**अत्र भावः प्रवर्त्तकः** प्रस्तुतप्रवृत्तौ सदन्तःकरणलक्षणः, **न मोह इति** । अत एवाह–**प्रायो विघ्नो न विद्यते** अत्राधिकृतप्रवृत्तौ, सदुपाययोगादित्यर्थः । एतद्बीजमेवाह–**निरनुबन्धाशुभकर्मभावेन**, नह्यनीदृश इत्थं प्रवर्त्तते इति हृदयम्, सानुबन्धाशुभकर्मणः सम्यक् प्रव्रज्याऽयोगात् ।

[1]अत एवाह–**आक्षिप्ताः** स्वीकृता **एवैते योगाः** सुप्रव्रज्याव्यापाराः । कुतः ? इत्याह–**भावाराधनातः तथा**, जन्मान्तरे तद्बहुमानादिप्रकारेण । ततः किम् ? इत्याह–**तत** आक्षेपात् **सम्यक् प्रवर्त्तते**, नियमनिष्पादकत्वेन । ततः किम् ? इत्याह–**निष्पादयत्यनाकुलः** सन् इष्टम् । एवमुक्तेन प्रकारेण **क्रिया** [2]**सुक्रिया** भवति, सम्यग्ज्ञानादौचित्यारब्धेत्यर्थः । इयमेव विशेष्यते–**एकान्तनिष्कलङ्का**, निरतिचारतया । **निष्कलङ्कार्थसाधिका**, मोक्षसाधिकेत्यर्थः । **यतस्तथा शुभानुबन्धा** अव्यवच्छेदेनो**त्तरोत्तरयोगसिद्ध्या** । **ततः** शुभानुबन्धायाः सुक्रियायाः सकाशात् **स** प्रस्तुतः प्रव्रजितः **साधयति** निष्पादयति **परं** प्रधानं **परार्थं** सत्यार्थं **सम्यग**विपरीतम् । **तत्कुशलः** परार्थसाधनकुशलः, **सदा** सर्वकालम् । कथम् ? इत्याह–**तैस्तैः प्रकारैर्बीजबीजन्यासादिभिः सानुबन्धं परार्थम्** । **महोदयोऽसौ** [3]परपरार्थसाधनात् । एतदेवाह–**बीजबीजादिस्थापनेन**, बीजं सम्यक्त्वम्, बीजबीजं तदाक्षेपकशासनप्रशंसादि, एतन्न्यासेन । किंविशिष्टोऽयम् ? इत्याह–**कर्तृवीर्यादियुक्तः**, परं परार्थं प्रति । **अवन्ध्यशुभचेष्टः**, [4]एतमेव प्रति । **समन्तभद्रः**, सर्वाकारसंपन्नतया । **सुप्रणिधानादिहेतुः**, क्वचिद[5]प्यन्यूनतया । **मोहतिमिरदीपः**, तदपनयनस्वभावतया । **रागामयवैद्यः**, तच्चिकित्सासमर्थयोगेन । **द्वेषानलजलनिधिः**, तद्विध्यापनशक्तिभावात् । **संवेगसिद्धिकरो भवति**, तद्धेतुयोगेन । **अचिन्त्यचिन्तामणिकल्पः**, सत्त्वसुखहेतुतया ।

**सोऽधिकृतः** प्रव्रजितः एवमुक्तनीत्या **परपरार्थसाधकः** [6]धर्मदानेन ।

---

१ अत एवाह S. विना नास्ति ॥ २ सु ° नास्ति S. ॥ ३ परंपरार्थ ° S. ॥ ४ एनमेव S. ॥ ५ ° प्यनून ° S. ॥ ६ धर्मे दानेन S.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुतो हेतोः ? इत्याह–तथा करुणादिभावतः, प्रधानभव्यतया । किम् ? इत्याह–अनेकैर्भवैर्जन्मभिर्विमुच्यमानः पापकर्मणा ज्ञानावरणीयादिलक्षणेन । प्रवर्द्धमानश्च शुभभावैः संवेगादिभिः । अनेकभविकयाऽऽराधनया पारमार्थिकया प्राप्नोति सर्वोत्तमं भवं तीर्थकरादिजन्म । किंविशिष्टम् ? इत्याह–चरमं पश्चिममचरमभवहेतुं मोक्षहेतुमित्यर्थः, अविकलपरपरार्थ-निमित्तम् अनुत्तरपुण्यसंभारभावेन ।

तत्र कृत्वा निरवशेषं कृत्यं यदुचितं महासत्त्वानां विधूतरजोमलः बध्यमान-प्राग्बद्धकर्मरहितो व्यवहारतः सिद्ध्यति, बुध्यते, मुच्यते, परिनिर्वाति, सर्वदुःखानामन्तं करोतीति । अत्र सिध्यति सामान्येनाणिमाद्यैश्वर्यं प्राप्नोति । बुध्यते केवली भवति । मुच्यते भवोपग्राहिकर्मणा । परिनिर्वाति सर्वतः कर्मविगमेन । किमुक्तं भवति ? सर्वदुःखानामन्तं करोति, सदा पुनर्भवाभावात् । यद्वा सिध्यति सर्वकार्यपरिसमाप्त्या । बुध्यते तत्रापि केवलाप्रतिघातेन । मुच्यते निरवशेषकर्मणा । परिनिर्वाति समग्रसुखाप्त्या । एवं सर्वदुःखानामन्तं करोतीति निगमनम्, नयान्तरमतव्यवच्छेदार्थमेतदेवमिति प्रव्रज्यापरिपालनासूत्रं समाप्तम्, तत्त्वतः प्रव्रज्यापरिपालनासूत्रं[2] समाप्तम् । पञ्चसूत्रकव्याख्यायां चतुर्थसूत्रव्याख्या समाप्ता ॥

१ ०लपरार्थनि० S.। दृश्यतां पृ० ६३ टि० १० ॥ २ ०सूत्रकं S.॥

इदानीं पञ्चमसूत्रव्याख्या प्रक्रम्यते । अस्य चायमभिसंबन्धः—इहानन्तरसूत्रे प्रव्रजितस्य चर्योक्ता, इह तु परं तत्फलमभिधातुमाह—

**स एवमभिसिद्धे, परमबंभे, मंगलालए, जम्म-जरा-मरणरहिए, पहीणासुहे, अणुबंधसत्तिवज्जिए, संपत्तनियसरूवे, अकिरिए, सहावसंठिए, अणंतनाणे, अणंतदंसणे ।**

**स एवमभिसिद्धे परमबंभे मंगलालये जम्म-जरा-मरणरहिए-**त्यादि । **स** प्रक्रान्तः प्रव्रज्याकारी, एवमुक्तेन सुखपरम्पराप्रकारेण **अभिषिद्धः सन्** । किंभूत इत्याह—**परमब्रह्म** सदाशिवत्वेन । **मङ्गलालयः**, गुणोत्कर्षयोगेन । **जन्म-जरा-मरणरहितो** निमित्ताभावेन । **यथोक्तम्**—

दग्धे बीजे यथाऽत्यन्तं प्रादुर्भवति नाङ्कुरः ।
कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः ॥ इति [[1]तत्त्वार्थका० ८]

**प्रक्षीणाशुभः** एकान्तेन, **अनुबन्धशक्तिवर्जितः** अशुभमङ्गीकृत्य, अत एव **संप्राप्तनिजस्वरूपः** केवलो जीवः, **अक्रियो** गमनादिशून्यः, **स्वभावसंस्थितः** सांसिद्धिकधर्मवान् । अत एवाह—**अनन्तज्ञानोऽनन्तदर्शनः** ज्ञेयानन्तत्वात् । **स्वभावश्चास्यायमेव** । **यथोक्तम्**—

स्थितः शीतांशुवज्जीवः प्रकृत्या भावशुद्धया ।
चन्द्रिकावच्च विज्ञानं तदावरणमभ्रवत् ॥ [[2]योगदृष्टि० १८३]

**अथ कीदृशोऽसौ वर्ण-रूपाभ्याम् ? इत्याशङ्कापोहायाह—**

**से[3] न सद्दे, न रूवे, न गंधे, न रसे, न फासे,**

---

१ "**दग्धे** इत्यादि । **बीजे**ऽ**त्यन्तं** भस्मसात् कृते नाङ्कुरस्य प्रादुर्भावः एवं कर्मबीजे ध्वस्ते संसाराङ्कुरस्याप्रादुर्भाव." इति **तत्त्वार्थभाष्यस्य** अन्ते विद्यमानानां कारिकाणां **सिद्धसेन**गणिविरचितायां टीकायाम् ॥

२ "**स्थितः**, न स्थापनीयः, **शीतांशुव**च्चन्द्रवत्, **जीवः**—आत्मा, **प्रकृत्या**ऽऽत्मीयया **भावशुद्धया** तत्त्वशुद्धयेत्यर्थः ॥ १८३ ।" इति **योगदृष्टिसमुच्चयस्य** आचार्यश्री **हरिभद्रसूरिविरचितायां स्वोपज्ञवृत्तौ** ॥

३ तुला—"अच्चेइ जाईमरणस्स वट्टमग्गं विक्खायरए, सव्वे सरा नियट्टंति, तक्का जत्थ न विज्जइ, मई तत्थ न गाहिया, ओए, अप्पइट्ठाणस्स खेयन्ने, से न दीहे, न हस्से, न वट्टे, न तंसे, न चउरंसे, न परिमंडले, न किण्हे, न नीले, न लोहिए, न हालिद्दे, न सुक्किल्ले, न सुरभिगंधे, न दुरभिगंधे, न तित्ते, न कडुए, न कसाए, न अंबिले, न महुरे, न कक्खडे, न मउए, न गरुए, न लहुए, न उण्हे, न निद्धे, न लुक्खे, न काऊ, न रुहे, न संगे, न इत्थी, न पुरिसे, न अन्नहा, परिन्ने, सन्ने, उवमा न विज्जए, अरूवी सत्ता, अपयस्स पयं नत्थि ।"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अत्येति' अतिक्रामति जातिश्च मरणं च जातिमरणं तस्य 'वट्टमग्गं'ति पन्थानं मार्गम् उपादानं कर्म्मेति यावत् , तदत्येति–अशेषकर्म्मक्षयं विधत्ते, तत्क्षयाच्च किंगुणः स्यादित्याह–विविधम् –अनेकप्रकारं प्रधानपुरुषार्थतयाऽऽरब्धशास्त्रार्थतया तपःसंयमानुष्ठानार्थत्वेन (आख्यातो) व्याख्यातो मोक्षः–अशेषकर्म्मक्षयलक्षणो विशिष्टाकाशप्रदेशाख्यो वा तत्र रतो व्याख्यातरतः आत्यन्तिकैकान्तिकानाबाधसुखक्षायिकज्ञानदर्शनसंपदुपेतोऽनन्तमपि कालं संतिष्ठते । किम्भूत इति चेत् , न तत्र शब्दानां प्रवृत्तिः, न च सा काचिदवस्थाऽस्ति या शब्दैरभिधीयेत इत्येतत्प्रतिपादयितुमाह–'सर्वे' निरवशेषाः 'स्वरः' ध्वनयस्तस्मान्निवर्तन्ते, तद्वाच्यवाचकसम्बन्धे न प्रवर्त्तन्ते, तथाहि–शब्दाः प्रवर्त्तमाना रूपरसगन्धस्पर्शानामन्यतमे विशेषे सङ्केतकालगृहीते तत्तुल्ये वा प्रवर्त्तेरन् , न चैतत्तत्र शब्दादीनां प्रवृत्तिनिमित्तमस्ति, अतः शब्दानभिधेया मोक्षावस्थेति । न केवलं शब्दानभिधेया, उत्प्रेक्षणीयाऽपि न सम्भवतीत्याह–सम्भवत्पदार्थविशेषास्तित्वाध्यवसाय ऊहस्तर्कः 'एवमेवं चैतत्स्यात्' , स च यत्र न विद्यते ततः शब्दानां कुतः प्रवृत्तिः स्यात् ? । किमिति तत्र तर्काभाव इति चेदाह– मननं मतिः–मनसो व्यापारः पदार्थचिन्ता औत्पत्तिक्यादिका चतुर्विधाऽपि मतिस्तत्र न ग्राहिका, मोक्षावस्थायाः सकलविकल्पातीतत्वात् , तत्र च मोक्षे कर्म्मांशसमन्वितस्य गमनमाहोश्विन्निष्कर्म्मणः ?, न तत्र कर्म्मसमन्वितस्य गमनमस्तीत्येतद्दर्शयितुमाह–'ओजः' एकोऽशेषमलकलङ्काङ्करहितः; किं च– न विद्यते प्रतिष्ठानमौदारिकशरीरादेः कर्म्मणो वा यत्र सोऽप्रतिष्ठानो–मोक्षस्तस्य 'खेदज्ञो' निपुणो, यदिवा अप्रतिष्ठानो–नरकस्तत्र स्थित्यादिपरिज्ञानतया खेदज्ञो, लोकनाडिपर्यन्तपरिज्ञानावेदनेन च समस्तलोकखेदज्ञता आवेदिता भवति । सर्वस्वरनिवर्त्तनं च येनाभिप्रायेणोक्तवांस्तमभिप्रायमाविष्कुर्वन्नाह–'स' परमपदाध्यासी लोकान्तक्रोशषड्भागक्षेत्रावस्थानोऽनन्तज्ञानदर्शनोपयुक्तः संस्थानमाश्रित्य न दीर्घो न ह्रस्वो न वृत्तो न त्र्यस्रो न चतुरस्रो न परिमण्डलो वर्णमाश्रित्य न कृष्णो न नीलो न लोहितो न हारिद्रो न शुक्लो गन्धमाश्रित्य न सुरभिगन्धो न दुरभिगन्धो रसमाश्रित्य न तिक्तो न कटुको न कषायो नाम्लो न मधुरः स्पर्शमाश्रित्य न कर्कशो न मृदुर्न लघुर्न गुरुर्न शीतो नोष्णो न स्निग्धो न रूक्षो 'न काऊ' इत्यनेन लेश्या गृहीता, यदिवा न कायवान् यथा वेदान्तवादिनाम्– 'एक एव मुक्तात्मा तत्कायमपरे क्षीणक्लेशा अनुप्रविशन्ति आदित्यरश्मय इवांशुमन्तमिति, तथा न रुहः, "रुह, बीजजन्मनि प्रादुर्भावे च" [पा० धा० ८५९] रोहतीति रुहः, न रुहोऽरुहः, कर्म्मबीजाभावादपुनर्भावीत्यर्थः, न पुनर्यथा शाक्यानां दर्शननिकारतो मुक्तात्मनोऽपि पुनर्भवोपादानमिति, उक्तं च— "दग्धेन्धनः पुनरुपैति भवं प्रमथ्य, निर्वाणमप्यनवधारितभीरुनिष्ठाम् । मुक्तः स्वयंकृतभवश्च परार्थशूरस्त्वच्छासनप्रतिहतेष्विह मोहराज्यम् ॥ १ ॥" तथा च न विद्यते सङ्गोऽमूर्त्तत्वाद्यस्य स तथा, तथा न स्त्री न पुरुषो नान्यथेति–न नपुंसकः, केवलं सर्वैरात्मप्रदेशैः परिः–समन्ताद्विशेषतो जानातीति परिज्ञः, तथा सामान्यतः सम्यग्जानाति–पश्यतीति संज्ञः, ज्ञानदर्शनयुक्त इत्यर्थः, यदि नाम स्वरूपतो न ज्ञायते मुक्तात्मा तथाऽप्युपमाद्वारेणादित्यगतिरिव ज्ञायत एवेति चेत् , तन्न, यत आह–उपमीयते सादृश्यात् परिच्छिद्यते यया सोपमा–तुल्यता सा मुक्तात्मनस्तज्ज्ञानसुखयोर्वा न विद्यते, लोकातिगत्वात्तेषाम् , कुत एतदिति चेदाह–तेषां मुक्तात्मनां या सत्ता सा अरूपिणी, अरूपित्वं च दीर्घादिप्रतिषेधेन प्रतिपादितमेव । किं च–न विद्यते पदम्–अवस्थाविशेषो यस्य सोऽपदः, तस्य पद्यते– गम्यते येनार्थस्तत्पदम्–अभिधानं तच्च 'नास्ति' न विद्यते, वाच्यविशेषाभावात् , तथाहि— योऽभिधीयते स शब्दरूपगन्धरसस्पर्शान्यतरविशेषेणाभिधीयते, तस्य च तदभाव इत्येतद्दर्शयितुमाह, यदिवा दीर्घ इत्यादिना रूपादिविशेषनिराकरणं कृतम् , इह तु तत्सामान्यनिराकरणं कर्तुकाम आह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अ[1]रूविणी सत्ता, अणित्थंत्थसंठाणा, अणंतवी[2]रिया, कयकिच्चा, स[3]व्वाबाहाविवज्जिया, सव्वहा निरवेक्खा, थिमिया, प[4]संता। असंजोगिए एसाणंदे, अओ चेव प[5]रे मए।

अवेक्खा अणाणंदे, संजोगो विओगकारणं, अफलं फलमेयाओ, विणिवायपरं खु[6] तं, बहुमयं मोहा[7]ओ अबुहाणं, जमेत्तो विवज्जओ, तओ अणत्था अपज्जवसिया। एस भा[8]वरिपू परे अओ वुत्ते उ भगवया।

नागासेण जोगो एयस्स। से सरूवसंठिए। नागासमण्णत्थ, न सत्ता सदंतरमुवेइ। अचिंतमेयं के[9]वलिगम्मं तत्तं। निच्छय-मयमेयं। विजोगवं च[10] जोगो त्ति न एस जोगो, भिण्णं लक्खणमेयस्स। न एत्थावेक्खा, सहावो खु एसो अणंतसुह-सहावकप्पो। उवमा एत्थ न विज्जइ। त[11]ब्भावेऽणुभवो परं

---

**से न सद्दे न रूवे न गंधे न रसे न फासे, इच्चेव त्ति बेमि** षष्ठ उद्देशकः।

लोकसाराध्ययनं समाप्तम् ॥५–६॥

'स' मुक्तात्मा न शब्दरूपः न रूपात्मा न गन्धः न रसः न स्पर्श इत्येतावन्त एव वस्तुनो भेदाः स्युः, तत्प्रतिषेधाच्च नापरः कश्चिद्विशेषः सम्भाव्यते येनासौ व्यपदिश्येतेति भावार्थः। इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत्। गतः सूत्रानुगमः, तद्गतौ चापवर्गमाप्त उद्देशकः, तदपवर्गावाप्तौ च नयवक्तव्यताऽतिदेशात् समाप्तं लोकसाराख्यं पञ्चममध्ययनमिति॥" इति **शीलाचार्य**विरचितवृत्तिसहिते **आचाराङ्गसूत्रे** प्रथमे श्रुतस्कन्धे पञ्चमेऽध्ययने षष्ठ उद्देशके॥

१ **अरूवी सत्ता**K1. K विना॥ २ **०विरिया** K1. K विना॥ ३ **०बाहवि०** K1 K. विना॥ ४ **पसंता** नास्ति K1। ५ **परमे पए** K.॥ ६ **खु यं** S.। **खु हं** K.॥ ७ **मोहओ** K.॥ ८ **०रिवू** K.॥ ९ **केवलगम्मं** S.K. K1॥ १० **च** नास्ति K.॥ ११ **तब्भावेवेणुब्भवो परं। आणा** K.। **तब्भावाऽणुभवो परं। आणा** S.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]तस्सेव । आणा एसा जिणाणं सव्वण्णूणं अवितहा एगंतओ । न वितहत्ते निमित्तं । न चानिमित्तं कज्जं ति ।

**से न सद्दे** इत्यादि । **स** सिद्धः **न शब्दो न रूपं न गन्धो न रसो न स्पर्शः**, पुद्गलधर्मत्वादमीषाम् । अभावस्तर्हीत्येतदपि नेत्याह–**अरूपिणी सत्ता** ज्ञानवत् । **अनित्थंस्थसंस्थाना**, इदंप्रकारमापन्नमित्थम् , इत्थं स्थित-मित्थंस्थम् , न इत्थंस्थम् अनित्थंस्थं संस्थानं यस्या अरूपिण्याः सत्तायाः सा यथोक्ता । **अनन्तवीर्या** इयं सत्ता प्रकृत्यैव । तथा **कृतकृत्या** तन्निष्पादनेन निवृत्ततच्छक्तिः, **सर्वाबाधाविवर्जिता** द्रव्यतो भावतश्च । **सर्वथा निरपेक्षा**, तच्छक्त्यपगमेन । अत एव **स्तिमिता प्रशान्ता** सुखप्रकर्षादनुकूला निस्तरङ्ग-महोदधिकल्पा । एतस्या एव परमसुखत्वमभिधातुमाह–**असांयोगिक एष आनन्दः** सुखविशेषः । अत एव निरपेक्षत्वात् **परो मतः** प्रधान इष्टः ।

इहैव व्यतिरेकमाह—**अपेक्षाऽनानन्दः**, औत्सुक्यदुःखत्वात् । अपेक्ष्य-माणाप्त्या तन्निवृत्तौ दोषमाह–**संयोगो वियोगकारणम्** , तदवसानतया स्वभाव-त्वात् । [2]**अफलं फलमेतस्मात्** संयोगात् । किम् ? इत्यत आह–**विनिपातपरमेव तत्** सांयोगिकफलम् । कथमिदं बहुमतम् ? इत्याह–**बहुमतं मोहादबुधानां** पृथग्जनानाम् । तत्रापि निबन्धनमाह–**यदतो विपर्ययः**, मोहादत एवाफले फल-बुद्धिः । **ततो विपर्ययादनर्थाः** असत्प्रवृत्त्या **अपर्यवसिताः**, सानुबन्धतया । **एवमेष भावरिपुः परो मोहः** अत एवोक्तो भगवता तीर्थकरेण । यथोक्तम्–

[3]अण्णाणतो रिपू अण्णो, पाणिणं णेव विज्जइ ।
एत्तोऽसक्किरिया तीए, अणत्था विस्सतोमुहा ॥ [ ]

यदि संयोगो दुष्टः कथं सिद्धस्याकाशेन न स दुष्टः ? इत्याशङ्कयाह— **नाकाशेन सह योग एतस्य** सिद्धस्य । किम् ? इत्यत आह–**स स्वरूप-संस्थितः सिद्धः** । कथमाधारमन्तरेण स्थितिः ? इत्याशङ्क्याह–**नाकाशमन्य-त्राधारे** । अत्रैव युक्तिः–**न सत्ता सदन्तरमुपैति, न चाऽन्यथाऽन्यदन्यत्र** । **अचिन्त्यमेतत्** प्रस्तुतं **केवलिगम्यं तत्त्वम्** । तथा **निश्चयमतमेतत्** ,

१ तस्सेव नास्ति S.K.K1 ॥ २ अफलं फलमेतस्मात् S.॥ ३ अज्ञानतो रिपुरन्यः प्राणिनां नैव विद्यते । अतोऽसत्क्रिया तया अनर्था विश्वतोमुखाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहारमतं त्वन्यथा, सत्यपि तस्मिन्निदं तत्संयोगशक्तिक्षयात् सूपपन्नमेव। अभ्युच्चयमाह–**वियोगवांश्च योग इति कृत्वा नैष योगः** सिद्धाकाशयोरिति भिन्नं लक्षणमेतस्याधिकृतयोगस्य। **न चात्रापेक्षा** सिद्धस्य। कथं लोकान्ताकाशगमनम्? इत्याह–**स्वभाव एवैष तस्य अनन्तसुखस्वभावकल्पः** कर्मक्षयव्यङ्ग्यः। कीदृशमस्यानन्तं सुखम्? इत्याह–**उपमाऽत्र न विद्यते** सिद्धसुखे। यथोक्तम्—

स्वयं वेद्यं हि तद् ब्रह्म, कुमारी स्त्रीसुखं यथा।
अयोगी न विजानाति, सम्यग् जात्यन्धवद् घटम्" ॥ [ ]

अत एवाह–**तद्भावे** सिद्धसुखभावे **अनुभवः परं तस्यैव**। एतदपि कथं ज्ञायते? इत्याह–**आज्ञा एषा जिनानां** वचनमित्यर्थः। किंविशिष्टानाम्? इत्याह–**सर्वज्ञानाम्**। अत एव **अवितथा एकान्ततः** सत्येत्यर्थः। कुतः? इत्याह–**न वितथत्वे निमित्तं** रागाद्यभावात्। उक्तं च–

रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम्।
यस्य तु नैते दोषास्तस्यानृतकारणं नास्ति ॥ [ ]

**न चानिमित्तं कार्यमिति**। तथा जिनाज्ञा। एवं स्वसंवेद्यं सिद्धसुखमित्याप्तवादः।

## निदंसणमेत्तं तु नवरं – सव्वसत्तुक्खए सव्ववाहिविगमे सव्वत्थसंजोगेणं सव्विच्छासंपत्तीए जारिसमेयं एत्तोऽणंतगुणं खु[१] तं, भावसत्तुक्खयादितो। रागादयो भावसत्तू, कम्मोदया वाहिणो, परमलद्धीओ उ[२] अत्था[३], अणिच्छेच्छा इच्छा। एवं सुहुममेयं[४], न तत्तओ इयरेण गम्मइ। जइसुहमिवाजइणा[५]। आरुग्गसुहं[६] व रोगिण त्ति विभासा।

१ मुत्तं भाव० K.। तं तु भाव० S.C.D. ॥ २ उ नास्ति K. ॥ ३ अट्ठा K. विना ॥ ४ सुहम० K1 ॥ ५ ०सुहं वाजइणा S.। ०सुहं व अजइणा AB ॥ ६ आरोग० S.K. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अचिंतमेयं सरूवेणं। साइअपज्जवसियं एगसिद्धावेक्खाए। पवाहओ अणाई। ते वि भगवंतो एवं, तहाभव्वत्ताइभाव[1]ओ। विचित्तमेयं तहाफलभेएणं। नाविचित्ते सहकारिभेओ। तदवेक्खो तओ त्ति अणेगंतवाओ तत्तवाओ। स खलु एवं। [2]इयरहेगंतो। मिच्छत्तमेसो। न एत्तो ववत्था। अणार[3]हयमेयं। संसारिणो उ सिद्धत्तं। नाबद्धस्स मुत्ती सद्दत्थरहिया।

अणाइमं बंधो पवाहेणं अईयकालतुल्लो। अबद्ध[4]बंधणे अमुत्ती पुणोबंधपसं[5]गाओ। [6]अविसेसो बद्ध-मुक्काणं। अणाइजोगे वि विओगो कंचणोवलनाएणं।

निदर्शनमात्रं तु नवरं सिद्धसुखस्येदं वक्ष्यमाणलक्षणम्। **सव्वसत्तुक्खयेत्यादि**। **सर्वशत्रुक्षये** सति, तथा **सर्वव्याधिविगमे**, एवं **सर्वार्थसंयोगेन** सता, तथा **सर्वेच्छासंप्राप्त्या यादृशमेतत्** सुखं भवति **अतोऽनन्तगुणमेव** सिद्धसुखम्। कुतः इत्याह—**भावशत्रुक्षयादितः**। **आदि**शब्दाद् भावव्याधिविगमादयो गृह्यन्ते। तथा चाह—**रागादयो भावशत्रवः** राग-द्वेष-मोहाः, जीवापकारित्वात्। **कर्मोदया व्याधयः**, तथा जीवपीडनात्। **परमलब्धयस्त्वर्थाः**, परार्थहेतुत्वेन। **अनिच्छेच्छा इच्छा, सर्वथा तन्निवृत्त्या**। **एवं सूक्ष्ममेतत् सुखम्, न तत्त्वतः परमार्थेन इतरेण गम्यते**। असिद्धेन निदर्शनमाह—**यतिसुखमिवायतिना**, विशिष्टक्षायोपशमिकभाववेद्यत्वादस्य, **एवमारोग्यसुखमिव रोगिणेति**। उक्तं च—

> रागाईणमभावे, जं होइ सुहं तयं जिणो मुणइ।
> ण हि सण्णिवायगहिओ, जाणइ तदभावजं सोक्खं॥ [ ]

**इति विभाषा कर्त्तव्या**।

---

१ ०भावाओ S.॥ २ इहरहे० K. K1 विना॥ ३ अणारिहमेयं K1. K.S. विना॥ ४ ०बंधणे वामुत्ती S.C.D॥ ५ ०गओ K1 K. विना॥ ६ अविसेसो अ बद्धमुक्काणं K1 K. विना॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वथा चिन्त्यमेतत् स्वरूपेण सिद्धसुखं न तत्त्वतो मतेरविषयत्वात् । साद्यपर्यवसितं प्रमाणतः एकसिद्धापेक्षया, न तु तत्प्रवाहमधिकृत्य, प्रवाहतस्त्वनादि तदोघमाश्रित्य । तथा चाह–तेऽपि भगवन्तः सिद्धा एवम्, एकसिद्धापेक्षया साद्यपर्यवसिताः, प्रवाहापेक्षया अनाद्यपर्यवसिता इति । समाने भव्यत्वादौ कथमेतदेवम् ? इत्याह–तथाभव्यत्वादिभावात् तथाफलपरिपाकीह तथाभव्यत्वम् ।

अत एवाह–विचित्रमेतत् तथाभव्यत्वादि । कुतः ? इत्याह–तथाफलभेदेन कालादिभेदभाविफलभेदेनेत्यर्थः । समाने भव्यत्वे सहकारिभेदात् फलभेद इत्याशङ्कापोहायाह–नाविचित्रे तथाभव्यत्वादौ सहकारिभेदः । किमित्यत आह–तदपेक्षस्तक इति तदतत्स्वभावत्वे तदुपनिपाताभावादिति । अनेकान्तवादस्तत्त्ववादः, सर्वकारणसामर्थ्योपादनात् । स खल्वनेकान्तवाद एवं तथाभव्यत्वादिभावे । इतरथैकान्तः, सर्वथा भव्यत्वादेस्तुल्यतायाम् । ततः किम् ? इत्याह–मिथ्यात्वमेष एकान्तः । कुतः ? इत्याह–नातो व्यवस्था एकान्तात्, भव्यत्वाभेदे सहकारिभेदस्यायोगात्, तत्कर्मताऽभावात्, कर्मणोऽपि कारकत्वात्, अतत्स्वभावस्य च कारकत्वासंभवादिति भावनीयम् । अत एवाह–अनार्हतमेतदेकान्ताश्रयणम् । प्रस्तुतप्रसाधकमेव न्यायान्तरमाह–संसारिण एव सिद्धत्वम्, नान्यस्य । कोऽयं नियमः ? इत्याह–नाबद्धस्य मुक्तिः तात्त्विकी इत्याह–शब्दार्थरहिता, बन्धाभावेन ।

अयं चानादिमान् बन्धः प्रवाहेण संतत्या । कथं युक्तिसङ्गतोऽभूतिभावेन ? इत्याह–अतीतकालतुल्यः, स हि प्रवाहेणानादिमाननुभूतवर्त्तमानभावश्च । यथोक्तम्–

भवति स नामातीतः, प्राप्तो यो नाम वर्तमानत्वम् ।
एष्यंश्च नाम स भवति, यः प्राप्स्यति वर्तमानत्वम् ॥ [ ]

किं चाऽबद्धबन्धने प्रथमम् अमुक्तिर्मुक्त्यभावः । कुतः ? इत्याह–पुनर्बन्धप्रसङ्गात्, अबद्धत्वेन हेतुना । तथा चाह–अविशेषो बद्ध-मुक्तयोरिति । अनादिमति बन्धे मोक्षाभावः तत्स्वाभाविकत्वेनेत्याशङ्कानिरासायाह–अनादियोगेऽपि सति वियोगोऽविरुद्ध एव काञ्चनोपलज्ञातेन लोके तथा

१ 'न चिन्त्यमेतत् स्वरूपेण सिद्धसुखम्' इत्यन्वयोऽत्र ज्ञेयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शनात्, योगो बन्ध इत्यनर्थान्तरम् ।

**ण दिदिक्खा अकरणस्स । ण यादिट्ठम्मि एसा । ण सहजाए णिवित्ती । ण निवित्तीए आयट्ठाणं । ण यण्णहा तस्सेसा । ण भव्वत्ततुल्ला णाएणं । ण केवलजीवरूवमेयं । ण भाविजोगावेक्खाए तुल्लत्तं, तदा केवलत्तेण सयाऽविसेसाओ । तहासहावकप्पणमप्पमाणमेव । एसेव दोसो परिकप्पियाए । परिणामभेया बंधादिभेदो त्ति साहू, सव्वणयविसुद्धीए णिरुवचरिओभयभावेणं ।**

आदावबद्धस्य दिदृक्षा, बद्धमुक्तस्य तु न सेति दोषाभावादादिमानेव बन्धोऽस्त्वित्याशङ्काव्यपोहायाह–**न दिदृक्षाऽकरणस्ये**न्द्रियरहितस्य, बद्धस्य चैतानि। तथा **न चादृष्टे एषा** दिदृक्षा, द्रष्टुमिच्छा दिदृक्षेति कृत्वा । सहजैवैषेत्यारेकानिराकरणायाह–**न सहजाया निवृत्तिर्दिदृक्षायाः**, चैतन्यवत् । अस्तु वेयमित्यभ्युपेत्य दोषमाह–**न निवृत्तौ** दिदृक्षाया **आत्मनः स्थानम्**, तदव्यतिरेकात् । तथा चाह–**नान्यथा तस्यैषा**,[1] आत्मनो दिदृक्षाऽयोगात् । [2]तदव्यतिरेकेऽपि भव्यत्वस्येव तन्निवृत्तौ दोषाभाव इत्याशङ्कापोहायाह–**न भव्यत्वतुल्या न्यायेन** दिदृक्षा । कुतः ? इत्याह–**न केवलजीवरूपमेतद्** भव्यत्वम् । दिदृक्षा तु केवलजीवरूपेत्यर्थः । **न भावियोगापेक्षया** महदादिभावे [3]तदाऽकेवलत्वेन **तुल्यत्वं** दिदृक्षायाः भव्यत्वेन । अत्र युक्तिमाह–**तदा केवलत्वेन** भावियोगाभावे **सदा अविशेषात्**, तथा सांसिद्धिकत्वेन तदूर्ध्वमपि दिदृक्षापत्तिरिति हृदयम् ।

एवंस्वभावैवेयं दिदृक्षा या महदादिभावाद् विकारदर्शने केवलावस्थायां निवर्त्तते इत्येतदाशङ्क्याह–**तथास्वभावकल्पनं** कैवल्याविशेषे प्रक्रमाद् दिदृक्षाया भावाभावस्वभावकल्पन**मप्रमाणमेव** । आत्मनस्तद्भेदापत्तेः [4]प्रकृति-पुरुषाधिकत्वेन [5]तदभावापत्त्येति गर्भः । अत एवाह–**एष एव दोषः** प्रमाणाभावलक्षणः **परिकल्पितायां** दिदृक्षायामभ्युपगम्यमानायाम्, तथाहि–परिकल्पिता न

---

१ तस्यैवा आत्मनो S. ॥ २ तदाव्य° S. ॥ ३ तदा केवलत्वेन S. विना ॥ ४ प्रकृतेः पुरुषा° S. Aमू० विना ॥ ५ तद्भावा° S. विना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चित्, कथं तत्र प्रमाणवृत्तिरिति । तदेवं व्यवस्थिते सति **परिणामभेदा**दात्मन इति प्रक्रमः, **बन्धादिभेदो** बन्ध-मोक्षभेद इत्येतत् **साधु** प्रमाणोपपन्नम्, न खल्वन्ययोग-वियोगौ विहाय मुख्यः परिणामभेदः, भवाच्च मुक्तिरनादिमांश्च भव इति नीत्या, अत एवाह–**सर्वनयविशुद्ध्या** अनन्तरोदितं साधु, फलोपदर्शनायाह–**निरुपचरितोभयभावेन**, प्रक्रमात् मुख्यबन्ध-मोक्षभावेन । एवं द्रव्यास्तिकमतमधिकृत्य कृता निरूपणा ।

पर्यायास्तिकमतमधिकृत्याह–

**ण अप्पभूयं कम्मं । ण परिकप्पियमेयं । ण एवं भवादिभेदो । ण भवाभावो उ सिद्धी । ण तदुच्छेदे अणुप्पाओ । ण एवं समंजसत्तं । णाणादिमं[2] भवो । ण हेउफलभावो । तस्स तहासहावकप्पणमजुत्तं, णिग्गहान्नयत्तओ[3] णिओगेणं । तस्सेव तहाभावे जुत्तमेयं । सुहुममट्ठपयं[4] । विचिंतियव्वं महापण्णाए त्ति ।**

**नात्मभूतं कर्म**, न बोधस्वलक्षणमेवेत्यर्थः । तथा **न परिकल्पितमसदे**वैतत् कर्म वासनादिरूपम् । कुतः ? इत्याह–**नैवं भवादिभेदः** । आत्मभूते परिकल्पिते वा कर्मणि बोधमात्राविशेषेण क्षणभेदेऽपि मुक्तक्षणभेदवन्न भवाऽपवर्गविशेषः ।

तथा **न भवाभाव एव सिद्धिः** सन्तानोच्छेदरूपा प्रध्यातप्रदीपोपमा । अत्र युक्तिमाह–**न तदुच्छेदेऽनुत्पादः**, न सन्तानोच्छेदेऽनुत्पादस्तस्यैव, किं तर्हि ? उत्पाद एव, यथाऽसौ सन्नुच्छिद्यते, एवमसन्नप्युत्पद्यतामिति को विरोधः ? यद्येवं ततः किम् ? इत्याह–**नैवं समञ्जसत्वं** न्यायोपपन्नत्वम् । कथम् ? इत्याह–एवं हि **नानादिमान् भवः** संसारः, कदाचिदेव सन्तानोत्पत्तेः । तथा **न हेतुफलभावः**, चरमा-ऽऽद्यक्षणयोरकारण-कार्यत्वात् । पक्षान्तरनिरासायाह–

१ °रोदित साधु फलो° S. Aमू० विना ॥ २ °मंत भवो S. C. D. ॥ ३ °न्नयत्तओ ।नएण K. । °न्नयकओ णिओगेणं Sसं० C. D. ॥ ४ °पयमेयं विचिं° C. D. । यद्यपि टीकानुसारेणात्र C. D. पाठः साधुतरो भाति, तथापि सर्वेषु त्रिष्वपि प्राचीनतालपत्रादर्शेषु विद्यमानत्वात् °पयं विचिं° इति पाठोऽत्रास्माभिरादृतः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तस्य तथास्वभावकल्पनमयुक्तम्** । कुतः ? इत्याह–[1]**निराधारान्वयत्वतो नियोगेन**, अयमत्र भावार्थः–स्वो भाव इत्यात्मीया सत्ता स्वभावः । एवं च स[2] निवृत्तिस्वभाव इति [निवृत्तिः ?] स्वाभाविकी आत्मीया सत्तेति निराधारत्वम् । यद्वाऽन्वयाभावस्तन्निवृत्तेस्तत्त्वादिति । **नियोगग्रहणम्** 'अवश्यमिदमित्थम्, अन्यथा शब्दा[3]र्थायोगात्' इति ख्यापनार्थम् । एवमाद्यक्षणेऽपि भावनीयम् । अत एवाह–**तस्यैव तथाभावे युक्तमेतत्** तथास्वभावकल्पनमिति । **सूक्ष्ममर्थपदमेतद्** भावगम्यत्वात्, [4]**विचिन्तितव्यं महाप्रज्ञया**, अन्यथा ज्ञातुमशक्यत्वादिति ।

आनुषङ्गिकमभिधाय प्रकृतमाह–

## अपज्जवसियमे[5]व(वं) सिद्ध[6]सुक्खं । एत्तो चेवुत्तमं इमं । सव्वहा [7]अणुस्सुगत्ते अणंतभावाओ । लोगंतसिद्धिवासिणो एए । [8]जत्थ एगो तत्थ णियमा अणंता । अकम्मुणो गई पुव्वपओगेण अलाबुप्पभिइणायओ । नियमो अओ चेव । अफुसमाणगईए गमणं । उक्करिस[9]विसेसओ इयं । अव्वोच्छेदो भव्वाणं अणंतभावेण । एयमणंताणंतयं । समया एत्थ णायं । भव्वत्तं जोगयामेत्तमेव केसिंचि, पडिमाजोग्गदारुणिदंसणेणं । ववहारमयमेयं । एसो वि तत्तंगं, पवित्तिविसोहणेण अणेगंत-

१ **निराधारान्वयकृतो** S. । **निराधारोन्वयः कृतो** S. विना ॥ २ 'स निवृत्तिस्वभाव इति निराधारोऽन्वयः' इति पाठान्तरम्–Aटि० ॥ इदं पाठान्तरं समीचीनं भाति ॥ ३ °**र्थयोगात्** S. ॥ ४ "इह पचुण् [धा० पा० ९।१३]–चितुण् [धा० पा० ९।७८] प्रभृतीनां सनकारनिर्देशमकृत्वा उदित्करणं चुरादिणिचोऽनित्यत्वज्ञापकम्, ......तेन **'चोरति, चिन्तति'** इत्यादि सिद्धम्" इति हैमे **धातुपारायणे** । अतोऽत्र 'विचिन्ततव्यम्' इति प्रयोगः सिद्धः ॥ "चिति स्मृत्याम् [पा० धा० १५३६],......चिन्तेति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गम् ।...चिन्तति, चिन्तेत् । एतच्च ज्ञापकं सामान्यापेक्षमित्येके" इति पाणिनीय**सिद्धान्तकौमुद्याम्** १।३।७४ ॥ ५ °**मेयं** K. ॥ ६ **सिद्धिसोक्खं** S. K. ॥ ७ °**हा अणुसुगत्ते** K. । °**हा सुगत्ते** S. ॥ ८ **जत्थ य एगो** K. विना ॥ ९ **विसेसो इयं** K. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सिद्धिओ निच्छयंगभावेण। परिसुद्धो उ केवलं। एसा आणा इह भगवओ समंतभद्दा तिकोडिपरिसुद्धीए अपुणबंधगाइगम्मा।**

अपर्यवसितमेवमुक्तेन विधिना **सिद्धसौख्यम्**। अत एव कारणादुत्तममिदम्। एतदेव स्पष्टमभिधातुमाह–**सर्वथाऽनुत्सुकत्वे सति अनन्तभावात्** कारणात्। क्व निवास एषाम्? इत्याह–**लोकान्तसिद्धिवासिन एते।** चतुर्दशरज्ज्वात्मकलोकान्ते या सिद्धिः प्रशस्तक्षेत्ररूपा तद्वासिन एते सिद्धाः। कथं व्यवस्थिताः? इत्याह–**यत्रैकः सिद्धस्तत्र क्षेत्रे नियमान्नियोगेनानन्ताः सिद्धाः**। उक्तं च–

जत्थ य एगो सिद्धो, तत्थ अणंता भवक्खयविमुक्का।
अण्णोण्णमणाबाहं, चिट्ठंति सुही सुहं पत्ता ॥ [आव० नि० ९७५]

कथमिह कर्मक्षये लोकान्तगमनम्? इत्याह –**अकर्मणः सिद्धस्य गतिरितो लोकान्तं पूर्वप्रयोगेण** हेतुना तत्स्वाभाव्यात्। कथमेतदेवं प्रतिपत्तव्यम्? इत्याह –**अलाबुप्रभृतिज्ञाततः**, अष्टमृल्लेपलिप्तजलक्षिप्ताधोनिमग्नतदपगमोर्ध्वगमनस्वभावालाबुवत्। **प्रभृति**ग्रहणादेरण्डफलादिग्रहः। ऊर्ध्वगमनं तत्रैव वाऽसकृद्गमनागमनं किं न? इत्येतदाशङ्क्याह–**नियमोऽत एव अलाबुप्रभृतिज्ञाततः एकसमयादिः**। उत्पलपत्रशतव्यतिभेददृष्टान्तेन एकसमये न तद्गतिर्युक्तेत्याशङ्कापोहायाह–**अस्पृशद्गत्या गमनं सिद्धस्य** सिद्धिक्षेत्रं प्रति, स्पृशद्गतिमदपेक्षया चोत्पलपत्रशतव्यतिभेददृष्टान्तः। कथमियं संभवति? इत्याह–**उत्कर्षविशेषत इयम्**, गत्युत्कर्षविशेषदर्शनादेवमस्पृशद्गतिः संभवतीति भावनीयम्।

**सिद्धस्यापुनरागमनात्, कालस्य चानादित्वात्, षण्मासान्तः प्रायोऽनेकसिद्धे-**

---

१ "**मृल्लेपसङ्गनिर्मोक्षाद् यथा दृष्टाऽप्स्वलाबुनः। कर्मसङ्गविनिर्मोक्षात् तथा सिद्धिगतिः स्मृता** ॥११॥ **मृल्ले**पेत्यादि। अलाबुनोऽप्सु उन्मज्जनं दृष्टं मृल्लेपसङ्गनिर्मोक्षात् एवं कर्माष्टकसङ्गत्यागात् सिद्धगतिः सिद्धा ॥११॥ **एरण्डयन्त्रपेडासु बन्धच्छेदाद् यथा गतिः। कर्मबन्धनविच्छेदात् सिद्धस्यापि तथेष्यते** ॥१२॥ **एरण्डे**त्यादि। व्याघ्रपादबीजबन्धनच्छेदाद् यन्त्रबन्धनच्छेदात् पेडाबन्धनच्छेदाच्च गतिर्दृष्टा मिञ्जा-काष्ठ-पेडापुटानामेवं कर्मबन्धनविच्छेदात् सिद्धस्य गतिः।" इति **तत्वार्थभाष्यस्य** अन्त्यकारिकाणां **सिद्धसेन**गणिविरचितायां वृत्तौ ॥ २ **चासकृद्** S. विना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भव्योच्छेदप्रसङ्ग इति विभ्रमनिरासार्थमाह–**अव्यवच्छेदो भव्यानामनन्तभावेन** तथा सिद्धिगमनादावपि । वनस्पत्यादिषु कायस्थितिक्षयदर्शनादनन्तस्याऽपि राशेः क्षयोपपत्तेः पुनः संशय इति तद्व्यवच्छित्त्यर्थमाह–**एतदनन्तानन्तकम् ।** एतद् भव्यानन्तकमनन्तानन्तकम्, न युक्तानन्तकादि, **समया अत्र ज्ञातम्**, तेषां प्रतिक्षणमतिक्रमेऽनुच्छेदोऽनन्तत्वात् ।

कथं तर्हि एतदुच्यते–

ऋतुर्व्यतीतः परिवर्त्तते पुनः, क्षयं प्रयातः पुनरेति चन्द्रमाः ।
गतं गतं नैव तु संनिवर्त्तते, जलं नदीनां च नृणां च जीवितम् ॥
[ ] इति ।

उच्यत एतद्, व्यवहारतस्तूच्यते, अन्यथा तस्यैव परावृत्तौ बाल्याद्यनिवृत्तिः, तस्य तद्बाल्याद्यापादनस्वभावत्वादिति परिभावनीयम् । अतो न क्षयो भव्यानामिति स्थितम् । एवं च सति **भव्यत्वं योग्यतामात्रमेव सिद्धिं प्रति केषाञ्चित्प्राणिनां ये न कदाचिदपि सेत्स्यन्ति ।** तथा चागमः–

भव्वा वि न सिज्झसंति [3]केई [ ] इत्यादि ।

भव्यत्वं सिद्धिगमनयोग्यत्वम् । फलगम्या च योग्यता । को वा एवमभव्येभ्यो विशेषो भव्यानाम् ? इत्याशङ्काव्यपोहायाह–**प्रतिमायोग्यदारुनिदर्शनेन,** तथाहि–तुल्यायां [4]प्रति[मा]ऽनिष्पत्तौ तथाप्येकं दारु प्रतिमायोग्यं ग्रन्थ्यादिशून्यतया, न तदन्यत् तद्युक्ततयेत्याविद्वदङ्गनादिसिद्धमेतत् । न चात्रापि तत्तत्स्वभावत्वादिविकल्पचिन्ता कार्या । कुतः ? इत्याह–**व्यवहारमतमेतत्,** अयं चैवं व्यवस्थित इति भावितमेव । न चायं [5]संवृतिरूप इत्याह–**एषोऽपि तत्त्वाङ्गम्,**

---

१. "से किं तं अणंतए ? अणंतए तिविहे पण्णत्ते, तंजहा–परित्ताणंतए जुत्ताणंतए अणंताणंतए । से किं तं परित्ताणंतए ? परित्ताणंतए तिविहे पण्णत्ते, तं जहा–जहण्णए, उक्कोसए, अजहण्णमणुक्कोसए । से किं तं जुत्ताणंतए ? जुत्ताणंतए तिविहे पण्णत्ते, तंजहा–जहण्णए, उक्कोसए, अजहण्णमणुक्कोसए । से किं तं अणंताणंतए ? अणंताणंतए दुविहे पण्णत्ते, तंजहा–जहण्णए, अजहण्णमणुक्कोसए ।" इति **अनुयोगद्वारसूत्रे** सू० १४६ ॥ "सिद्धा निगोअजीवा वणस्सइ काल पुग्गला चेव । सव्वमलोगनहं पुण तिवग्गिउं केवलदुगम्मि ॥४॥८५॥" इति चतुर्थे **कर्मग्रन्थे ।** दृश्यतां षट्खण्डागमधवलाटीका १, २, २–३. खण्ड १, भाग ३, पृ० १०–३१ ॥ २ **बालाद्य°** S. ॥ ३ **के इत्यादि** S. Aमू० ॥ ४ **प्रतिऽनिष्पत्तौ** S. Aमू० ; **प्रतिनिष्पत्तौ** Aसं० B. ॥ ५ **संवृत्ति°** इति हस्तलिखितादर्शेषु पाठः । "पररूपं स्वरूपेण यया संव्रियते धिया । एकार्थप्रतिभासिन्या भावानाश्रित्य भेदिनः ॥६८॥ तया संवृतनानात्वाः संवृत्या भेदिनः स्वयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषोऽपि व्यवहारनयः परमार्थाङ्गम् इह प्रक्रमे, तथा योग्यताबुद्धेरपि सन्नि(नि?)-बन्धनत्वात्। तत्स्वभावाविशेषे तु दार्वन्तरवद् योग्यदारुण्यपि तथा बुद्ध्यसिद्धेरित्यादि निर्लोठितमन्यत्र इत्यनुष्ठानमेवाधिकृत्याह–एषोऽपि तत्त्वाङ्गम्। यथोक्तम्–

जइ जिणमयं पवज्जह ता मा ववहारनिच्छये [1]मुयह।
ववहारणयुच्छेए तित्थुच्छेओ जतोऽवस्सं ॥ [पञ्चवस्तुके गा० १७२]

अत एषोऽपि व्यवहारनयस्तत्त्वाङ्गं प्रवृत्तौ मोक्षाङ्गमित्यर्थः। कुतः? इत्याह–प्रवृत्तिविशोधनेन, तन्मतेन प्रव्रज्यादिप्रदानात् परलोकप्रवृत्तिविशोधनेन, इत्थमनेकान्तसिद्धितः [2]सन्नीत्या, तथा निश्चयाङ्गभावेन एवं प्रवृत्त्याऽपूर्वकरणादिप्राप्तेः। परिशुद्धस्तु केवलमाज्ञापेक्षी पुष्टालम्बनः। एषाऽऽज्ञेह भगवत उभयनयगर्भा, अथवा सैव पञ्चसूत्रोक्ता। किंविशिष्टा? इत्याह–समन्तभद्रा, सर्वतो निर्दोषा। कथम्? इत्याह–त्रिकोटिपरिशुद्ध्या कष-च्छेद-तापपरिशुद्ध्या। इयं च भागवती सदाज्ञा सैव अपुनर्बन्धकादिगम्या। अपुनर्बन्धकादयो ये सत्त्वा उत्कृष्टां कर्मस्थितिं तथा अपुनर्बन्धकत्वेन ये क्षपयन्ति ते खल्वपुनर्बन्धकाः। आदिशब्दान्मार्गाभिमुख-मार्गपतितादयः परिगृह्यन्ते दृढप्रतिज्ञालोचकादिलिङ्गाः, एतद्गम्येयम्, न संसाराभिनन्दिगम्या, [3]तेषां ह्यतो विषयप्रतिभासमात्रं ज्ञानमुदेति, न तद्धेयत्वादिवेदकमिति। उक्तं च–

न यथाऽवस्थितं शास्त्रं खल्वज्ञो वेत्ति जातुचित्।
ध्यामलादपि बिम्बात्तु निर्मलः स्यात् स्वहेतुतः ॥ [ ]

अपुनर्बन्धकत्वादिलिङ्गमाह–

## एयपियत्तं खलु एत्थ लिंगं, ओचित्तपवित्तिविन्नेयं, संवेगसाहगं नियमा। न एसा अन्नेसिं देया। लिंगविवज्जयाओ

अभेदिन इवाभान्ति भावा रूपेण केनचित् ॥६९॥" इति प्रमाणवार्तिके स्वार्थानुमानपरिच्छेदे। "यया धिया······रूपं···संव्रियते प्रच्छाद्यते सा बुद्धिः संवृतिरुच्यते" इति प्रमाणवार्तिकस्य मनोरथनन्दिविरचितायां टीकायाम् ॥

१ मुहय S. Am. । "जइ जिणमयं पवज्जह ता मा ववहारणिच्छए मुअह। ववहारणउच्छेए तित्थुच्छेओ जओऽवस्सं ॥१७२॥ यदि जिनमतं प्रपद्यध्वं यूयं ततो मा व्यवहारनिश्चयौ मुञ्चत मा हासिष्टाः, किमित्यत्र आह–व्यवहारनयोच्छेदे तीर्थोच्छेदो यतोऽवश्यम्। अतो व्यवहारतोऽपि प्रव्रजितः प्रव्रजित एव। गाथार्थः।" इति आचार्यश्री हरिभद्रसूरिविरचितायां पञ्चवस्तुकस्वोपज्ञवृत्तौ ॥ २ तन्नीत्या S. ॥ ३ तेषां गृहतो S. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]तप्परिण्णा । तयणुग्गहट्ठाए आमकुंभोदगनासनाएणं । एसा करुण त्ति वुच्चइ एगंतपरिसुद्धा अविराहणाफला तिलोगनाह-बहुमाणेणं निस्सेयससाहिग त्ति पव्वज्जाफलसुत्तं ॥[2]

॥ समत्तं पंचसुत्तं ॥

एतत्प्रियत्वं खल्वत्र लिङ्गम्, आज्ञाप्रियत्वमपुनर्बन्धकादिलिङ्गम् । प्रियत्वमुपलक्षणं श्रवणाभ्यासादेः । एतदप्यौचित्यप्रवृत्तिविज्ञेयम्, तदाराधनेन तद्बहुमानात् । औचित्यबाधया तु प्रवृत्तौ न तत्प्रियत्वम्, मोह एवासाविति । एतत्प्रियत्वमेव विशेष्यते–संवेगसाधकं नियमात् । यस्य भागवती सदाज्ञा प्रिया तस्य नियमतः संवेग इति । यत एवमतो नैषा अन्येभ्यो देया, नैषा भागवती सदाज्ञा अन्येभ्योऽपुनर्बन्धकादिव्यतिरिक्तेभ्यः संसाराभिनन्दिभ्यो देया । कथं ते ज्ञायन्ते? इत्याह– लिङ्गविपर्ययात् तत्परिज्ञा, प्रक्रमादपुनर्बन्धकादिलिङ्गविपर्ययात् सज्ज्ञानद्वेषादिलक्षणात् तत्परिज्ञा संसाराभिनन्दिपरिज्ञा । उक्तं च–

---

१ तओपरिण्णा K. ॥ २ अत्र प्रतिष्वीदृशाः पाठाः—

° साहिगत्ति पवज्जाफलसुत्तं संम्मत्तं । पंचसूत्रं समत्तं ।-K1.

° साहिगित्ति ॥छ॥छ॥ पवज्ज फलसुत्तं समत्तं ॥छ॥ समत्तं पंचसूत्रं ॥छ॥छ॥-K.

साहगत्ति ॥छ॥ समत्तं [च Sमू०] पंचमं सुत्रं ॥छ॥
नम्रेन्द्रमौलिगलितोत्तमपारिजात मालार्चितक्रम भवन्तमपराजित(मपारिजात) ।
नाभेय नौमि भुवनत्रिकपापवर्गदायि......नास्तमदनादिकपापवर्ग ॥१॥
यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥२॥छ॥ मंगलमस्तु ॥छ॥—S.

° साहिग त्ति पव्वज्जाफलसुत्रं । समाप्तं पंचसूत्रकं ॥छ॥ कृतं चिरंतनाचार्यैर्विवृतं च जाकिनीमहत्तरासूनुश्रीहरिभद्राचार्यैः ॥छ॥ संवत् १६७३ मागर्श सुद ६ बुधे लखत् ॥ छ ॥ सं १६७३ वर्षे दा० जीवराजेन सुतरायकरणादिपरिवारपरिवृतेन पंचसूत्रपुस्तकं लिखीकारितम् ॥—C.

° साहिग त्ति पव्वज्जाफलंसुत्रं । समाप्तं पंचसूत्रकं ॥छ॥ कृतं चिरंतनाचार्यैर्विवृतं च जाकिनीमहत्तरासूनुश्रीहरिभद्राचार्यैः ॥छ॥ शुभं भवतु ॥छ॥श्री॥श्री॥ ॥श्री॥ कल्याणं भूयात् ॥ —D.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]क्षुद्रो [2]लाभरतिर्दीनो मत्सरी भयवान् शठः ।
अज्ञो भवाभिनन्दी स्यान्निष्फलारम्भसङ्गतः ॥

[योगदृष्टि० ७६, योगबिन्दौ ८७]

किमिति न तेभ्यो देया? इत्याह–तदनुग्रहार्थं संसाराभिनन्दिसत्त्वानुग्रहार्थम्। उक्तं च–

अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम् ।
दोषायाभिनवोदीर्णे शमनीयमिव ज्वरे ॥ [लोकतत्त्वनिर्णये ७]

इहैव निदर्शनमाह–आमकुम्भोदकन्यासज्ञातेन। उक्तं च–

आमे घडे निहित्तं, जहा जलं तं घडं विणासेइ ।
इय सिद्धंतरहस्सं, अप्पाहारं विणासेइ ॥ [[3]पञ्चवस्तुके गा० ९८२]

एषा करुणोच्यते, [4]अयोग्येभ्यः सदाज्ञाऽप्रदानरूपा। किंविशिष्टा? इत्याह–एकान्तपरिशुद्धा, तदपायपरिहारेण। अत एवेयमविराधनाफला, सम्यगालोचनेन। न पुनर्ग्लानापथ्यप्रदाननिबन्धनकरुणावत् तदाभासेति। इयं चैवंभूता त्रिलोकनाथबहुमानेन हेतुना निःश्रेयससाधिकेति। किमुक्तं भवति? नाऽनागमिकस्येयं भवति, किन्तु परिणतागमिकस्य। अस्य च भगवत्येवं बहुमानः। एवं चेयं मोक्षसाधिकैव सानुबन्धशुभप्रवृत्तिभावेन। प्रव्रज्याफलसूत्रं समाप्तम्, एवं पञ्चमसूत्रव्याख्या समाप्ता ॥

॥ समाप्तं पञ्चसूत्रकं व्याख्यानतोऽपि ॥

नमः श्रुतदेवतायै भगवत्यै। सर्वनमस्कारार्हेभ्यो नमः। सर्ववन्दनार्हान् वन्दे। सर्वोपकारिणामिच्छामो वैयावृत्यम्। सार्वानुभावादौचित्येन मे धर्मे

---

१. "क्षुद्रः कृपणः। लाभरतिर्याच्ञाशीलः। दीनः सदैवाकल्याणदर्शी। मत्सरी परकल्याणदुःस्थितः। भयवान् नित्यभीतः। शठो मायावी। अज्ञो मूर्खः। भवाभिनन्दी संसारबहुमानी स्यादेवम्भूतो निष्फलारम्भसंगतः सर्वत्रातत्त्वाभिनिवेशादिति।" इति योगदृष्टिसमुच्चयस्य स्वोपज्ञवृत्तौ ॥ २ लोभ° / . B. ॥ ३. "आमे घटे निषिक्तं सत् यथा जलं तं घटमामं विनाशयति इय एवं सिद्धान्तरहस्यमप्यल्पाधारं प्राणिनं विनाशयतीति गाथार्थः।" इति पञ्चसूत्रकस्वोपज्ञवृत्तौ ॥ ४. 'अन्येभ्यः' इति क्वचित् पाठः—Aटि० । अयोगेभ्यः सदाज्ञाऽप्रदानरूपा Aमू० । अयोगेभ्यः प्रदानरूपा S. । ५ तुला–"प्रव्रज्याविधानादीनि पञ्च वस्तूनि यस्मिन् प्रकरणे तत् पञ्चवस्तु, पञ्चवस्त्वेव पञ्चवस्तुकं ग्रन्थं यथाक्रमम्...... कीर्तयिष्यामि" इति आचार्यश्री हरिभद्रसूरिविरचितायां पञ्चवस्तुकप्रथमगाथास्वोपज्ञवृत्तौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवृत्तिर्भवतु । सर्वे सत्त्वाः सुखिनः सन्तु, सर्वे सत्त्वाः सुखिनः सन्तु, सर्वे सत्त्वाः सुखिनः सन्तु ॥

## । पञ्चसूत्रकटीका समाप्ता ।

कृतिः सिताम्बराचार्यहरिभद्रस्य, धर्मतो याकिनीमहत्तरासूनोः ।

। ग्रन्थाग्रमनुष्टुप्छन्दोद्देशतः शतान्यष्टावशीत्यधिकानि ८८० ।

---

१ °कानि ॥छ॥८८०॥छ॥
अल्पग्रन्थं महार्थं स्फुटललितपदं सूक्तमन्यैरनुक्तं
ग्रन्थं कुर्मः कवीन्द्रा वयमिति हि मदांत्वैषनश्चित्तदर्थः(मदान्नैष नश्चित्तदर्पः) ।
किन्तु ग्रन्थार्थतत्त्वग्रहविशदधियां कोमलस्पष्टवाचा-
मभ्यस्यन्तो गुरूणां वचनकुशलतां कालमेवं नयामः ॥१॥
रङ्गद्रागादिभ(भो)गिविषयविषधरे मज्जतां ग्रो जनानां
रोगोग्रग्राहरौद्रे भवसलिलनिधावक्षयं यानपात्रम् ।
प्राप्यन्ते यस्य चाप्त्या भ्रमदलिकरटा दन्तिनो स्वस्त्रियश्च
प्रोत्फुल्लेन्दिवराक्षाः शशधरवदनाः सोऽस्तु वो धर्मलाभः ॥२॥छ॥
शुभं भवतु श्रीः—S.
०कानि ॥छ॥ ग्रंथाग्रं ८८० । संवत् १६७३ वर्षे मागशर सुद ४ सोमे लखत॥
शुभं भवतु श्री कल्याणमस्तु ॥छ॥ श्री॥ —A.
०कानि ॥छ॥ ग्रंथाग्रं ८०० । संवत् १६७४ वर्षे आसाढसुदि ८ —B ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ अथ सटीकस्य पञ्चसूत्रकस्य पञ्च परिशिष्टानि ॥

१ पञ्चसूत्रकम् [ मूलमात्रम् ]
२ पञ्चसूत्रकान्तर्गता विशिष्टाः शब्दाः
३ पञ्चसूत्रकटीकान्तर्गता विशिष्टाः शब्दाः
४ पञ्चसूत्रकटीकायामुद्धृतानां पाठानामकारादिक्रमः
५ कतिपयानि विशिष्टानि टिप्पणानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

|| अर्हम् ||
|| श्री शङ्खेश्वरपार्श्वनाथाय नमः ||
|| श्री महावीरस्वामिने नमः ||
|| श्री गौतमस्वामिने नमः ||

चिरन्तनाचार्यविरचितं

# पञ्चसूत्रकम्

## [ मूलमात्रम् ]

### [ अथ प्रथमं पापप्रतिघातगुणबीजाधानसूत्रम् ]

[१] णमो वीतरागाणं सव्वण्णूणं देविंदपूइयाणं जहट्ठियवत्थुवाईणं तेलोकगुरूणं अरुहंताणं भगवंताणं जे एवमाइक्खंति–इह खलु अणाइजीवे, अणादिजीवस्स भवे अणादि-कम्मसंजोगणिव्वत्तिए, दुक्खरूवे, दुक्खफले, दुक्खाणुबंधे ।

[२] एयस्स णं वोच्छित्ती सुद्धधम्माओ । सुद्धधम्मसंपत्ती पावकम्मविगमाओ । पावकम्मविगमो तहाभव्वत्तादिभावाओ ।

[३] तस्स पुण विवागसाहणाणि–चउसरणगमणं, दुक्कडगरिहा, सुकडासेवणं । अओ कायव्वमिणं होउकामेणं सया सुप्पणिहाणं, भुज्जो भुज्जो संकिलिसे, तिकालमसंकिलिसे ।

[४] जावज्जीवं मे भगवंतो परमतिलोगणाहा अणुत्तरपुण्णसंभारा खीणरागदोसमोहा अचिंतचिंतामणी भवजलहिपोया एगंतसरण्णा अरहंता सरणं ।

[५] तहा पहीणजरामरणा अवेयकम्मकलंका पणट्ठवाबाहा केवलनाणदंसणा सिद्धि-पुरवासी णिरुवमसुहसंगया सव्वहा कयकिच्चा सिद्धा सरणं ।

[६] तहा पसंतगंभीरासया सावज्जजोगविरया पंचविहायारजाणगा परोवयारनिरया पउमाइणिदंसणा झाणज्झयणसंगया विसुज्झमाणभावा साहू सरणं ।

[७] तहा सुरासुरमणुयपूइओ मोहतिमिरंसुमाली, राग-दोसविसपरममंतो, हेऊ सयल-कल्लाणाणं, कम्मवणविहावसू, साहगो सिद्धभावस्स, केवलिपण्णत्तो धम्मो जावज्जीवं मे भगवं सरणं ।

[८] सरणमुवगओ य एएसिं गरिहामि दुक्कडं–जण्णं अरहंतेसु वा, सिद्धेसु वा, आयरिएसु वा, उवज्झाएसु वा, साहूसु वा, साहुणीसु वा, अन्नेसु वा धम्मट्ठाणेसु माणणि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्जेसु पूयणिज्जेसु, तहा माईसु वा, पिईसु वा, बंधूसु वा, मित्तेसु वा, उवयारीसु वा, ओहेण वा जीवेसु, मग्गट्ठिएसु, अमग्गट्ठिएसु, मग्गसाहणेसु, अमग्गसाहणेसु, जं किंचि वितहमायरियं अणायरियव्वं अणिच्छियव्वं पावं पावाणुबंधि सुहमं वा बायरं वा मणेण वा वायाए वा काएण वा कयं वा कारियं वा अणुमोइयं वा रागेण वा दोसेण वा मोहेण वा, एत्थ वा जम्मे जम्मंतरेसु वा, गरहियमेयं दुक्कडमेयं उज्झियव्वमेयं, वियाणियं मए कल्लाण-मित्तगुरुभयवंतवयणाओ, एवमेयं ति रोइयं सद्धाए, अरहंत-सिद्धसमक्खं गरहामि अहमिणं 'दुक्कडमेयं उज्झियव्वमेयं'। एत्थ मिच्छामि दुक्कडं, मिच्छामि दुक्कडं, मिच्छामि दुक्कडं ।

[९] होउ मे एसा सम्मं गरहा । होउ मे अकरणनियमो । बहुमयं ममेयं ति इच्छामि अणुसट्ठिं अरहंताणं भगवंताणं गुरूणं कल्लाणमित्ताणं ति । होउ मे एएहिं संजोगो । होउ मे एसा सुपत्थणा । होउ मे एत्थ बहुमाणो । होउ मे इओ मोक्खबीयं ।

[१०] पत्तेसु एएसु अहं सेवारिहे सिया, आणारिहे सिया, पडिवत्तिजुत्ते सिया, निरइयारपारगे सिया ।

[११] संविग्गो जहासत्तीए सेवेमि सुकडं । अणुमोएमि सव्वेसिं अरहंताणं अणुट्ठाणं, सव्वेसिं सिद्धाणं सिद्धभावं, सव्वेसिं आयरियाणं आयारं, सव्वेसिं उवज्झायाणं सुत्तप्पयाणं, सव्वेसिं साहूणं साहुकिरियं, सव्वेसिं सावगाणं मोक्खसाहणजोगे, एवं सव्वेसिं देवाणं सव्वेसिं जीवाणं होउकामाणं कल्लाणासयाणं मग्गसाहणजोगे ।

[१२] होउ मे एसा अणुमोयणा सम्मं विहिपुव्विगा, सम्मं सुद्धासया, सम्मं पडिवत्ति-रूवा, सम्मं निरइयारा, परमगुणजुत्तअरहंतादिसामत्थओ । अचिंतसत्तिजुत्ता हि ते भगवंतो वीयरागा सव्वण्णू परमकल्लाणा परमकल्लाणहेऊ सत्ताणं । मूढे अम्हि पावे अणाइमोह-वासिए, अणभिण्णे भावओ हियाहियाणं अभिण्णे सिया, अहियनिवित्ते सिया, हियपवित्ते सिया, आराहगे सिया, उचियपडिवत्तीए सव्वसत्ताणं, सहियं ति इच्छामि सुकडं, इच्छामि सुकडं, इच्छामि सुकडं ।

[१३] एवमेयं सम्मं पढमाणस्स सुणमाणस्स अणुप्पेहमाणस्स सिढिलीभवंति परि-हायंति खिज्जंति असुहकम्माणुबंधा । निरणुबंधे वाऽसुहकम्मे भग्गसामत्थे सुहपरिणामेणं कडगबद्धे विय विसे अप्पफले सिया, सुहावणिज्जे सिया, अपुणभावे सिया ।

[१४] तहा आसगलिज्जंति परिपोसिज्जंति निम्मविज्जंति सुहकम्माणुबंधा । साणु-बंधं च सुहकम्मं पगिट्ठं पगिट्ठभावज्जियं नियमफलयं सुप्पउत्ते विय महागए सुहफले सिया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुहपवत्तगे सिया, परमसुहसाहगे सिया। अओ अप्पडिबंधमेयं असुहभावनिरोहेणं सुहभावबीयं ति सुप्पणिहाणं सम्मं पढियव्वं सोयव्वं अणुप्पेहियव्वं ति।

[१५] नमो नमियनमियाणं परमगुरुवीयरागाणं। नमो सेसनमोक्काराऽरिहाणं। जयउ सव्वण्णुसासणं। परमसंबोहीए सुहिणो भवंतु जीवा, सुहिणो भवंतु जीवा, सुहिणो भवंतु जीवा इति पावपडिघायगुणबीजाहाणसुत्तं समत्तं ॥१॥

## [ अथ द्वितीयं साधुधर्मपरिभावनासूत्रम् ]

[१६] जायाए धम्मगुणपडिवत्तिसद्धाए, भावेज्जा एएसिं सरूवं पयइसुंदरत्तं, आणुगामित्तं, परोवयारित्तं, परमत्थहेउत्तं। तहा दुरणुचरत्तं, भंगदारुणत्तं, महामोहजणगत्तं, भूयो दुल्लहत्तं ति। भावेऊणेवं जहासत्तीए उचियविहाणमेव अच्चंतभावसारं पडिवज्जेज्जा, तंजहा—थूलगपाणाइवायविरमणं १, थूलगमुसावायविरमणं २, थूलगअदत्तादानविरमणं ३, थूलगमेहुणविरमणं ४, थूलगपरिग्गहविरमण ५ मिच्चाइ।

[१७] पडिवज्जिऊण पालणे जइज्जा, सयाऽऽणागाहगे सिया, सयाऽऽणाभावगे सिया, सयाऽऽणापरतंते सिया। आणा हि मोहविसपरममंतो, जलं दोसाइजलणस्स, कम्मवाहिचिगिच्छासत्थं, कप्पपायवो सिवफलस्स।

[१८] वज्जेज्जा अधम्ममित्तजोगं। चिंतेज्जा अभिणवपाविए गुणे, अणाइभवसंगए य अगुणे, उदग्गसहकारित्तं अधम्ममित्ताणं, उभयलोगगरहियत्तं, असुहजोगपरंपरं च।

[१९] परिहरेज्जा सम्मं लोगविरुद्धे अणुकंपापरे जणाणं, न खिंसावेज्ज धम्मं, संकिलेसो खु एसा, परमबोहिबीयं अबोहिफलमप्पणो त्ति। एवमालोचेज्जा न—खलु एत्तो परो अणत्थो, अंधत्तमेयं संसाराडवीए, जणगमणिट्ठवायाणं, अइदारुणं सरूवेणं असुहाणुबंधमच्चत्थं।

[२०] सेवेज्ज धम्ममित्ते विहाणेणं, अंधो विय अणुकड्ढगे, वाहिओ विव वेज्जे, दरिद्दो विय ईसरे, भीओ विय महानायगे। न इओ सुंदरतरमन्नं ति बहुमाणजुत्ते सिया, आणाकंखी, आणापडिच्छगे, आणाअविराहगे, आणानिप्फायगे त्ति।

[२१] पडिवन्नधम्मगुणारिहं च वट्टिज्जा गिहिसमुचिएसु गिहिसमायारेसु परिसुद्धाणुट्ठाणे परिसुद्धमणकिरिए परिसुद्धवइकिरिए परिसुद्धकायकिरिए।

[२२] वज्जेज्जाऽणेगोवघायकारगं गरहणिज्जं बहुकिलेसं आयइविराहगं समारंभं। न चिंतेज्ज परपीडं। न भावेज्ज दीणयं। न गच्छेज्ज हरिसं। न सेवेज्ज वितहाभिणिवेसं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उचियमणपवत्तगे सिया। एवं न भासेज्ज अलियं, न फरुसं, न पेसुन्नं, नाणिबद्धं। हिय-मिय-भासगे सिया। एवं न हिंसेज्ज भूयाणि। न गिण्हेज्ज अदत्तं। न निरिक्खेज्ज परदारं। न कुज्जा अणत्थदंडं। सुहकायजोगे सिया।

[२३] तहा लाभोचियदाणे लाभोचियभोगे लाभोचियपरिवारे लाभोचियनिहिकरे सिया, असंतावगे परिवारस्स, गुणकरे जहासत्ति, अणुकंपापरे, निम्ममे भावेणं। एवं खु तप्पालणे वि धम्मो जहऽन्नपालणे त्ति। सव्वे जीवा पुढो पुढो, ममत्तं बंधकारणं।

[२४] तहा तेसु तेसु समायारेसु सइसमन्नागए सिया, अमुगे अहं, अमुगकुले, अमुगसीसे, अमुगधम्मट्ठाणट्ठिए, न मे तव्विराहणा, न मे तदारंभो, वुड्ढी ममेयस्स, एयमेत्थ सारं, एयमायभूयं, एयं हियं। असारमन्नं सव्वं विसेसओ अविहिगहणेणं विवागदारुणं च त्ति। एवमाह तिलोगबंधू परमकारुणिगे सम्मं संबुद्धे भगवं अरहंते त्ति। एवं समालोचिय तदविरुद्धेसु समायारेसु सम्मं वट्टेज्जा। भावमंगलमेयं तन्निप्फत्तीए।

[२५] तहा जागरिज्ज धम्मजागरियाए — को मम कालो, किमेयस्स उचियं। असारा विसया नियमगामिणो विरसावसाणा। भीसणो मच्चू, सव्वाभावकारी, अविन्नायागमणो, अणिवारणिज्जो, पुणो पुणोऽणुबंधी। धम्मो एयस्स ओसहं एगंतविसुद्धो महापुरिससेविओ सव्वहियकारी निरइयारो परमाणंदहेऊ।

[२६] नमो इमस्स धम्मस्स। नमो एयधम्मपयासयाणं। नमो एयधम्मपालयाणं। नमो एयधम्मपरूवयाणं। नमो एयधम्मपवज्जगाणं। इच्छामि अहमिणं धम्मं पडिवज्जित्तए सम्मं मण-वयण-कायजोगेहिं। होउ ममेयं कल्लाणं परमकल्लाणाणं जिणाणमणुभावओ। सुप्पणिहाणमेवं चिंतेज्जा पुणो पुणो। एयधम्मजुत्ताणं अववायकारी सिया। पहाणं मोहच्छेयणमेयं। एवं विसुज्झमाणे विसुज्झमाणे भावणाए कम्मापगमेणं उवेइ एयस्स जोग्गयं। तहा संसारविरत्ते संविग्गे भवइ अममे अपरोवयावी विसुद्धे विसुज्झमाणभावे त्ति साहुधम्मपरिभावणासुत्तं समत्तं ॥२॥

## [ अथ तृतीयं प्रव्रज्याग्रहणविधिसूत्रम् ]

[२७] परिभाविए साहुधम्मे, जहोदियगुणे जएज्जा सम्ममेयं पडिवज्जित्तए अपरोवतावं। परोवतावो हि तप्पडिवत्तिविग्घो। अणुपाओ खु एसो। न खलु अकुसलारंभओ हियं। अप्पडिबुद्धे कहिंचि पडिबोहेज्जा अम्मापियरे। उभयलोगसफलं जीवियं, समुदायकडा कम्मा समुदायफल त्ति। एवं सुदीहो अविओगो। अण्णहा एगरुक्खनिवासि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सउणतुल्लमेयं । उद्दामो मच्चू पच्चासण्णो य । दुल्लहं मणुयत्तं समुद्दपडियरयणलाभतुल्लं । अइप्पभूया अन्ने भवा दुक्खबहुला मोहंधयारा अकुसलाणुबंधिणो अजोग्गा सुद्धधम्मस्स । जोग्गं च एयं पोयभूयं भवसमुद्दे, जुत्तं सकज्जे निउंजिउं संवरट्ठइयछिद्दं नाणकण्णधारं तवपवणजवणं । खणे एस दुल्लहे सव्वकज्जोवमाईए सिद्धिसाहगधम्मसाहगत्तेण । उवादेया य एसा जीवाणं । जं न इमीए जम्मो, न जरा, न मरणं, न इट्ठविओगो, नाणिट्ठसंपओगो, न खुहा, न पिवासा, न अन्नो कोइ दोसो, सव्वहा अपरतंतं जीवावत्थाणं असुभरागाइरहियं संतं सिवं अव्वाबाहं ति ।

[२८] विवरीओ य संसारो इमीए अणवट्ठियसहावो । एत्थ खलु सुही वि असुही, संतमसंतं, सुविणे व सव्वमाउलं ति । ता अलमेत्थ पडिबंधेणं । करेह मे अणुग्गहं । उज्जमह एयं वोच्छिंदित्तए । अहं पि तुम्हाणुमईए साहेमि एयं निव्विण्णो जम्ममरणेहिं । समिज्झइ य मे समीहियं गुरुपभावेणं । एवं सेसे वि बोहेज्जा । तओ सममेएहिं सेवेज्ज धम्मं । करेज्जोचियकरणिज्जं निरासंसो हु सव्वदा । एयं परममुणिसासणं ।

[२९] अबुज्झमाणेसु य कम्मपरिणईए विहेज्जा जहासत्ति तदुवकरणं आओवायसुद्धं समईए । कयण्णुया खु एसा । करुणा य धम्मप्पहाणजणणी जणम्मि । तओ अणुण्णाए पडिवज्जेज्ज धम्मं । अण्णहा अणुवहे चेवोवहाजुत्ते सिया । धम्माराहणं खु हियं सव्वसत्ताणं । तहा तहेयं संपाडेज्जा । सव्वहा अपडिवज्जमाणे चएज्ज ते अट्ठाणगिलाणोसहत्थचागनाएणं ।

[३०] से जहा नाम केइ पुरिसे कहंचि कंतारगए अम्मापितिसमेए तप्पडिबद्धे वच्चेज्जा । तेसिं तत्थ नियमघाई पुरिसमित्तासज्झे संभवंतोसहे महायंके सिया । तत्थ से पुरिसे तप्पडिबंधाओ एवमालोचिय 'न भवंति एए नियमओ ओसहमंतरेण, ओसहभावे य संसओ, कालसहाणि य एयाणि', तहा संठविय संठविय तदोसहनिमित्तं सवित्तिनिमित्तं च चयमाणे साहू । एस चाए अचाए । अचाए चेव चाए । फलमेत्थ पहाणं बुहाणं । धीरा एयदंसिणो । स ते ओसहसंपाडणेण जीवावेज्जा । संभवाओ पुरिसोचियमेयं ।

[३१] एवं सुक्कपक्खिगे महापुरिसे संसारकंतारपडिए अम्मापिइसंगए धम्मपडिबद्धे विहरेज्जा । तेसिं तत्थ नियमविणासगे अपत्तबीजाइपुरिसमित्तासज्झे संभवंतसम्मत्ताइओसहे मरणाइविवागे कम्मायंके सिया । तत्थ से सुक्कपक्खिगपुरिसे धम्मपडिबंधाओ एवं समालोचिय 'विणस्संति एए अवस्सं सम्मत्ताइओसहविरहेण, तस्संपायणे विभासा, कालसहाणि य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयाणि ववहारओ', तहा संठविय संठविय इहलोगचिंताए तेसिं सम्मत्ताइओसहनिमित्तं विसिट्ठगुरुमाइभावेणं सवित्तिनिमित्तं च किच्चकरणेण चयमाणे संयमपडिवत्तीए ते साहु(हू ?) सिद्धीए। एस चाए अचाए, तत्तभावणाओ। अचाए चेव चाए, मिच्छाभावणाओ। तत्तफलमेत्थ पहाणं बुहाणं परमत्थओ। धीरा एयदंसिणो आसन्नभव्वा।

[३२] स ते सम्मत्ताइओसहसंपाडणेण जीवावेज्जा अच्चंतियं अमरणमरणावंझबीअजोगेणं। संभवाओ सुपुरिसोचियमेयं। दुप्पडियाराणि अम्मापिईणि। एस धम्मो सयाणं। भगवं एत्थ नायं परिहरमाणे अकुसलाणुबंधि अम्मापिइसोगं ति। एवमपरोवतावं सव्वहा सुगुरुसमीवे, पूजिऊण भगवंते वीयरागे साहू य, तोसिऊण विहवोचियं किवणाई, सुप्पउत्तावस्सगे सुविसुद्धनिमित्ते समहिवासिए विसुद्धजोगे विसुज्झमाणे महया पमोएणं सम्मं पव्वएज्जा लोगधम्मेहिंतो लोगुत्तरधम्मगमणेणं। एसा जिणाणमाणा महाकल्लाण त्ति न विराहियव्वा बुहेणं महाणत्थभयाओ सिद्धिकंखिण त्ति पव्वज्जागहणविहिसुत्तं समत्तं ॥३॥

## [ अथ चतुर्थं प्रव्रज्यापरिपालनासूत्रम् ]

[३३] स एवमभिपव्वइए समाणे सुविहिभावओ किरियाफलेण जुज्जइ, विसुद्धचरणे महासत्ते, न विवज्जयमेइ। एयाभावेऽभिप्पेयसिद्धी उवायपवित्तीओ। नाविवज्जत्थोऽणुवाए पयट्टइ। उवाओ य उवेयसाहगो नियमेण। तस्सतत्तचाओ अण्णहा, अइप्पसंगाओ, निच्छयमयमेयं।

[३४ से समलेट्ठुकंचणे समसत्तुमित्ते नियत्तग्गहदुक्खे पसमसुहसमेए सम्मं सिक्खमाइयइ, गुरुकुलवासी, गुरुपडिबद्धे, विणीए, भूयत्थदरिसी, न इओ हियतरं ति मन्नइ, सुस्सूसाइगुणजुत्ते तत्ताभिनिवेसा विहिपरे परममंतो त्ति अहिज्जइ सुत्तं बद्धलक्खे आसंसाविप्पमुक्के आययट्ठी। स तमवेइ सव्वहा। तओ सम्मं निउंजइ। एयं धीराण सासणं। अण्णहा अणिओगो, अविहिगहियमंतनाएणं।

[३५] अणाराहणाए न किंचि, तदणारंभओ धुवं। एत्थ मग्गदेसणाए दुक्खं, अवधीरणा, अप्पडिवत्ती। नेवमहीयमहीयं, अवगमविरहेण। न एसा मग्गगामिणो।

[३६] विराहणा अणत्थमुहा, अत्थहेऊ, तस्सारंभओ धुवं। एत्थ मग्गदेसणाए अणभिनिवेसो, पडिवत्तिमेत्तं, किरियारंभो। एवं पि अहीयं अहीयं, अवगमलेसजोगओ। अयं सबीओ नियमेण। मग्गगामिणो खु एसा अवायबहुलस्स।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[३७] निरवाए जहोदिए सुत्तुत्तकारी हवइ पवयणमाइसंगए पंचसमिए तिगुत्ते। अणत्थपरे एयच्चाए अवियत्तस्स, सिसुजणणिचायनाएण। वियत्ते एत्थ केवली एयफलभूए। सम्ममेयं वियाणइ दुविहाए परिण्णाए।

[३८] तहा आसासपयासदीवं संदीणा-ऽथिराइभेयं। असंदीण-थिरत्थमुज्जमइ। जहासत्तिमसंभंते अणूसगे, असंसत्तजोगाराहए भवइ। उत्तरुत्तरजोगसिद्धीए मुच्चइ पावकम्मुण त्ति विसुज्झमाणे आभवं भावकिरियमाराहेइ। पसमसुहमणुहवइ अपीडिए संजम-तवकिरिआए, अव्वहिए परीसहोवसग्गेहिं, वाहियसुकिरियानाएणं।

[३९] से जहा केइ महावाहिगहिए, अणुभूयतव्वेयणे, विण्णाया सरूवेण, निव्विण्णे तत्तओ, सुवेज्जवयणेण सम्मं तमवगच्छिय जहाविहाणओ पवन्ने सुकिरियं, निरुद्धजहिच्छाचारे, तुच्छपत्थभोई मुच्चमाणे वाहिणा नियत्तमाणवेयणे समुवलब्भारोग्गं पवड्ढमाणतब्भावे, तल्लाभनिव्वुईए तप्पडिबंधाओ सिराखाराइजोगे वि वाहिसमारोग्गविण्णाणेण इट्ठनिप्फत्तीओ अणाकुलभावयाए किरिओवओगेण, अपीडिए, अव्वहिए, सुहलेस्साए वड्ढइ, वेज्जं च बहु मन्नइ।

[४०] एवं कम्मवाहिगहिए, अणुभूयजम्माइवेयणे, विण्णाया दुक्खरूवेणं, निव्विण्णे तत्तओ तओ, सुगुरुवयणेण अणुट्ठाणाइणा तमवगच्छिय पुव्वुत्तविहाणओ पवन्ने सुकिरियं पवज्जं, निरुद्धपमायचारे, असारसुद्धभोई, मुच्चमाणे कम्मवाहिणा, नियत्तमाणिट्ठवियोगाइवेयणे, समुवलब्भ चरणारोग्गं पवड्ढमाणसुहभावे, तल्लाभनिव्वुईए तप्पडिबंधविसेसओ परीसहोवसग्गभावे वि तत्तसंवेयणाओ कुसलसिद्धीए थिरासयत्तेण धम्मोवओगाओ सया थिमिए तेउल्लेसाए वड्ढइ, गुरुं च बहु मन्नइ जहोचियं असंगपडिवत्तीए, निसग्गपवित्तिभावेण एसा गुरू वियाहिया भावसारा विसेसओ भगवंतबहुमाणेणं। जो मं पडिमन्नइ से गुरुं ति तयाणा। अन्नहा किरिया अकिरिया कुलडानारीकिरियासमा, गरहिया तत्तवेईणं, अफलफलजोगओ। विसन्नतत्तीफलमेत्थ नायं। आवट्टे खु तप्फलं असुहाणुबंधे।

[४१] आयओ गुरुबहुमाणो अवंझकारणत्तेण। अओ परमगुरुसंजोगो। तओ सिद्धी असंसयं। एसेह सुहोदए, पगिट्ठतयणुबंधे, भववाहितेगिच्छी। न इओ सुंदरं परं। उवमा एत्थ न विज्जई। से एवंपण्णे एवंभावे एवंपरिणामे अप्पडिवडिए वड्ढमाणे तेउलेसाए दुवालसमासिएणं परियाएणं अइक्कमइ सव्वदेवतेउलेसं। एवमाह महामुणी। तओ सुक्के सुक्काभिजाई भवइ। पायं छिण्णकम्माणुबंधे। खवइ लोगसण्णं। पडिसोयगामी, अणुसोयनियत्ते, सया



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुहजोगे, एस जोगी वियाहिए। एस आराहगे सामण्णस्स । जहागहियपइण्णे सव्वोवहासुद्धे संधइ सुद्धगं भवं सम्मं अभवसाहगं भोगकिरिया-सुरूवाइकप्पं । तओ ता संपुण्णा पाउणइ अविगलहेउभावओ असंकिलिट्ठसुहरूवाओ अपरोवतावीणीओ सुंदराओ अणुबंधेणं । न य अण्णा संपुण्णा, तत्तत्तखंडणेणं ।

[४२] एयं नाणं ति वुच्चइ । एयंमि सुहजोगसिद्धी उचियपडिवत्तिपहाणा। एत्थ भावे पवत्तगे। पायं विग्घो न विज्जइ निरणुबंधासुहकम्मभावेण। अक्खित्ता उ इमे जोगा भावाराहणाओ तहा, तओ सम्मं पवत्तइ, निप्फाएइ अणाउले। एवं किरिया सुकिरिया एगंतनिक्कलंका निक्कलंकत्थसाहिया, तहा सुहाणुबंधा उत्तरुत्तरजोगसिद्धीए। तओ से साहइ परं परत्थं सम्मं तक्कुसले सया तेहिं तेहिं पगारेहिं साणुबंधं, महोदए बीजबीजादिट्ठावणेणं, कत्तिविरिआइजुत्ते, अवंझसुहचेट्ठे, समंतभद्दे, सुप्पणिहाणाइहेऊ, मोहतिमिरदीवे, रागामय-वेज्जे, दोसाणलजलनिही, संवेगसिद्धिकरे हवइ अचिंतचिंतामणिकप्पे ।

[४३] से एवं परपरत्थसाहए तहा करुणाइभावओ अणेगेहिं भवेहिं विमुच्चमाणे पाव-कम्मुणा, पवड्ढमाणे अ सुहभावेहिं अणेगभवियाए आराहणाए पाउणइ सव्वुत्तमं भवं चरमं अचरमभवहेउं अविगलपरपरत्थनिमित्तं ।

[४४] तत्थ काऊण निरवसेसं किच्चं विहूयरयमले सिज्झइ, बुज्झइ, मुच्चइ, परिनि-व्वाइ, सव्वदुक्खाणमंतं करेइ त्ति पव्वज्जापरिपालणासुत्तं समत्तं ॥४॥

## [ अथ पञ्चमं प्रव्रज्याफलसूत्रम् ]

[४५] स एवमभिसिद्धे, परमबंभे, मंगलालए, जम्म-जरा-मरणरहिए, पहीणासुहे, अणु-बंधसत्तिवज्जिए, संपत्तनियसरूवे, अकिरिए, सहावसंठिए, अणंतनाणे, अणंतदंसणे ।

